॥ श्रीः ॥

॥ श्रीगुरुभ्यो नमः ॥

॥ भाष्यसंग्रहः ॥

श्रीदक्षिणाम्नाय शृङ्गगिरि श्रीशारदापीठाधीश्वराणां श्रीजगद्गुरूणां
अव्याजकरुणाभाजनेन श्रीसदाशिवेन्द्रसरस्वतीपूज्यपादेभ्यो
लब्धतुर्याश्रमक्रमेण श्रीज्ञानानन्दभारतीस्वामिना
विरचितः ।

विलासमुद्रणालये संमुद्य

श्रीज्ञानानन्दग्रन्थप्रकाशनसमित्या
प्रकाशितः ।

प्रेषणव्ययः पृथक्] 1976 [मू० रू० 3/-

॥ श्रीः ॥

॥ श्रीगुरुभ्यो नमः ॥

॥ भाष्यसंग्रहः ॥

श्रीदक्षिणाम्नाय शृङ्गगिरि श्रीशारदापीठाधीश्वराणां श्रीजगद्गुरूणां

अव्याजकरुणाभाजनेन श्रीसदाशिवेन्द्रसरस्वतीपूज्यपादेभ्यो

श्रीरङ्गस्थ श्रीवाणीविलासमुद्रणालये संमुद्य

श्री ज्ञानानन्दग्रन्थप्रकाशनसमित्या


प्रकाशितः ।

प्रेषणव्ययः पृथक्] 1976 [मू० रू० 3/-



शृङ्गगिरि श्रीजगद्गुरु

श्रीचन्द्रशेखरभारती स्वामिनः ।




शृङ्गगिरि श्रीजगद्गुरवः
श्री अभिनवविद्यातीर्थमहास्वामिनः श्री भारतीतीर्थस्वामिनश्च ।

॥ प्रस्तावना ॥

श्रीज्ञानानन्दभारतीस्वामिनः श्रीशृङ्गेरी जगद्गुरुपरमानुग्रहपात्रभूताः विवेकवैराग्यादिगुणगणसंपन्नाः विशुद्धान्तःकरणाः स्वीय सूक्ष्मबुद्ध्या दुरूहानपि शास्त्रविषयान् विशिष्य चाध्यात्मशास्त्रप्रतिपाद्यान् निस्सन्देहं सम्यक् विज्ञाय सरलया अन्यादृशया रीत्या सदृष्टान्तं परानपि बोधयन्तः मधुराप्रान्तविद्यमान मन्नाडिमङ्गलनामकाग्रहारे ब्रह्मभावं गता इत्येतत् विदितमेव, एते च संस्कृते द्राविड्यां च बहून् ग्रन्थान् विरचयामासुः। एते च ग्रन्थाः श्रीज्ञानानन्दग्रन्थप्रकाशनसमित्या धार्मिकद्रव्यसाहाय्येन क्रमेण प्रकाशीक्रियन्ते। अथापि एतावत्पर्यन्तममुद्रिताः केचन ग्रन्थाः अवशिष्टाः वर्तन्ते। तेषु अन्यतमोऽयं भाष्यसंग्रहनामा ग्रन्थः। अत्र च श्रीशंकरभगवत्पादाचार्यविरचित ईशावास्य-केनसनत्सुजातीय भाष्यार्थसंग्रहः श्लोकरूपः प्रायेण भाष्यगतपदगर्भितः विराजते। अन्ते च शिवानन्दलहरी श्लोकस्थानां अङ्कोलादिदृष्टान्तानां स्वारस्यनिरूपणपूर्वकं श्लोकार्थविवरणं, श्रीरामस्तवः, गीताभाष्योपक्रमसंग्रहश्च संयोजिताः। एतैर्महात्मभिः प्रणीतानां ग्रन्थरत्नानां प्रकाशनेन समितिरियमात्मानं धन्यतमां मन्यते। अवशिष्टानां ग्रन्थानामपि मुद्रापणे पर्याप्तं द्रव्यं दत्वा महोपकारः कर्तव्य इति प्रार्थयति समितिरियमास्तिकसमूहम्॥

ज्ञानानन्दग्रन्थप्रकाशनसमितिः।

॥ विषयसूचिका ॥



श्रीज्ञानानन्दभारतीस्वामिनः ।

॥ श्रीगुरुभ्यो नमः ॥

॥ ईशावास्योपनिषद्भाष्यसंग्रहः ॥

—:*:—

आत्मनोऽकर्मशेषस्य याथात्म्यस्य प्रकाशकाः ।
'ईशा' इत्यादयो मन्त्रा नोपयुक्ता हि कर्मसु ॥ १ ॥

आत्मनः किल याथात्म्यं बहुधाऽत्रैव वक्ष्यते ।
शुद्धताऽपापविद्धत्वं एकत्वं अशरीरता ॥ २ ॥

नित्यत्वं सर्वगत्वं चेत्येतैः यत्र लक्षणैर्युतम् ।
कर्मणा हि विरुद्धं स्यात्, तस्मादेषां न कर्मसु ॥ ३ ॥

उपयोगो भवेत् कश्चित्, एवंलक्षणमात्मनः ।
याथात्म्यं चापि नोत्पाद्यं नित्यसिद्धस्वभावतः ॥ ४ ॥

सर्वगत्वाच्च नाप्यं, सर्वदाऽप्येकरूपतः ।
अविकार्यं, असंस्कार्यं सदा शुद्धस्वरूपतः ॥ ५ ॥

कर्तृभोक्तृस्वरूपं च नैवास्य भवति क्वचित् ।
एवंभूतात्मयाथात्म्यं कर्मशेषः कथं भवेत् ॥ ६ ॥

सर्वोपनिषदो गीताः मोक्षधर्मः तथैव च ।
एवमेवात्मयाथात्म्यं निर्णीयोपरताः खलु ॥ ७ ॥

ततो नानात्वकर्तृत्वभोक्तृत्वादिकमात्मनः ।
लोकदृष्ट्या यथाप्राप्तं सर्वेषामपि सर्वदा ॥ ८ ॥

अशुद्धपापविद्धत्वं सकलं यत् प्रदृश्यते ।
तदेव सिद्धवत् कृत्वा कर्माणि विहितानि हि ॥ ९ ॥

यो हि कर्मफलेनार्थी दृष्टादृष्टविभागशः ।
ब्रह्मवर्चसकामी वा स्वर्गकामोऽथवा भवेत् ॥ १० ॥

"द्विजः काणकुणित्वादिदोषहीनो भवाम्यहम् ।
तस्मात् कर्माधिकारो मे सिध्यत्येव न संशयः" ॥ ११ ॥

इति स्वं मन्यमानश्च कर्मस्वधिकृतो भवेत् ।
इत्यधिकारतत्त्वज्ञाः प्रवदन्ति विपश्चितः ॥ १२ ॥

तस्मात् प्रोक्ता इमे मन्त्रा आत्मतत्त्वप्रकाशनात् ।
स्वभावादेव संप्राप्तं कर्मज्ञानं व्यपोह्य च ॥ १३ ॥

शोकमोहादिसंसारधर्मविच्छित्तिसाधनम् ।
आत्मैकत्वादिविज्ञानं सम्यगुत्पादयन्ति हि ॥ १४ ॥

विषयश्चाधिकारी च संबन्धश्च प्रयोजनम् ।
इत्येषामत्र सिद्धत्वात् व्याख्यास्यामो यथाक्रमम् ॥ १५ ॥

ओं पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ओं शान्तिः शान्तिः शान्तिः ॥

ईशा वास्यमिदꣳसर्वं यत्किंच जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ॥

जगत्यां खल्वशेषाणां ईशिता परमेश्वरः ।
आत्मा सन् सर्वजन्तूनां प्रत्यगात्मस्वरूपतः ॥ १६ ॥

ईष्टेऽसौ निखिलं यस्मात् तस्मात् 'ईट्' इति कीर्त्यते ।
तेनेशाऽऽत्मस्वरूपेण वास्यं छाद्यं इदं जगत् ॥ १७ ॥

अखिलं त्वहमेवेति प्रत्यगात्मतया दृढम् ।
चराचरं इदं सर्वं अनृतं सत्त्ववर्जितम् ॥ १८ ॥

परमार्थस्वरूपेण सत्येन परमात्मना ।
आच्छादनीयमित्येतत् मन्त्रेणानेन कीर्तितम् ॥ १९ ॥

चन्दनागरुकाष्ठादेः उदकादिषु मज्जनात् ।
क्लेदादिजातदौर्गन्ध्यं औपाधिकं प्रजायते ॥ २० ॥

काष्ठादौ घर्ष्यमाणे तु तिरोभूतं भवेदिदम् ।
पारमार्थिकगन्धेन स्वेनैवाच्छाद्यते तदा ॥ २१ ॥

आत्मन्येवं यदध्यस्तं कर्तृभोक्त्रादिलक्षणम् ।
नामरूपात्मकं कर्मफलरूपात्मकं तथा ॥ २२ ॥

सर्वं विकारजातं च द्वैतरूपं इदं जगत् ।
औपाधिकं भवेत् यस्मात् परमार्थसदात्मनः ॥ २३ ॥

भावनया निरस्तं तत् भवेदेव न संशयः ।
एवं भावयतः सम्यक् अधिकारो न कर्मसु ॥ २४ ॥

एषणात्रयसंन्यासमात्रेऽधिकारवान् हि सः ।
तस्मात् सर्वं परित्यज्य स्वात्मनिष्ठो भवेदयम् ॥ २५ ॥

त्यक्तेनेति पदं चात्र त्यागेनेत्यर्थवाचकम् ।
न हि त्यक्तो मृतः पुत्रो भृत्यो वाऽन्यः कथञ्चन ॥

आत्मसंबन्धिताभावात् आत्मानं रक्षितुं क्षमः ।
तस्मात् त्यागेन भुञ्जीथाः कुरु पालनमात्मनः ॥ २७ ॥

एवं सर्वेषणात्यागी मा गृधः कस्यचित् धनम् ।
मा कार्षीः गृधिमाकाङ्क्षां परस्य स्वस्य वा धने ॥

अथवा, मा गृधः, कस्मात्? कस्येत्याक्षेपवाचकः ।
आत्मैवेदं इति त्यक्तं ईशभावनयाऽखिलम् ॥ २९ ॥

ततः कस्य धनं भूयात् यत् काङ्क्षाविषयं भवेत् ।
सर्वं आत्मन एव स्यात् सर्वं आत्मैव वा भवेत् ॥ ३० ॥

अतः त्वं मा गृधिं कार्षीः मिथ्याभूते च वस्तुनि ।

एवं आत्मविदा पुत्राद्येषणात्रयवर्जनात् ॥ ३१ ॥

त्यागेनैवात्मविज्ञाननिष्ठया भुज्यतां सुखम् ।
इति संगृह्य वेदार्थं उपदिश्येतरस्य तु ॥ ३२ ॥

य आत्मग्रहणेऽशक्तो ह्यनात्मज्ञतया भवेत् ।
तस्य चोपदिशत्येवं मन्त्र एष द्वितीयकः ॥ ३३ ॥

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳसमाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥

अग्निहोत्रादिकर्माणि कुर्वन्नेव जिजीविषेत् ।
जीवितुं शतसंख्याकान् इच्छेत् संवत्सरानिह ॥ ३४ ॥

पुरुषस्य तु तावद्धि परमायुः विनिश्चितम् ।
तथा प्राप्तानुवादेन यो हि जीवितुमिच्छति ॥ ३५ ॥

स कुर्वन्नेव कर्माणीत्येतत् तस्य विधीयते ।
"मया कार्यमिदं कर्म नरोऽहमिति हेतुना" ॥ ३६ ॥

इति लोके शतं वर्षान् नरमात्राभिमानिनि ।
अग्निहोत्रादिकं कुर्वन् जिजीविषति च त्वयि ॥ ३७ ॥

इतः एतत्प्रकाराद्धि प्रकारान्तरमन्यथा ।
नास्ति येन प्रकारेणाशुभं कर्म न लिप्यते ॥ ३८ ॥

एवं उक्तप्रकारेण यदि कर्माचरिष्यसि ।
कर्मणा लिप्यसे न त्वं इति मन्त्रेण कीर्तितम् ॥ ३९ ॥

एवं प्रथममन्त्रेण सर्वं आत्मेति निश्चयात् ।
संन्यासिनो विरक्तस्य ज्ञाननिष्ठा प्रकीर्तिता ॥ ४० ॥

सर्वैषणापरित्यागासमर्थस्य यथाविधि ।
कर्मनिष्ठा द्वितीयेन मन्त्रेण च विधीयते ॥ ४१ ॥

एवं च द्विविधा निष्ठा सर्वशास्त्रेषु निश्चिता ।
मन्त्रद्वयेन संप्रोक्ता समासेन यथाक्रमम् । ४२ ॥

ज्ञाननिष्ठाऽऽदिमन्त्रेण संन्यासिनो विरागिणः ।
कर्मनिष्ठा द्वितीयेन तदशक्तस्य कीर्तिते । ४३ ॥

इतीदं हि कथं ज्ञातं इति चेदुच्यतेऽधुना ।
पर्वतवदकम्प्यं च विरोधं ज्ञानकर्मणोः ॥ ४४ ॥

न स्मरसि यथोक्तं किं, इहाप्युक्तं पुरा स्फुटम् ।
यो हि जिजीविषेत् कर्म कुर्वन्नेव जिजीविषेत् ॥ ४५ ॥

ईशावास्यमिदं सर्वं इत्युक्तः प्रथमे पुनः ।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यचिद्धनम् ॥ ४६ ॥

जीविते मरणे वा न गृधिं कुर्यात् कदाचन ।
अरण्यं च पदं गच्छेत् पुनर्नैयात् ततः पदात् ॥ ४७ ॥

इति शास्त्रेण संन्यासशासनादवगम्यते ।
उभयोः फलभेदं च वक्ष्यति ज्ञानकर्मणोः ॥ ४८ ॥

इमौ द्वावेव पन्थानौ पुरस्ताच्च क्रियापथः ।
ततः पश्चाच्च संन्यासः न्यास एवात्यरेचयत् ॥ ४९ ॥

संन्यासस्यातिरेकश्च संप्रोक्तस्तैत्तिरीयके ।
द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः ॥ ५० ॥

प्रवृत्तिलक्षणो धर्मो निवृत्तिश्चेति भाषितम् ।
इत्यादि च विचार्यैव वेदाचार्येण निश्चितम् ॥ ५१ ॥

वेदव्यासेन पुत्राय प्रोक्तं भगवता पुरा ।
एवं प्रदर्शयिष्यामो विभागं अनयोः स्फुटम् ॥ ५२ ॥

इदानीं अविदुषो निन्दां वक्तुं मन्त्रः प्रवर्तते ।

असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥

देवादयोपि चासुराः भावं अद्वयमात्मनः ॥ ५३ ॥

अपेक्ष्य देवलोकाश्च ह्यसुर्याः स्वभूता अपि ।
अत्र दृष्टो नामशब्दो निपातः स्यादनर्थकः ॥ ५४ ॥

लोक्यन्ते चैव दृश्यन्ते भुज्यन्त इति कारणात् ।
कर्मफलानि जन्मानि लोका इत्यत्र कीर्तितम् ॥ ५५ ॥

अदर्शनस्वरूपेण ह्यन्धेन तमसाऽऽवृताः ।
अज्ञानेन समाच्छन्नाः स्थावरान्ता इमे क्रमात् ॥ ५६ ॥

इमं देहं परित्यज्य यथाकर्म यथाश्रुतम् ।
लोकान् प्रेत्याभिगच्छन्ति, त एवात्महनो मताः ॥ ५७ ॥

आत्मानमेव ये घ्नन्ति, त एवात्महनो जनाः ।
आत्मतत्त्वमजानन्तः आत्मानं घ्नन्ति ते ध्रुवम् ॥ ५८ ॥

अविद्यारूपदोषेण विद्यमानस्य चात्मनः ।
तिरस्कारेण यत्कार्यं विद्यमानस्य चात्मनः । ५९ ॥

अजरामरणत्वादिसंवेदनादिलक्षणम् ।
हतस्येव तिरोभूतं तत् फलं भवतीत्यतः ॥ ६० ॥

प्राकृता ये त्वविद्वांसो जना आत्महनः श्रुताः ।
आत्महननदोषेण तेन ते संसरन्ति हि ॥ ६१ ॥

हननादात्मनो यस्माविद्वांसः संसरन्ति च ।
विपर्ययेण विद्वांसो मुच्यन्ते दोषवर्जिताः ॥ ६२ ॥

कीदृशमात्मतत्त्वं तत् इति मन्त्रेण गद्यते ।

अनेजदेकं मनसो जवीयो
नैनद्देवा आप्नुवन्पूर्वमर्षत् ।

तद्धावतोऽन्यानत्येति तिष्ठ-
त्तस्मिन्नपो मातरिश्वा दधाति ॥ ४ ॥

अनेजत् नेदमेजत् स्यात् 'एजृ कम्पने' इत्यतः ॥ ६३ ॥

कम्पनं चलनं चापि स्वभावप्रच्युतिः भवेत् ।
तद्वर्जितं भवत्येतत् एकरूपं हि सर्वदा ॥ ६४ ॥

तच्चैकं सर्वभूतेषु, सङ्कल्पादिकलक्षणात् ।
अन्तःकरणात् मनसो जवीयो जववत्तरः ॥ ६५ ॥

"ध्रुवमेतत् निश्चलं च, जवीयो मनसोऽपि च ।
विरुद्धमुच्यते कस्मात्", दोषो नैवोपपत्तितः ॥ ६६ ॥

निरुपाधिस्वरूपेण नैजदेकं इतीर्यते ।
सङ्कल्पादिस्वरूपस्य तूपाधेरनुवर्तनात् । ६७ ॥

जवीयो मनसः प्रोक्तं सोपाधिकस्वरूपतः ।
इह देहस्थितस्यापि मनसः क्षणमात्रतः ॥ ६८ ॥

ब्रह्मलोकादिदूरस्थसङ्कल्पनं भवेदिति ।
लोकसिद्धं जविष्ठत्वं, तस्मिन् मनसि गच्छति ॥ ६९ ॥

पूर्वं च ब्रह्मलोकादीन् प्रथमप्रासवत् द्रुतम् ।
गृह्यते ह्यात्मचैतन्याभासो, जवीय इत्यतः ॥ ७० ॥

द्योतनाच्चक्षुरादीनि देवा इति प्रकीर्तितम् ।
एतत् प्रकृतमात्मानं इन्द्रियाणि च नाप्नुवन् ॥ ७१ ॥

जवीयो हि मनः तेभ्यः मनोव्यापाररूपतः ।
व्यवधानादिन्द्रियाणां आभासोऽपि तदात्मनः ॥ ७२ ॥

विषयो नैव देवानां जवनात् मनसोऽपि तत् ।
पूर्वमेव गतं तत्र व्यापकत्वाच्च व्योमवत् ॥ ७३ ॥

सर्वव्याप्यात्मनः तत्त्वं सर्वसंसारवर्जितम् ।
निरुपाधिस्वरूपेण स्वेनाविक्रियमेव सत् ॥ ७४ ॥

उपाधिभिः कृता एव सर्वाः संसारविक्रियाः ।
एतदनुभवतीव मूढानामविवेकिनाम् ॥ ७५ ॥

नैकवत् प्रतिदेहं चावभासत इतीर्यते ।
मनोवागिन्द्रियादीन् तत् अन्यानात्मविलक्षणान् ॥७६॥

धावतो गच्छतः सर्वान् अतीत्य गच्छतीव तत् ।
इवार्थः स्वयमेवेह तिष्ठच्छब्देन दर्शितः ॥ ७७ ॥

तिष्ठत् स्वयं यथापूर्वं अविक्रियं सदा हि तत् ।
तस्मिन्नात्मस्वरूपे च नित्यचैतन्यरूपके ॥ ७८ ॥

मातरिश्वा—स वायुः स्यात् सर्वप्राणिक्रियात्मकः ।
श्वयति गच्छतीहास्मिन् अन्तरिक्षे हि मातरि ॥ ७९ ॥

कार्यकरणजातानि यदाश्रयाणि सन्ति च ।
प्रोतान्योतानि यस्मिंश्च सर्वस्य जगतश्च यत् ॥ ८० ॥

विधारयितृ यत् सूत्रसंज्ञकं तत्त्वमुच्यते ।
तदेव मातरिश्वेति मन्त्रेऽस्मिन् कीर्तितो भवेत् ॥ ८१ ॥

अपश्च प्राणिकर्माणि तच्चेष्टालक्षणानि हि ।
अग्निपर्जन्यभान्वादेः दाहज्वलनवर्षणम् ॥ ८२ ॥

प्रकाश एवमादीनि दधाति विभजत्यसौ ।
यद्वा धारयतीत्यर्थः भीषाऽस्मादिति चोदनात् ॥ ८३ ॥

कार्याणां करणानां च विक्रिया अखिला अपि ।
सर्वेषां आस्पदे नित्यचैतन्यात्मस्वरूपके ॥ ८४ ॥

सत्येव संभवन्तीति तात्पर्यं हि प्रतीयते ।

न जामिताऽस्ति मन्त्राणां इति मन्त्रो हि पञ्चमः ॥८५॥

पूर्वमन्त्रोक्तमप्यर्थं एवमाहुः पुनस्तथा ।

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥

प्रकृतं आत्मनः तत्त्वं तदेजति चलत्यदः ॥ ८६ ॥

नैजति न चलत्येतत्, स्वतश्चाचलमेव सत् ।
चलतीव जनैः दृष्टः, वर्षकोटिशतैरपि ॥ ८७ ॥

अविदुषां अनाप्यत्वात् तत् दूरे दूर एव तत् ।
विदुषां त्वन्तिकेऽत्यन्तं समीपे वर्तते ध्रुवम् ॥ ८८ ॥

न हि तत् केवलं दूरे स्वात्मत्वात् अन्तिके च तत् ।
तत् अन्तरस्य सर्वस्य स्थितमभ्यन्तरे यतः ॥ ८९ ॥

आकाशवत् यतो व्यापि सूक्ष्ममत्यन्तमेव च ।
सर्वान्तर इति श्रुत्या, नामरूपक्रियात्मकम् ॥ ९० ॥

यत् जगत् अस्य सर्वस्य बाह्यतोऽपि तथा स्थितम् ।
प्रज्ञानघन एवेति शासनाच्च निरन्तरम् ॥ ९१ ॥

— ❋ —

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥

परिव्राट् तु मुमुक्षुः यः सर्वाणि जगतीतले ।
अव्यक्तादीनि भूतानि स्थावरान्ताण्यशेषतः ॥ ९२ ॥

सर्वात्मभावमापन्नः आत्मन्येवानुपश्यति ।
आत्मनो व्यतिरिक्तानि न कदाचन पश्यति ॥ ९३ ॥

तेष्वेव सर्वभूतेषु चात्मानमनुपश्यति ।
कार्यकरणसङ्घातदेहस्यास्यास्म्यहं यथा ॥ ९४ ॥

सर्वप्रत्ययसाक्षी च चेतयिता च केवलः ।
अनेनैव स्वरूपेण ह्यव्यक्तादेरशेषतः ॥ ९५ ॥

स्थावरान्तस्य भूतस्य चात्मास्मीति स पश्यति ।
सर्वभूतेषु चात्मानं निर्विशेषं स पश्यति ॥ ९६ ॥

स तथा दर्शनादेव ततो न विजुगुप्सते ।
विजुगुप्सां घृणां नैव करोति स कदाचन ॥ ९७ ॥

सर्वा घृणाऽऽत्मनो भिन्नं दुष्टं हि पश्यतो भवेत् ।
अत्यन्तशुद्धमात्मानं पश्यतस्तु निरन्तरम् ॥ ९८ ॥

घृणानिमित्तमन्यच्च नास्तीति प्राप्तमेव हि ।
प्राप्तस्यैवानुवादोऽयं 'ततो न विजुगुप्सते' ॥ ९९ ॥

इममेवार्थमन्योऽपि मन्त्र आह हि सप्तमः ।

यस्मिन्सर्वाणि भूतानि आत्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥

यस्मिन् काले यथोक्ते वाऽऽत्मनि सर्वाण्यशेषतः ॥

अभूदात्मैव भूतानि परमार्थात्मदर्शनात् ।
आत्मैव तानि संवृत्तः परमार्थं विजानतः । १०१ ॥

एवं विजानतः तत्र तस्मिन् कालेऽथवाऽऽत्मनि ।
को मोहो वाऽपि कः शोकः, एकत्वमनुजानतः ॥

यत् कामकर्मणोः बीजं मोहश्शोकस्तथा द्वयम् ।
अविजानत एव स्यात्, विशुद्धं गगनोपमम् ॥ १०३ ॥

स्वात्मैक्यं पश्यतो नैव, को मोह इति वाक्यतः ।
अविद्याकार्यभूतस्य शोकमोहद्वयस्य च ॥ १०४ ॥

आक्षेपसूचनादेवं असंभवप्रदर्शनात् ।
सकारणस्य संसारस्योच्छेदो हि प्रदर्शितः ॥ १०५ ॥

योऽयमात्मा गतैः मन्त्रैः प्रोक्तः स स्वेन रूपतः ।
किंलक्षणो भवेदात्मेत्ययं मन्त्रः प्रवक्ष्यति ॥ १०६ ॥

स पर्यगाच्छुक्रमकायमव्रण-
मस्नाविरꣳशुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतो-
ऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥

स 'पर्यगात्' यथोक्तः सः समन्तात् गतवान् परि ।
आकाशवत् यतो व्यापी, शुक्रं शुभ्रं च दीप्तिमान् ॥

अकायं अशरीरं सः लिङ्गदेहविवर्जितः ।
अव्रणं अक्षतं चापि तथैवास्नाविरं हि सः ॥ १०८ ॥

स्नावाः सिरा न विद्यन्ते यस्मिन्नस्नाविरं हि तत् ।
व्रणस्नावानिषेधेन स्थूलदेहो निषिध्यते ॥ १०९ ॥

शुद्धं निर्मलमित्येतेनाविद्यामलवर्जितम् ।
तेन कारणदेहस्य प्रतिषेधः प्रकीर्तितः ॥ ११० ॥

अपापविद्धमेतेन धर्माधर्मादिवर्जितम् ।
अत्र च शुक्रमित्याद्या वाचः स पर्यगादिति ॥ १११ ॥

उपक्रम्य मनीषीत्याद्युपसंहारदर्शनात् ।
पुंलिङ्गत्वेन नेयाः स्युः, क्रान्तदर्शी कविश्च सः ॥

नान्योऽतोऽस्ति हि द्रष्टेति श्रुतेः स एव सर्वदृक् ।
इषिता मनसो यस्मात् मनीषीत्युच्यते ततः ॥ ११३ ॥

सर्वज्ञ ईश्वरश्चायं इत्यर्थः, परिभूः परि ।
आस्ते ह्युपरि सर्वेषां, भवति स्वयमेव सः ॥ ११४ ॥

भवत्युपरि येषां च यश्चाप्युपरि तिष्ठति ।
ते सर्वे स्वयमेवेति स्वयंभूरिति कीर्तितः ॥ ११५ ॥

ईश्वरो नित्यमुक्तः स याथातथ्यत एव हि ।
अत्र यथातथाभावो याथातथ्यं इतीरितः ॥ ११६ ॥

यथार्थकर्मणां कर्मफलानां चैव साधनात् ।
अर्थान् पदार्थान् कर्तव्यान् व्यदधात स यथाक्रमम् ॥

विहितवान् यथायुक्तं विभागमकरोदिति ।
समाभ्यः शाश्वतीभ्यश्च, समाः संवत्सराह्वयाः ॥ ११८ ॥

प्रजापतय इत्येते, तेभ्योऽयं व्यभजत्तथा ।

अत्राद्येन च मन्त्रेण ज्ञाननिष्ठा प्रकीर्तिता ॥ ११९ ॥

सर्वैषणापरित्यागात् वेदार्थः प्रथमो हि सा ।
" ईशावास्यमिदं सर्वं मा गृधः कस्यस्विद्धनम् " ॥

जिजीविषूणामज्ञानां तन्निष्ठाया असंभवे ।
कर्मनिष्ठा द्वितीयस्तु वेदार्थः परिकीर्तितः ॥ १२१ ॥

" कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः " ।
मन्त्रद्वयेन निर्दिष्टनिष्ठयोरुभयोरपि ॥ १२२ ॥

विभागो बृहदारण्योपनिषद्यपि दर्शितः ।
जाया मे स्यादिति श्रुत्या कर्माण्यज्ञस्य कामिनः ॥

मन एवात्मा वाग्जायेत्यादिकवचनादपि ।
कर्मनिष्ठस्य कामित्वं अज्ञत्वं चापि निश्चितम् ॥ १२४ ॥

फलं तस्य च सप्तान्नसर्गः तेष्वात्मभावनात् ।
आत्मतत्त्वे ह्यवस्थानं, कर्मनिष्ठाविरोधतः ॥ १२५ ॥

एषणात्रयसंन्यासेनात्मविदां तु दर्शिता ।
आत्मस्वरूपनिष्ठैव किं प्रजयेति वाक्यतः ॥ १२६ ॥

ये तु संन्यासिनो ज्ञाननिष्ठाः खलु भवन्ति च ।
तेभ्योऽसुर्या इति श्रुत्याऽविद्वन्निन्दापुरस्सरम् ॥ १२७ ॥

'स पर्यगात्' मन्त्रेणापि याथात्म्यं परमात्मनः ।
उपदिष्टं च ते ह्यत्र निष्ठायामधिकारिणः ॥ १२८ ॥

कामिनो नाधिकारोऽत्र स्पष्टमेष प्रतीयते ।
तथा श्वेताश्वतराणां चोपनिषदि दृश्यते ॥ १२९ ॥

अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसङ्घजुष्टम् ।
इत्यादिना विभज्योक्तं, कर्मनिष्ठास्तु कामिनः ॥ १३० ॥

ये जिजीविषवः कर्म कुर्वन्तश्च भवन्ति हि ।
अन्धः तमः प्रविशन्तीत्यादि तेभ्यः खलूच्यते ॥ १३१ ॥

कथं एवं न सर्वेषां इत्यवगम्यते, शृणु ।
साध्यसाधनभेदोपमर्दनेन ह्यकामिनः ॥ १३२ ॥

"यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोकः एकत्वमनुपश्यतः" ॥ १३३ ॥

इत्यात्मैकत्वविज्ञानं कर्मणा नैव केनचित् ।
ज्ञानान्तरेण वाऽमूढः कश्चित् समुच्चिचीषति ॥ १३४ ॥

समुच्चिचीषया त्वत्राविद्वन्निन्दा कृता श्रुतौ ।
न्यायतः शास्त्रतो वाऽपि यस्य येन समुच्चयः ॥ १३५ ॥

संभवति स एवात्र प्रोक्तो भवेत् न चान्यथा ।
देवताविषयं ज्ञानं तद्दैवं वित्तमुच्यते ॥ १३६ ॥

कर्मसंबन्ध्युपन्यस्तं, न ज्ञानं परमात्मनः ।
विद्यया देवलोकः स्यात् इति पृथक् फलश्रुतेः ॥ १३७ ॥

एकैकानुष्ठितेर्निन्दा द्वयोश्च ज्ञानकर्मणोः ।
समुच्चिचीषया प्रोक्ता नैकैकनिन्दनाय सा ॥ १३८ ॥

"विद्यया तदारोहन्ति, देवलोको हि विद्यया ।
न तत्र दक्षिणा यान्ति, पितृलोकस्तु कर्मणा" ॥ १३९ ॥

इति पृथक्फलश्रुत्या निन्दा नैव हि युज्यते ।
न शास्त्रविहितं किंचित् क्वाप्यकर्तव्यतामियात् ॥ १४० ॥

अन्धं तमः प्रविशन्ति ये अविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायाꣳरताः ॥

'अन्धं तमः प्रविशन्ति'–अदर्शनात्मकं तमः ।
विद्याया अन्या साऽविद्या कर्म, विद्याविरोधि तत् ॥

अविद्या केवलं कर्म चाग्निहोत्रादिलक्षणम् ।
उपासतेऽनुतिष्ठन्ति ये सदा तत्पराः 'ततः' । १४२ ॥

तस्माच्च तमसो भूयोऽधिकं बहुतरं तमः ।
विद्यायां देवताज्ञाने कर्म हित्वा हि केवले ॥ १४३ ॥

रताः येऽभिरताः सन्तः ते प्रविशन्त्यसंशयम् ।

मन्त्रोऽयं दशमः प्राह समुच्चयस्य कारणम् ॥ १४४ ॥

अवान्तरफले भेदं विद्यायाः कर्मणस्तथा ।
अन्यथा ज़ामितैव स्यात् सफलाफलयोः द्वयोः ॥

संनिधौ स्थितयोश्चैवं अङ्गाङ्गित्वस्य संभवात् ।

अन्यदेवाहुर्विद्यया अन्यदाहुरविद्यया ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥

अन्यच्च पृथगेवाहुः विद्यया क्रियते फलम् ॥ १४६ ॥

अविद्ययाऽन्यदेवाहुः कर्मणा क्रियते फलम् ।
विद्यया देवलोकः स्यात्, पितृलोकश्च कर्मणा ॥ १४७ ॥

इति शुश्रुम धीराणां धीमतां वचनं वयम् ।
श्रुतवन्तः, ये आचार्या नोऽस्मभ्यं विचचक्षिरे ॥ १४८ ॥

सुष्ठु व्याख्यातवन्तो ये ज्ञानं च कर्म च द्वयम् ।

तेषामेवागमश्चैष पारम्पर्यक्रमागतः ॥ १४९ ॥

विद्यां चाविद्यां च यस्तद्वेदोभयꣳसह ।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥

विद्यां च देवताज्ञानं अविद्यां कर्म चोभयम् ।
यः तदेतत् सहैकेनानुष्ठेयं पुरुषेण च ॥ १५० ॥

वेद तस्य समुच्चित्य कारिणः स्यात् क्रमेण च ।
एकस्य पुरुषार्थस्य संबन्ध इति गीयते ॥ १५१ ॥

अविद्यया मृत्युं तीर्त्वा चाग्निहोत्रादिकर्मणा ।
कर्म स्वाभाविकं ज्ञानं उभयं मृत्युसंज्ञितम् ॥ १५२ ॥

तीर्त्वा सम्यगतिक्रम्य विद्ययाऽमृतमश्नुते ।
विद्यया देवताज्ञानात् अमृतं देवतात्मताम् ॥ १५३ ॥

अश्नुते समवाप्नोति देवभावं स ऋच्छति ।
देवतात्मगमनं यत् तद्ध्यत्रामृतमुच्यते ॥ १५४ ॥

अन्धं तमः प्रविशन्ति येऽसंभूतिमुपासते ।
ततो भूय इव ते तमो य उ संभूत्याꣳरताः ॥

व्याकृताव्याकृतज्ञानसमुच्चिचीषयाऽधुना ।
प्रत्येकं उच्यते निन्दा – 'येऽसंभूतिमुपासते' ॥ १५५ ॥

संभवनं हि संभूतिः, यस्य कार्यस्य सा भवेत् ।
तच्च संभूतिरित्युक्तं, तस्या अन्या हि कारणम् ॥१५६॥

अव्याकृतं असंभूतिः प्रकृतिश्चेति कीर्त्यते ।
तां कामकर्मणोः बीजभूतामदर्शनात्मिकाम् ॥ १५७ ॥

उपासते हि सेवन्ते तदनुरूपमेव ते ।
अन्धं तमः प्रविशन्ति ह्यदर्शनात्मकं तमः ॥ १५८ ॥

'ततो भूय इव ते' तस्मात् बहुतरं तमः ।
प्रविशन्ति ये संभूत्यां भवन्ति केवलं रताः ॥ १५९ ॥

रता हिरण्यगर्भाख्ये कार्यब्रह्मणि ये पुनः ।

उपासनाद्द्वयस्याद्य समुच्चयस्य कारणम् ॥ १६० ॥

अवयवफले भेदो मन्त्रेऽस्मिंस्तु निगद्यते ।

अन्यदेवाहुः संभवादन्यदाहुरसंभवात् ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥

अन्यदेव पृथक्चैव फलं आहुश्च संभवात् ॥ १६१ ॥

संभूतेः कार्यभूतस्य ब्रह्मणश्चाप्युपासनात् ।
अणिमादिकमैश्वर्यं फलं हि जायते महत् ॥ १६२ ॥

एवं आख्यातवन्तोऽपि चान्यदाहुरसंभवात् ।
अव्याकृतादसंभूतेः, असंभूतेरुपासनात् ॥ १६३ ॥

प्रविशन्ति तमो भूयः, पूर्वमुक्तं तदेव हि ।
प्रकृतौ लय इत्येव पौराणिकैः निगद्यते ॥ १६४ ॥

"इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे" ।
व्याकृताव्याकृत ज्ञानफलमस्माकं चोचिरे ॥ १६५ ॥

असंभूतेश्च संभूतेः उपासनसमुच्चयः ।
एकपुरुषार्थत्वाच्च युक्त एवेति गद्यते ॥ १६६ ॥

संभूतिं च विनाशं च यस्तद्वेदोभयꣳसह ।
विनाशेन मृत्युं तीर्त्वासंभूत्यामृतमश्नुते ॥

विनाशो यस्य कार्यस्य धर्मः स तेन धर्मिणा ।
अभेदेनोच्यते मन्त्रे विनाश इति शब्दतः ॥ १६७ ॥

तेन चोपासनात् तस्यानैश्वर्यं मृत्युनामकम् ।
दोषमधर्मकामादि सर्वं तीर्त्वाऽतिगम्य च ॥ १६८ ॥

अणिमादिफलप्राप्तिः हिरण्यगर्भसेवया ।
अनैश्वर्यादिकं मृत्युं तेनातीत्याश्नुतेऽमृतम् ॥ १६९ ॥

असंभूत्या स आप्नोति ह्यव्याकृतस्योपासनात् ।

अमृतं तु भवेदत्र प्रकृतौ लयलक्षणम् ॥ १७० ॥

संभूतिरिति मन्त्रेऽस्मिन् शब्दे दृष्टेऽपि युक्तितः ।
अवर्णलोपो द्रष्टव्यः प्रकृतौ लयदर्शनात् ॥ १७१ ॥

दैवमानुषवित्ताख्यसाधनेनाखिलेन च ।
एतावद्धि फलं साध्यं शास्त्रेण विहितं भवेत् ॥ १७२ ॥

प्रकृतौ लयपर्यन्तं संसारगतिरेव हि ।
अतः परं तु सर्वात्मभाव एव विजानतः ॥ १७३ ॥

उक्तः सर्वैषणात्यागज्ञाननिष्ठाफलं पुरा ।
द्विप्रकारो हि वेदार्थः एवमत्र प्रकाशितः ॥ १७४ ॥

प्रवृत्तिलक्षणश्चापि निवृत्तिलक्षणः तथा ।
तत्र प्रवृत्तिरूपस्य विधिनिषेधरूपिणः ॥ १७५ ॥

वेदार्थस्य च कृत्स्नस्याप्युपयुक्तं प्रकाशने ।
ब्राह्मणं हि प्रवर्ग्यान्तं, ऊर्ध्वं बृहदारण्यकम् ॥ १७६ ॥

निवृत्तिलक्षणस्यास्य वेदार्थस्य प्रकाशने ।
निषेकादिश्मशानान्तं कर्म कुर्वन् जिजीविषुः ॥ १७७ ॥

यो विद्ययाऽपरब्रह्मविषयया च संयुतः ।
सोऽधिकारी हि मार्गेण केनामृतत्वमश्नुते ॥ १७८ ॥

अथेदानीं मम प्राणः वायुः मरिष्यतो ध्रुवम् ॥ १९३ ॥

हित्वाऽध्यात्मपरिच्छेदं आत्मानमधिदैवतम् ।
सर्वात्मकानिलं रूपं सूत्रात्मानं तथाऽमृतम् ॥ १९४ ॥

वाक्यशेषो भवेदत्र च प्रतिपद्यतामिति ।
संस्कृतं लिङ्गदेहं च ज्ञानकर्मसमुच्चयात् ॥ १९५ ॥

उत्क्रामत्विति द्रष्टव्यं मार्गयाचनदर्शनात् ।
अथ शरीरमेतत्तु भस्मान्तमनले हुतम् ॥ १९६ ॥

भूयात् भस्मावशेषं च, यथोपासनमोमिति ।
ओंप्रतीकस्वरूपत्वात् अग्निः सत्यात्मकं तथा ॥ १९७ ॥

उच्यते ब्रह्मणोऽभेदात्, संकल्पात्मक हे क्रतो ।
स्मर्तव्यं स्मर मे यत्स्यात्, तस्य कालो ह्युपस्थितः ॥

एतावत्कालपर्यन्तं यन्मया भावितं कृतम् ।
बाल्यप्रभृति हे अग्नेऽनुष्ठितं कर्म तत् स्मर ।
क्रतो स्मर कृतं स्मरेत्यादरात् वचनं पुनः ॥ १९९ ॥

पुनरन्येन मन्त्रेण मार्गं स याचतेऽधुना ।

अग्ने नय सुपथा राये अस्मा-
न्विश्वानि देव वयुनानि विद्वान् ।

युयोध्यस्मज्जुहुराणमेनो
भूयिष्ठां ते नमउक्तिं विधेम ॥

नय गमय हे अग्ने सुपथा शोभनेन नः ॥ २०० ॥

अन्यमार्गनिवृत्त्यर्थं सुपथेति विशेषणम् ।
दक्षिणेन हि मार्गेण गतागतस्वभावतः ॥ २०१ ॥

सुतरामेव निर्विण्णः तस्मात् याचे पुनः पुनः ।
गतागतविहीनेन शोभनेन पथा नय ॥ २०२ ॥

राये धनाय भोगाय फलानां शुभकर्मणाम् ।
यथोक्तफलसंयुक्तान् अस्मानग्ने द्रुतं कुरु ॥ २०३ ॥

विश्वानि देव सर्वाणि कर्माणि वयुनानि च ।
विज्ञानान्यथवा, विद्वान् जानन्, किं च युयोधि च ॥

वियोजय त्वमस्मभ्यः एनः पापं विनाशय ।
जुहुराणं यदस्माकं कुटिलं वञ्चनात्मकम् ॥ २०५ ॥

ततो वयं विशुद्धाश्च धनं प्राप्स्याम चेप्सितम् ।
किं तु कर्तुमिदानीं ते परिचर्यां न शक्नुमः ॥ २०६ ॥

तस्मात् ते तव भूयिष्ठां नम उक्तिं वदाम वै ।
पुनः पुनः नमस्कारवाचमेव विधेम ते ॥ २०७ ॥

नमस्कारस्वरूपेण परिचर्यां विधेम ते ।

"अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते" ॥ २०८ ॥

विनाशेन मृत्युं तीर्त्वाऽसंभूत्याऽमृतमश्नुते ।
इति वाक्यद्वयं श्रुत्वा केचित् कुर्वन्ति संशयम् ॥ २०९ ॥

अतो निर्धारणार्थाय संक्षेपेण विचारणाम् ।
करिष्यामोऽत्र तावत्तु किंनिमित्तः स संशयः ॥ २१० ॥

विद्याशब्देन मुख्यैव विद्या हि परमात्मनः ।
कस्माच्च गृह्यते नात्र अमृतत्वं न गृह्यते ॥ २११ ॥

ननूक्तैव विशुद्धात्मविद्यायाः कर्मणोऽपि च ।
समुच्चयानुपपत्तिः विरोधस्य हि संभवात् ॥ २१२ ॥

सत्यमेवं विरोधस्तु सुस्पष्टं नावगम्यते ।
विरोधश्चाविरोधश्च शास्त्रमात्रप्रमाणकौ ॥ २१३ ॥

अविद्याया अनुष्ठानं यथा शास्त्रप्रमाणकम् ।
विद्याया अप्यनुष्ठानं तथा शास्त्रप्रमाणकम् ॥ २१४ ॥

शास्त्रेणैव हि बोद्धव्यौ विरोधाविरोधावपि ।
'न हिंस्यात् सर्वा भूतानि' शास्त्रादवगतं पुनः ॥ २१५ ॥

अध्वरे तु पशुं हिंस्यात इति शास्त्रेण बाध्यते ।
एवमेव भवेच्छास्त्रात् विद्याविद्यासमुच्चयः ॥ २१६ ॥

इति चेन्न विरुद्धे हि विद्याविद्ये स्वरूपतः ।

'दूरमेते विपरीते विषूची
अविद्या या या च विद्येति ज्ञाता ।
'विद्यां च अविद्यां च' इति वाक्यप्रमाणतः ॥ २१७ ॥

अविरोध इति प्राप्ते विरोध एतयोः द्वयोः ।
हेतौ फले स्वरूपे च विस्पष्टं हि प्रतीयते ॥ २१८ ॥

असंभवात् विकल्पस्य समुच्चयविधेरिह ।
अविरोधो भवेच्चेन्न न युक्तः सहसंभवः ॥ २१९ ॥

क्रमेणैकाश्रये स्यातां इति चेत् तन्न युज्यते ।
अविद्या नोपपद्येत विद्योत्पत्तौ तदाश्रये ॥ २२० ॥

'अग्निरुष्णः प्रकाशश्च' इति ज्ञानोदये सति ।
यदाश्रये तदुत्पन्नं तस्मिन्नेवाश्रये पुनः ॥ २२१ ॥

'अग्निः शीतोऽप्रकाशश्च' इत्यज्ञानं कथं भवेत् ।
संशयो वा कथं सिध्येत् दृढज्ञाने च जाग्रति ॥ २२२ ॥

'तत्र को मोहः कः शोकः एकत्वमनुपश्यतः' ।
इत्येवं शोकमोहादेः असंभवश्रुतेः बलात् ॥ २२३ ॥

अविद्यासंभवादेव तदुपादानकर्मणः ।
अयुक्ततामवोचाम, 'अमृतमश्नुते' इति ॥ २२४ ॥

वाक्येऽमृतं च सापेक्षं, तथा विद्येति शब्दतः ।
आत्मविद्या गृहीता चेत् 'हिरण्मयेन' वाक्यतः ॥२२५॥

याचनं द्वारमार्गस्य नोपपन्नं भवेदतः ।
यथोक्त एव मन्त्रार्थः इति कृत्वा विरम्यते ॥ २२६ ॥

इति ईशावास्योपनिषद्भाष्यसंग्रहः ॥

— * —

॥ श्री ॥

॥ केनोपनिषद्भाष्यसंग्रहः ॥

—:*:—

प्रथमः खण्डः ।

आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि । सर्वं ब्रह्मौपनिषदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु । तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥

ओं शान्तिः शान्तिः शान्तिः ॥

तलवकारशाखायां अध्याये नवमेऽधुना ।
अधिकृत्य परं ब्रह्म केनोपनिषदुच्यते ॥ १ ॥

समापितानि कर्माणि प्रागेतस्मादशेषतः ।
सर्वकर्माश्रयीभूतप्राणस्योपासनानि च ॥ २ ॥

तथैवोक्तानि कर्माङ्गसामविषयकाणि च ।
अनन्तरं च गायत्रसामाधिकृत्य दर्शनम् ॥ ३ ॥

उक्तं कार्यं च वंशान्तं सर्वमेतद्यथोदितम् ।
सम्यगनुष्ठितं कर्म ज्ञानं चानुष्ठितं यदि ॥ ४ ॥

निष्कामस्य मुमुक्षोस्तत् सत्त्वस्य शुद्धये भवेत् ।
सकामस्य तु विज्ञानहीनस्य केवलानि च ॥ ५ ॥

श्रौतस्मार्तानि कर्माणि दक्षिणाध्वोपपत्तये ।
पुनरावृत्तये भूमौ संसाराय भवन्ति च ॥ ६ ॥

स्वाभाविकथा त्वशास्त्रीयप्रवृत्त्या लभ्यते पुनः ।
पश्वादिस्थावरान्ता च बहुधा खल्वधोगतिः ॥ ७ ॥

किं तु विशुद्धसत्त्वस्य विरक्तस्य विवेकिनः ।
बाह्यादनित्यात्सर्वस्मात् कृतादिहाथवा पुरा ॥ ८ ॥

साध्यसाधनसंबन्धात् पूर्वसंस्कारसंभवात् ।
आत्मानं विषयीकृत्य जिज्ञासा च प्रवर्तते ॥ ९ ॥

एवं खलु विरक्तस्य स्वीयात्मविषयां मतिम् ।
श्रोतुं मन्तुं च विज्ञातुं सामर्थ्यमुपपद्यते ॥ १० ॥

एतस्मात्किल विज्ञानात् कामकर्मादिकारणम् ।
संसारबीजमज्ञानं अशेषेण निवर्तते ॥ ११ ॥

कर्मसहितविज्ञानादप्येतत् सिध्यतीति चेत् ।
तस्यान्यकारणत्वं हि प्रोक्तं वाजसनेयके ॥ १२ ॥

आत्मनोऽन्यस्य देवादिलोकस्य कारणं हि तत् ।
प्रजाकर्मतत्संयुक्तविद्याभिः किल साधनैः ॥ १३ ॥

अनात्मानित्यदेवादिलोकत्रयं हि लभ्यते ।
पारिव्राज्यविधाने च हेतुस्तस्मिन्प्रदर्शितः ॥ १४ ॥

किं प्रजया करिष्यामः इत्यादिवचनेन च ।
अनित्यं नेदमिष्टं नो येषामात्मा ह्यभीप्सितः ॥ १५ ॥

आत्मविषयकाविद्यानिवृत्तिव्यतिरेकतः ।
नान्यसाधननिष्पाद्यः आत्मा नित्यस्वभावतः ॥ १६ ॥

तस्माद्धेतोः प्रत्यगात्मब्रह्मविज्ञानपूर्वकः ।
सर्वैषणापरित्याग एव कार्यः इति स्फुटम् ॥ १७ ॥

उपात्तकारकानेकभेदज्ञानेन कर्मणा ।
निरस्तसर्वभेदस्य ज्ञानस्य सहभाविता ॥ १८ ॥

कथंचित् नोपपद्येत परस्परविरोधतः ।
ज्ञानस्य वस्तुतन्त्रत्वात् नास्ति पुरुषतन्त्रता ॥ १९ ॥

बाह्यसाधनसाध्येभ्यो विरक्तस्य हि सर्वतः ।
ब्रह्मात्मतत्त्वजिज्ञासा श्रुत्या चात्र प्रदर्श्यते ॥ २० ॥

आचार्यशिष्यसंवादरूपेण कथनं त्विदम् ।
विषयस्यातिसूक्ष्मत्वात् सुखेन प्रतिपत्तये ॥ २१ ॥

किंच केवलतर्केणागम्यत्वं दर्शितं भवेत् ।
आचार्यवान्पुमान्वेदेत्यादिवाक्यानुसारतः ॥ २२ ॥

ब्रह्मनिष्ठं गुरुं कश्चित् समुपेत्य यथाविधि ।
शरणं स्वात्मनोन्यत्र नैवापश्यन् स च क्वचित् ॥ २३ ॥

अचलमभयं नित्यं शिवमिच्छन् स पृच्छति ।

केनेषितं पतति प्रेषितं मनः
केन प्राणः प्रथमः प्रैति युक्तः ।
केनेषितां वाचमिमां वदन्ति
चक्षुःश्रोत्रं क उ देवो युनक्ति ॥

इष्टमत्रेषितं प्रोक्तं इट्प्रयोगस्तु छान्दसः ॥ २४ ॥

इषेर्धातोरिहाभीक्ष्ण्यगत्यर्थयोरसंभवात् ।
इच्छार्थोऽत्र ग्रहीतव्यः इच्छया प्रेषितं मनः ॥ २५ ॥

इषेरेव प्रपूर्वस्य नियोगार्थे पदं त्विदम् ।
मनो नियुज्यते केन गन्तुं स्वविषयान्प्रति ॥ २६ ॥

उक्ते प्रेषितमित्येव तच्छ्रोतुर्हृदये भवेत् ।
विशेषविषयाकाङ्क्षा प्रेषयिता स कीदृशः ॥ २७ ॥

प्रेषणं कीदृशं चेति इषिते तु विशेषणे ।
दत्ते तदुभयाकाङ्क्षा निवर्तेत न संशयः ॥ २८ ॥

इच्छामात्रेण कस्येति ह्यर्थो निर्धारितो यतः ।
यद्यर्थोऽयमभिप्रेतः 'केनेषितं' भवेदलम् ॥ २९ ॥

'प्रेषितं' इति च व्यर्थं, शब्दाधिक्यादपेक्षितम् ।
अर्थाधिक्यमिति न्यायात् इषितमिति योजनात् ॥ ३० ॥

इच्छया कर्मणा वाचा वेत्याशङ्का निवार्यते ।
इति चेन्न तथा, प्रश्नसामर्थ्यादेव वारणात् ॥ ३१ ॥

अन्यत् देहादिसङ्घातात् अनित्यात् कर्मकार्यतः ।
विरक्तो वस्तु कूटस्थं बोद्धुकामो हि पृच्छति ॥ ३२ ॥

इतरथा शरीरादेः इच्छावाक्कर्मभिर्भुवि ।
प्रेरकत्वं सुप्रसिद्धं इति प्रश्नो निरर्थकः ॥ ३३ ॥

अर्थः प्रेषितशब्दस्य नैवमपि प्रदर्शितः ।
इति चेत्, प्रेरकत्वं तत् यथाप्रसिद्धमेव वा ॥ ३४ ॥

सङ्घातव्यतिरिक्तस्य किं स्वतन्त्रस्य कस्यचित् ।
इति विशेषलाभार्थं 'इषितं' 'प्रेषितं' द्वयम् ॥ ३५ ॥

ननु मनः स्वतन्त्रं सत् विषयं प्रति गच्छति ।
यद्येवं तर्हि सर्वस्य न स्यादनिष्टचिन्तनम् ॥ ३६ ॥

जानन्नपि जनोऽनर्थं संकल्पयति, तन्मनः ।
कार्ये चाभ्यग्रदुःखेऽपि वार्यमाणं प्रवर्तते ॥ ३७ ॥

तस्मात् युक्तो ह्ययं प्रश्नः केनेषितमिति श्रुतः ।
केन प्राणो नियुक्तः सन् स्वकार्यं प्रति गच्छति ॥ ३८ ॥

सर्वेन्द्रियप्रवृत्तीनां तत्पूर्वकत्वहेतुना ।
प्राणः प्रथम इत्युक्तः वदन्ति शब्दलक्षणाम् ॥ ३९ ॥

केनेषितां इमां वाचं लौकिकाः प्रेरिता इव ।
चक्षुः श्रोत्रं च को देवः स्वे स्वे च विषये तथा ॥

युनक्ति योजयन्नास्ते नियुङ्क्ते द्योतनात्मकः ।
एवं पृष्टो गुरुः प्राह योग्याय पृच्छते तदा ॥ ४१ ॥

प्रेरको मन आदेः कः प्रेरणं च कथं भवेत् ।
इति पृच्छसि यत् तत्त्वं सावधानेन तच्छृणु ॥ ४२ ॥

श्रोत्रस्य श्रोत्रं मनसो मनो य
द्वाचो ह वाचꣳस उ प्राणस्य प्राणः ।
चक्षुषश्चक्षुरतिमुच्य धीराः
प्रेत्यास्माल्लोकादमृता भवन्ति ॥

श्रोत्रं शृणोत्यनेनेति शब्दस्य श्रवणं प्रति ।
शब्दाभिव्यञ्जकं यत् तत् करणं श्रोत्रमिन्द्रियम् ॥ ४३ ॥

यो हि देवः त्वया पृष्टः श्रोत्रस्य श्रोत्रमेव सः ।
श्रोत्रस्य श्रोत्रमित्यादि नानुरूपमिदं वचः ॥ ४४ ॥

असौ एवं विशिष्टः सन् श्रोत्रादीनां नियोजकः ।
इति चेदनुरूपं स्यात् श्रोत्रादीनां भवेद् यदि ॥ ४५ ॥

व्यापारव्यतिरेकेण पृथग्व्यापारवानयम् ।
तन्नियोक्तेति गम्येत दात्रादीनां प्रयोक्तृवत् ॥ ४६ ॥

श्रोत्रादीनां नियोक्ता तु न तद्वदवगम्यते ।
तद्व्यापारमुखेनैव तन्नियोक्ताऽवगम्यते ॥ ४७ ॥

संहतानां परार्थत्वात् अयं तेषां भवेत्पृथक् ।
श्रोत्रस्य श्रोत्रमित्यादि ह्यनुरूपं ततो वचः ॥ ४८ ॥

अत्र पुनः पदार्थः कः? श्रोत्रान्तरेण तस्य हि ।
नैव प्रयोजनं दृष्टं दीपस्येवान्यदीपतः ॥ ४९ ॥

नैव दोषो यतः श्रोत्रं शब्दस्य व्यञ्जकं खलु ।
एतद् व्यञ्जनसामर्थ्यं आत्मज्योतिष्यसंहते ॥ ५० ॥

भवेत् सर्वान्तरे नित्ये सत्येव किल नासति ।
श्रोत्रस्य श्रोत्रमित्यादि ततोऽस्यैवोपपद्यते ॥ ५१ ॥

श्रोत्राद्येव जनैः सर्वैः चेतनत्वेन भाव्यते ।
तन्निराकरणार्थाय श्रोत्रश्रोत्रमितीर्यते ॥ ५२ ॥

अस्ति किमपि कूटस्थं सर्वान्तरतमं ह्यजम् ।
विद्वद्बुद्ध्येकगम्यं च जरामरणवर्जितम् ॥ ५३ ॥

श्रोत्रादेरपि श्रोत्रादि तेषां सामर्थ्यकारणम् ।
इति प्रत्युत्तरं युक्तं शब्दार्थश्चोपपद्यते ॥ ५४ ॥

चैतन्यज्योतिषो दीप्तिं विनाऽन्तःकरणं मनः ।
संकल्पाध्यवसायादिसमर्थं न भवेत् यतः ॥ ५५ ॥

मनसोऽपि मनो ह्येषः बुद्धिश्चात्रोपलक्षिता ।
वाचो ह वाचमित्यत्र द्वितीया प्रथमाथले ॥ ५६ ॥

प्रयुक्तेत्यवगन्तव्यं स उ प्राण इति श्रुतेः ।
शब्दद्वयानुसारेण प्रथमैवोचिता भवेत् ॥ ५७ ॥

बहूनामनुरोधस्य न्याय्यत्वादिति हेतुना ।
पृष्टं च वस्तु निर्देष्टुं प्रथमैव ह्युपपद्यते ॥ ५८ ॥

प्राणाख्यवृत्तिरूपस्य प्राणभूतो भवत्ययम् ।
तस्य प्राणनसामर्थ्यं तदायत्तं भवेदिति ॥ ५९ ॥

आत्मना हि वियुक्तस्य प्राणनं नोपपद्यते ।
श्रोत्रादीन्द्रियप्रस्तावे न घ्राणग्रहणं कुतः ॥ ६० ॥

प्राणस्य ग्रहणादेव घ्राणस्य ग्रहणं कृतम् ।
सर्वेन्द्रियकलापस्य यदधीनं प्रवर्तनम् ॥ ६१ ॥

तद् ब्रह्मेत्यस्य तात्पर्यं सर्वप्रकरणस्य च ।
रूपग्रहणसामर्थ्यं रूपद्योतकचक्षुषः ॥ ६२ ॥

चैतन्याधिष्ठितस्यैवेत्ययं चक्षुश्च चक्षुषः ।
प्रष्टुरर्थस्य पृष्टस्य ज्ञातुमिष्टत्वनिश्चयात् ॥ ६३ ॥

श्रोत्रादेश्च यत् श्रोत्रादिलक्षणं ब्रह्म कीर्तितम् ।
यथोक्तं ब्रह्म तद् ज्ञात्वेत्यत्राऽध्याहियते पदम् ॥ ६४ ॥

अतिमुच्य परित्यज्य श्रोत्रादौ आत्मभावनाम् ।
कृत्वा च तदुपाधिस्सन् तदात्मनैव जायते ॥ ६५ ॥

म्रियते संसरत्येषः श्रोत्रश्रोत्रादिलक्षणम् ।
ब्रह्मात्मेति विदित्वा तु श्रोत्रादिष्वखिलेष्वपि ॥ ६६ ॥

आत्मभावं परित्यज्य धीराः धीमन्त एव ये ।
विना विशिष्टधीमत्त्वं आत्मभावमनात्मसु ॥ ६७ ॥

नहि शक्यं परित्यक्तुं ततो धीरा इति श्रुतम् ।
इतः प्रेत्येति व्यावृत्य पुत्रमित्रादिबन्धुषु ॥ ६८ ॥

सर्वदा ममताहंता संव्यवहारलक्षणात् ।
त्यक्तसर्वैषणा भूत्वा ह्यमृतास्ते भवन्ति च ॥ ६९ ॥

अतिमुच्येत्यनेनैवैषणात्यागस्य सिद्धितः ।
अपेत्यास्मात् शरीराद्वा प्रेत्य मृत्वेति संभवेत् ॥ ७० ॥

न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः ।
न विद्मो न विजानीमो यथैतदनुशिष्यात् ॥

श्रोत्रादेश्च यतो ब्रह्म श्रोत्राद्यात्मस्वरूपकम् ।
तस्मिन् गच्छति नो चक्षुः स्वात्मनि गत्यसंभवात् ॥

वाचा चोच्चार्यमाणः सन् शब्दः स्वार्थं प्रकाशयेत ।
यदा तदभिधेयं वाक् गच्छतीत्युच्यते तदा ॥ ७२ ॥

ब्रह्म तस्य च शब्दस्य तस्य निर्वर्तकस्य च ।
करणस्य यतो ह्यात्मा तत्र वाक् नैव गच्छति ॥ ७३ ॥

दग्धा प्रकाशकोऽप्यग्निः नात्मानं दहति क्वचित् ।
नापि प्रकाशयत्येवं मनोऽन्यविषयस्य हि ॥ ७४ ॥

संकल्पाध्यवसायादिकर्तृ भवेत् न चात्मनः ।
सङ्कल्पयति नात्मानं अध्यवस्यति वा मनः ॥ ७५ ॥

ब्रह्मैव मनसोऽप्यात्मा तस्मात् तत्र न गच्छति ।
इन्द्रियैः मनसा चैव वस्तुज्ञानं प्रजायते ॥ ७६ ॥

तेषामगोचरं यस्मात् न विद्मो ब्रह्म कीदृशम् ।
अतश्च न विजानीमः शिष्यायोपदिशेत् यथा ॥ ७७ ॥

अन्यं येन प्रकारेण तद् ब्रह्म बोधयेदिति ।
करणगोचरो जातिगुणकर्मविशेषणैः ॥ ७८ ॥

उपदेष्टुं हि शक्येत परस्मै च यथातथम् ।
ब्रह्म नैव तु जात्यादिविशेषणविशेषितम् ॥ ७९ ॥

तत् शिष्यानुपदेशेन प्रत्याययितुमक्षमम् ।
तस्मात् तदुपदेशे च तदर्थग्रहणे तथा ॥ ८० ॥

अतीव यत्नः कर्तव्यः इति दर्शयति श्रुतिः ।

अन्यदेव तद्विदितादथो अविदितादधि ।
इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे ॥

न विद्मो न विजानीमः इति वाक्येन सर्वशः ॥ ८१ ॥

उपदेशप्रकारस्य प्रत्याख्याने कृते सति ।
अन्यदेवेति वाक्येन त्वपवादोऽयमुच्यते ॥ ८२ ॥

प्रत्यक्षादिप्रमाणैः तत्त्व न प्रत्याययितुं क्षमम् ।
आगमेन तु शक्येतेत्युपदेशार्थमागमम् । ८३ ॥

प्राह 'शुश्रुम' वाक्येन श्रोत्रश्रोत्रादिलक्षणम् ।
तेषामविषयश्चेति यदुक्तं प्रकृतं च तत् ॥ ८४ ॥

विदितादन्यदेव स्यात्, विदितं नाम यत् भवेत् ।
विदिक्रियाकर्मभूतं, यत्किञ्चित् कस्यचित् क्वचित् ॥

विदितं स्याद्धि तत्सर्वं व्याकृतं 'विदितं' श्रुतम् ।
तस्मादन्यदिदं ब्रह्म पृथगेव सदा भवेत् ॥ ८६ ॥

अविदितं अविज्ञातं तर्हीति चेत् तदोच्यते ।
अविदितादधि ब्रह्माव्याकृतादपि चोपरि ॥ ८७ ॥

अन्यत् व्याकृतबीजाच्चाविद्यालक्षणतः पृथक् ।
अधिशब्दो ह्युपर्यर्थे लक्षणयाऽन्यदर्थकः ॥ ८८ ॥

समालक्ष्य ततः प्राह "नेदं ते यदुपासते"।
चैतन्यमात्रसत्ताकं वाचा वक्तुं न सांप्रतम् ॥ १०६ ॥

जिह्वामूलादिदेशेषु विषक्तमग्निदैवतम् ।
वर्णानां व्यञ्जकं यत् तत् करणं वागिति स्मृतम् ॥

पदत्वेन परिच्छिन्नवाचा तत न प्रकाश्यते ।
चैतन्यज्योतिषा येन ब्रह्मणाऽर्थे विवक्षिते ॥ १०८ ॥

वाक् तु सकरणा सम्यक् अभ्युद्यते प्रयुज्यते ।
वक्तुर्व्यक्तिर्हि नित्या सा चैतन्यज्योतिरात्मिका ।१०९।

तदेवात्मस्वरूपं त्वं भूमाख्यं ब्रह्म निश्चिनु ।
बृहत्त्वादुच्यते ब्रह्म 'वाचो वाक्" एवमादायः ॥

ब्रह्मण्यव्यवहार्येऽपि वागाद्युपाधिभिस्तु यैः ।
व्यवहाराः प्रवर्तन्ते तान् समस्तान् व्युदस्य च ॥१११॥

आत्मानमेव ब्रह्मेति विजानीहि न चेतरत् ।
इदंशब्देन निर्देश्यं यदनात्मेश्वरादिकम् ॥ ११२ ॥

उपाधिभेदभिन्नं च ध्यायन्त्युपासते जनाः ।
तत् न ब्रह्मेति जानीहि, नियमार्थं पुनर्वचः ॥ ११३ ॥

तदेव ब्रह्म त्वं विद्धीत्युक्तेनैव ह्यनात्मनः ।
अब्रह्मत्वं भवत्युक्तं, अन्यत ब्रह्मभावनाम् ॥ ११४ ॥

अथवा परिसंख्यातुं इदं स्यात् वचनं पुनः ।

यन्मनसा न मनुते येनाहुर्मनो मतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥

मनो मनुतेऽनेनेति तदन्तःकरणं भवेत् ॥ ११५ ॥

सर्वविषयव्यापित्वात् साधारणमिदं खलु ।
करणानां च सर्वेषां मनः कामादिवृत्तिमत् ॥ ११६ ॥

न तेन मनसा लोको मनसोऽप्यवभासकम् ।
संकल्पयति चैतन्यज्योतिः न निश्चिनोति वा ॥ ११७ ॥

मनसो भासकत्वेन तन्नियन्तृ भवेद्यतः ।
सर्वस्य प्रत्यगेवेति स्वात्मनि न प्रवर्तते ॥ ११८ ॥

अन्तःस्थितेन चैतन्यज्योतिषा भासितस्य च ।
तस्य मननसामर्थ्यं मनस्तेन सद्वृत्तिकम् ॥ ११९ ॥

आहुः ब्रह्मविदो व्याप्तं ब्रह्मणा विषयीकृतम् ।
प्रत्यक्चेतयितारं तं आत्मानं मनसोऽप्यतः ॥ १२० ॥

ब्रह्मेति त्वं विजानीहि नेदमित्यादि पूर्ववत् ।

यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥

अन्तःकरणवृत्त्या च युक्तेन चक्षुषा न यत् ॥ १२१ ॥

विषयीकुरुते लोकः चक्षुर्वृत्तीस्तु पश्यति ।
चैतन्यज्योतिषा येन तदेवेत्यादि पूर्ववत् ॥ १२२ ॥

यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदꣳश्रुतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥

श्रोत्रेणाकाशकार्येण मनोवृत्तियुतेन यत् ।
दिग्देवताधिष्ठितेन न शृणोति कदाचन ॥ १२३ ॥

विषयीकुरुते लोकः, श्रोत्रं तु विषयीकृतम् ।
चैतन्यज्योतिषा येन तदेवेत्यादि पूर्ववत् ॥ १२४ ॥

यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥

घ्राणोऽत्र प्राणशब्देन ग्राह्यो न प्राणवृत्तिकः ।
यत् नासिकापुटस्यान्तःस्थितेन पार्थिवेन च ॥ १२५ ॥

घ्राणेनापि मनःप्राणवृत्तिभ्यां सहितेन च ।
प्राणिति गन्धवत् नैव विषयीकुरुते जगत् ॥ १२६ ॥

चैतन्यज्योतिषा येन भास्यत्वेन प्रणीयते ।
स्वविषयं प्रति प्राणः तदेवेत्यादि पूर्ववत् ॥ १२७ ॥

इति केनोपनिषत्पदभाष्यसंग्रहे प्रथमः खण्डः ॥

द्वितीयः खण्डः ।

यदि मन्यसे सुवेदेति दभ्रमेवापि नूनं
त्वं वेत्थ ब्रह्मणो रूपं, यदस्य त्वं यदस्य
देवेष्वथ नु मीमांस्यमेव ते, मन्ये विदितम् ॥१॥

हेयोपादेयभिन्नः त्वं आत्मा ब्रह्मेति बोधितः ।
शिष्योऽहमेव ब्रह्मेति सुष्ठु तत् ब्रह्म वेद्म्यहम् ॥ १ ॥

इत्येवं तु न गृह्णीयात इत्याशयात् तदा गुरुः ।
शिष्यबुद्धेश्चालनार्थं यदीत्यादि ब्रवीति सः ॥ २ ॥

नन्विष्टैव 'सुवेदाहं' इति बुद्धिः सुनिश्चिता ।
सत्यं, न तु 'सुवेदाहं,' यद्वस्तु विषयीभवेत् ॥ ३ ॥

तत् सुष्ठु वेदितुं शक्यं, अग्नेर्दग्धुरिवेन्धनम् ।
दाह्यं दग्धुं, तथा दग्धुं नाग्नेः स्वरूपमेव तु ॥ ४ ॥

ब्रह्म वेदितुरात्मेति सर्ववेदान्तनिश्चयः ।
इह च बहुशः पूर्वं तदेव प्रतिपादितम् ॥ ५ ॥

यद्वाचेति च वाक्येन विशेषेणावधारितम् ।
ब्रह्मवित्संप्रदायश्च प्रोक्तोऽ'न्यदेव' वाक्यतः ॥ ६ ॥

यच्च पूर्वमुपन्यस्तं तदुपसंहरिष्यति ।
तस्माद्युक्तं च शिष्यस्य सुवेदेति दृढां मतिम् ॥ ७ ॥

निराकर्तुं, ततः प्राह यदीति वचनं गुरुः ।
न खलु वेदिता शक्यो वेदितुं वेदितुं क्वचित् ॥ ८ ॥

अग्निर्दग्धु यथा दग्धुः अग्नेरेव न शक्यते ।
न चास्ति ब्रह्मणो भिन्नो वेदिता यस्य संभवेत् ॥ ९ ॥

ब्रह्मणोऽन्यस्य वेद्यत्वं ज्ञाताऽन्यो हि निषिध्यते ।
तस्मात् ब्रह्म सुवेदेति प्रतिपत्तिः मृषैव सा ॥ १० ॥

ब्रह्म च सुष्ठु वेदाहं इति त्वं मन्यसे यदि ।
क्षीणदोषः सुमेधाश्च दुर्विज्ञेयं यथाश्रुतम् ॥ ११ ॥

कश्चिदेव हि तत् ब्रह्म कदाचित् प्रतिपद्यते ।
कश्चिन्नेतीति साशङ्कं यदीति प्रोक्तवान् गुरुः ॥ १२ ॥

प्राजापत्यः पण्डितोऽपि विरोचनोऽसुराधिपः ।
स्वभावसिद्धदोषेण विपरीतमयुक्तिकम् ॥ १३ ॥

अर्थं शरीरमात्मेति प्रतिपन्नोऽभवत् किल ।
तथा च देवराडिन्द्रो ब्रह्मणो ह्यसकृत् श्रुतम् ॥ १४ ॥

अप्रतिपद्यमानः सन् दोषक्षयमपेक्ष्य च ।
चतुर्थ एव पर्याये तत् ब्रह्म प्रतिपन्नवान् ॥ १५ ॥

प्रथममेव यत्प्रोक्तं इत्यपि श्रूयते श्रुतौ ।
एकस्माच्च गुरोरेव बहूनां शृण्वतामपि ॥ १६ ॥

कश्चिदेव हि मेधावी यथावत् प्रतिपद्यते ।
अयथावत् तथा कश्चित् विपरीतं तथेतरः ॥ १७ ॥

न प्रतिपद्यते कश्चित् इति लोकेऽपि दृश्यते ।
सत्येवं किमु वक्तव्यं आत्मतत्त्वे ह्यतीन्द्रिये ॥ १८ ॥

अत्र विप्रतिपन्ना हि सदसद्वादिनोऽखिलाः ।
तस्माद्विदितं ब्रह्मेति यद्यप्युक्तं सुनिश्चितम् ॥ १९ ॥

विषमप्रतिपत्तिः स्यात् युक्तमेव भवेत् ततः ।
यदि मन्यस इत्यादि साशङ्कं वचनं गुरोः ॥ २० ॥

दभ्रं त्वं ब्रह्मणो रूपं जानीषे ह्यल्पमेव तत् ।
किमनेकानि रूपाणि महान्ति चार्भकाणि च ॥ २१ ॥

भवन्ति ब्रह्मणस्तर्हि ? बाढं, तद्ब्रह्मणोऽपि च ।
अनेकानि हि रूपाणि नामरूपाद्युपाधिभिः ॥ २२ ॥

कृतानि तु भवन्त्येव यद्यप्यरूपवत् स्वतः ।
स्वतस्त्वशब्दमित्यादिवाक्यात् शब्दादिभिः सह ॥ २३ ॥

रूपाणि प्रतिषिध्यन्ते, तस्मात् रूपाणि न स्वतः ।
ननु येनैव रूपेण रूप्यते यत्तदेव हि ॥ २४ ॥४१ ॥

तत्स्वरूपमिति न्यायात् ब्रह्मणोऽपि निरूपणम् ।
कृतं येन विशेषेण तत्स्वरूपं हि तत् भवेत् ॥ २५ ॥

पृथिव्यादिकभूतानां तेषामन्यतमस्य वा ।
तेभ्यः परिणतानां वा चैतन्यं नैव लक्षणम् ॥ २६ ॥

श्रोत्रादीन्द्रियजातस्य तथाऽन्तःकरणस्य वा ।
चैतन्यं न भवेत् धर्मः तेन ब्रह्म तु रूप्यते ॥ २७ ॥

विज्ञानं ब्रह्मणो रूपं निर्दिष्टं च श्रुतिष्वपि ।
तस्मात् तदेव तद्रूपं इति प्राप्ते तदोच्यते ॥ २८ ॥

अन्तःकरणदेहादिद्वारेणैव हि नान्यथा ।
विज्ञानप्रमुखैः शब्दैः निर्दिश्यते नतु स्वतः ॥ २९ ॥

देहादिवृद्धिसंकोचच्छेदादिषु लयेषु च ।
तेषामेवानुकारित्वात् निर्देशः क्रियते तथा ॥ ३० ॥

स्वतस्तु तदविज्ञातं इति भविष्यति स्थितम् ।
यथाध्यात्मपरिच्छिन्नं रूपमल्पं भवेत् तथा ॥ ३१ ॥

अधिदैवपरिच्छिन्नं रूपमप्यल्पमेव हि ।
देवेषु ब्रह्मणो रूपं यत् वेत्थ दभ्रमेव तत् ॥ ३२ ॥

दध्यात्मं भवेद्रूपं यच्च देवेषु वा भवेत् ।
परिच्छिन्नत्वात् दभ्रत्वात् न निवर्तते ॥ ३३ ॥

यत् विध्वस्ताखिलोपाधिविशेषं शान्तमद्वयम् ।
अनन्तमेकं भूमाख्यं नित्यं ब्रह्म कदाऽपि न ॥ ३४ ॥

सुवेद्यमित्यभिप्रायः यत एवं ततस्तव ।
अद्यापि ब्रह्म मीमांस्यं विचार्यमेव तव पुनः ॥ ३५ ॥

तथोक्तः शिष्य एकान्ते उपविष्टः समाहितः ।
आचार्येण यथा प्रोक्तं आगमार्थं विचार्य च ॥ ३६ ॥

तर्कतश्चापि निर्धार्य कृत्वा चानुभवं च तम् ।
आचार्यमुपसंगम्य तमब्रवीदिदं वचः ॥ ३७ ॥

इदानीमेव मन्येऽहं ब्रह्म तव विदितं मया ।

नाहं मन्ये सुवेदेति नो न वेदेति वेद च ।
यो नस्तद्वेद तद्वेद नो न वेदेति वेद च ॥ २ ॥

सुष्ठ्वहं ब्रह्म वेदेति नाहं मन्ये कदाचन ॥ ३८ ॥

"त्वया न विदितं तर्हि ? न वेदेति न वच्म्यहम् ।
वेद चेति चशब्देन न वेदेत्यपि गृह्यताम् ॥ ३९ ॥

न मन्यसे सुवेदेति चेत् वेद चेति तत् कथम् ।
वेदैवेति मन्यसे चेत् न सुवेदेति वा कथम् ॥ ४० ॥

यद्वस्तु ज्ञायते येन नतु विज्ञायते कथम् ।
तदेव वस्तु तेनैव, संशयं च विपर्ययम् ॥ ४१ ॥

हित्वा, विप्रतिषिद्धं हि तादृशं वचनं भवेत् ।
न च संशयितत्वेन ज्ञेयं विपर्ययेण वा ॥ ४२ ॥

ब्रह्मेति नियन्तुं शक्यं संशयश्च विपर्ययः ।
सर्वत्रानर्थकृत्त्वेन प्रसिद्धौ भवतः किल ॥ ४३ ॥

एवं विचाल्यमानोऽपि बहुशो गुरुणा तदा ।
न विचचाल शिष्योऽयं संप्रदायबलादपि ॥ ४४ ॥

सुयुक्त्यनुभवाच्चापि दर्शयन् दृढनिश्चयम् ।
आत्मनो ब्रह्मविद्यायां जगर्ज च ब्रुवन्निदम् ॥ ४५ ॥

"यः कश्चित् वाऽपि नोऽस्माकं मध्ये सब्रह्मचारिणाम् ।
मदुक्तं तत्त्वतो वेद, स तत् ब्रह्मैव वेद हि ॥ ४६ ॥

यदुक्तं अन्यदेवेति ब्रह्म वस्तु तदेव सः ।
उपपत्त्यनुभूतिभ्यां संयोज्याह सुनिश्चितम् ॥ ४७ ॥

गुरुबुद्ध्यनुवादार्थं मन्दधीवारणाय च ।
यो नस्तद्वेद तद्वेदेत्युपपन्नं हि गर्जितम् ॥ ४८ ॥

यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अविज्ञातं विजानतां विज्ञातं अविजानताम् ॥

शिष्याचार्ययोः संवादात् प्रतिनिवृत्य च श्रुतिः ।
स्वयं समस्तसंवादनिर्वृत्तमर्थमेव हि ॥ ४९ ॥

बोधयत्यत्र यस्येति, यस्य ब्रह्मविदोऽमतम् ।
अविदितं अविज्ञातं इति मतं हि निश्चयः ॥ ५० ॥

तस्य सम्यक् मतं ज्ञातं ब्रह्म, यस्य पुनर्मतम् ।
विदितं हि मया ब्रह्मेति निश्चयो, न वेद सः ॥ ५१ ॥

न स ब्रह्म विजानाति, भूयः श्रुत्यैव च स्वयम् ।
विद्वदविदुषोः पक्षौ यथोक्तौ अवधारितौ ॥ ५२ ॥

अविज्ञातं अमतं तत् विदितं न विजानताम् ।
सम्यग् ज्ञानवतां चैतत्, विज्ञातं अविजानताम् । ५३ ॥

असम्यग्दर्शिनां त्वेतत् इन्द्रियादिष्वनात्मसु ।
आत्मदर्शनयुक्तानां, येऽत्यन्तमूढबुद्धयः ॥ ५४ ॥

तेषां विज्ञातमस्माभिः ब्रह्मेति न भवेत् मतिः ।
देहेन्द्रिय मनोबुद्ध्याद्युपाधिष्वात्मदर्शिनाम् ॥ ५५ ॥

ब्रह्मोपाधिविवेकस्याभावात् देहाद्युपाधिषु ।
ज्ञातेषु ब्रह्म विदितं इति भ्रान्तिश्च संगता ॥ ५६ ॥

इत्यतः पूर्वपक्षेऽस्मिन् असम्यग्दर्शनं भवेत् ।
हेत्वर्थो वोत्तरार्धः स्यात् अविज्ञातमिति श्रुतः ॥ ५७ ॥

प्रतिबोधविदितं मतं अमृतत्वं हि विन्दते ।
आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम् ॥

यद्यत्यन्तं अविज्ञातं ब्रह्म ब्रह्मविदां तदा ।
अज्ञानां चाविशेषः स्यात् " विज्ञातं अविजानताम् ॥

परस्परविरुद्धं च, सत्येवं वेद्यते कथम् ।
इत्येवमर्थमत्राह वाक्यमेतत् स्वयं श्रुतिः ॥ ५९ ॥

बोधं बोधं च प्रत्येतत् विदितं भवति ध्रुवम् ।
बोधशब्देन बौद्धा हि प्रोच्यन्ते प्रत्यया इह ॥ ६० ॥

यस्यैव प्रत्ययाः सर्वे च विषयीभवन्ति हि ।
स आत्मा सकलान् बोधान् निःशेषं प्रतिबुध्यते ॥ ६१ ॥

स प्रत्ययसाक्षी सन् चिच्छक्त्येकस्वरूपकः ।
लक्ष्यते प्रत्ययैरेव स्वप्रत्ययेष्वभेदतः ॥ ६२ ॥

नान्यच्च विद्यते द्वारं विज्ञानायान्तरात्मनः ।
सर्वेषां प्रत्ययानां च प्रत्यगात्मतया यदा ॥ ६३ ॥

विदितं भवति ब्रह्म सम्यक् दृष्टं मतं तदा ।
सर्वप्रत्ययसाक्षित्वे जननापायहीनता ॥ ६४ ॥

दृशिमात्रस्वरूपत्वं नित्यशुद्धस्वरूपता ।
एकत्वं सर्वभूतेषु चात्मत्वं निर्विशेषता ॥ ६५ ॥

सर्वं सिद्धं यथा व्योम्नः घटाचलगुहादिषु ।
एवमागमवाक्यार्थः विशुद्ध उपसंहृतः ॥ ६६ ॥

बोधरूपक्रियाकर्तैवात्मा तल्लक्षणेन च ।
तत्कर्तारं विजानीयात् इति व्याख्यायते यदि ॥ ६७ ॥

यथा वृक्षस्य शाखानां वायुश्चालयिता भवेत् ।
बोधशक्तियुतस्त्वात्मा द्रव्यं एव भवेत् तदा ॥ ६८ ॥

न तु बोधस्वरूपः स्यात् बोधस्तु जायते तथा ।
नश्यति च, यदा बोधोऽस्ति बोधक्रियया तदा ॥ ६९ ॥

सविशेषो भवेदात्मा, यदा बोधो विनश्यति ।
नष्टबोधो द्रव्यमात्रं निर्विशेषो भवेत् तदा ॥ ७० ॥

एवं सावयवोऽनित्यश्चाशुद्धो विक्रियात्मकः ।
इति दोषा न शक्यन्ते परिहर्तुं कदाचन ॥ ७१ ॥

काणादानां मते चात्ममनःसंयोगजो यतः ।
समवैत्यात्मना बोधः आत्मा न विक्रियात्मकः ॥ ७२ ॥

अत आत्मनि बोद्धृत्वं जायतेऽनेन हेतुना ।
द्रव्यमात्रो ह्ययं गुणसमवायी यथा घटः ॥ ७३ ॥

अस्मिन् पक्षेऽपि च ब्रह्म द्रव्यमात्रमितीरणात् ।
ज्ञानमानन्दमित्याद्याः श्रुतयो बाधिताः किल ॥ ७४ ॥

तस्यावयवहीनत्वात् प्रदेशस्याप्यभावतः ।
मनसा नित्यसंयोगात् स्मृत्युत्पत्तिविनाशयोः ॥ ७५ ॥

नियमानुपपत्तिश्च परिहर्तुं न पार्यते ।
संसर्गधर्मिभावश्च श्रुतिन्यायैः विरुध्यते ॥ ७६ ॥

गुणी गुणवता चैव संसृज्यते हि नान्यतः ।
निर्गुणं निर्विशेषं च ब्रह्म सर्वविलक्षणम् ॥ ७७ ॥

अतुल्यजातियुक्तेन संसृज्येत न केनचित् ।
तस्मादात्मा भवेत् ज्योतिः नित्यज्ञानस्वरूपतः ॥ ७८ ॥

समस्तबोधबोद्धृत्वे सति सिद्ध्यति नान्यथा ।
यथाव्याख्यात एवार्थः न्याय्यस्तस्मात् न चेतरः ॥७९॥

स्वेन संवेद्यता यत्र वर्ण्यते तत्र कल्पितम् ।
बुद्ध्युपाधिस्वरूपत्वं आदाय वर्ण्यते तथा ॥ ८० ॥

सर्वोपाधिविहीनस्य कथं स्ववेद्यता भवेत् ।
परसंवेद्यता वाऽपि संभवेत् न कदाचन ॥ ८१ ॥

संवेदनस्वरूपत्वात् संवेदनान्तरस्य च ।
अपेक्षा न, न वा दीपो दीपान्तरमपेक्षते ॥ ८२ ॥

प्रकाशस्य प्रकाशान्तरस्यापेक्षा न विद्यते ।
बौद्धपक्षे स्वसंवेद्यतायां तु क्षणनाशिता ॥ ८३ ॥

नैरात्म्यं च प्रसज्येत बाध्येरन् श्रुतयोऽपि च ।
प्रतिबोधेतिशब्देन सुप्तस्य प्रतिबोधनम् । ८४ ॥

निर्निमित्तं यथा तद्वत् इति केचित् वदन्ति हि ।
सकृद्विज्ञानमित्यन्ये प्रतिबोधः स एव हि ॥ ८५ ॥

सनिमित्तोऽनिमित्तो वा सकृद्वाऽसकृदेव वा ।
अमृतत्वं स मोक्षाख्यं स्वात्मन्येव सुसंस्थितिम् ॥ ८६ ॥

विन्दते लभते यस्मात् यथोक्तात् प्रतिबोधतः ।
प्रत्यग्विषयताबोधोऽमृतत्वसाधनं मतम् ॥ ८७ ॥

आत्मनो न ह्यनात्मत्वं अमृतत्वं भवेत् क्वचित् ।
आत्मत्वादमृतत्वं च निर्निमित्तं किलात्मनः ॥ ८८ ॥

तदेव खलु मर्त्यत्वं आत्मनो यदविद्यया ।
अनात्मत्वेन विज्ञानं, आत्मनो विद्यया कथम् ॥ ८९ ॥

अमृतत्वं च लभ्येत? विन्दते लभते बलम् ।
आत्मना स्वेन रूपेण वीर्यं खलु समर्थताम् ॥ ९० ॥

धनमन्त्रतपोयोगसहायौषधिभिः कृतम् ।
वीर्यं मृत्युं न शक्नोत्यभिभवितुं कदाचन ॥ ९१ ॥

अनित्यवस्तुकार्यत्वात् किं त्वात्मविद्यया कृतम् ।
आत्मनैव हि विन्देत नैवान्येनेति हेतुना ॥ ९२ ॥

अनन्यसाधनत्वाच्च तदात्मविद्यया कृतम् ।
वीर्यं शक्नोति तन्मृत्युं किलाभिभवितुं ध्रुवम् ॥ ९३ ॥

आत्मविद्याकृतं वीर्यं आत्मना विन्दते यतः ।
आत्मविषयया तस्मात् विद्यया विन्दतेऽमृतम् ॥ ९४ ॥

समर्थोऽयमतो हेतुः "अमृतत्वं हि विन्दते" ।

इह चेदवेदीदथ सत्यमस्ति
न चेदिहावेदीन्महती विनष्टिः ।
भूतेषु भूतेषु विचित्य धीराः
प्रेत्यास्माल्लोकादमृता भवन्ति ॥ ५ ॥

कष्टा देवमनुष्यादितिर्यक्प्रेतमुखेषु हि ॥ ९५ ॥

प्राणिजातेषु संसारदुःखपूर्णेषु जन्मना ।
जरामरणरोगादिप्राप्तिः तत्त्वाप्रबोधतः ॥ ९६ ॥

अत एवेह मानुष्ये सत्यधिकारवान्नरः ।
उक्तलक्षणमात्मानं यदि विदितवान् भवेत् ॥ ९७ ॥

यथोक्तेन प्रकारेण तदा सत्यं हि विद्यते ।
अविनाशोऽर्थवत्ता वा सद्भावः परमार्थता ॥ ९८ ॥

इह जन्मनि मानुष्ये प्राप्ते चाधिकृतो न चेत् ।
अवेदीदात्मनस्तत्त्वं, नात्मानं वेत्ति चेत्, तदा ॥ ९९ ॥

विनष्टिर्महती दीर्घा चानन्ता स्यात् विनाशनम् ।
जरामरणजन्मादिबन्धाविच्छेदलक्षणा ॥ १०० ॥

संसारगतिरेव स्यात् दुःखरूपा निरन्तरा ।
तस्मात् भूतेषु भूतेषु स्थावरेषु चरेषु च ॥ १०१ ॥

गुणदोषौ विजानन्तो ब्रह्मैकं तत्त्वमात्मनः ।
धीमन्तो ब्राह्मणा धीराः साक्षात्कृत्य विचित्य हि ॥

एतस्मात् प्रेत्य व्यावृत्य ममाहंभावलक्षणात् ।
अविद्यारूपिणो लोकात् सर्वस्मादुपरम्य च ॥ १०३ ॥

सर्वात्मैकत्वमापन्नाः सन्तोऽमृता भवन्ति ते ।
ब्रह्मैव ते भवन्तीति तात्पर्यं हि श्रुतेरिह । १०४ ॥

इति केनोपनिषत्पदभाष्यसंग्रहे द्वितीयः खण्डः ॥

तृतीयः खण्डः ।

ब्रह्म ह देवेभ्यो विजिग्ये तस्य ह ब्रह्मणो विजये देवा अमहीयन्त, त ऐक्षन्त अस्माकमेवायं विजयोऽस्माकमेवायं महिमेति ॥ १ ॥

यदस्ति तद्धि विज्ञातं प्रमाणैः यस्तु नास्ति तत् ।
अविज्ञातं असत् दृष्टं अत्यन्तं शशशृङ्गवत् ॥ १ ॥

अज्ञातत्वात् तथा ब्रह्माप्यसदेवेति कस्यचित् ।
"अविज्ञातं विजानतां विज्ञातमविजानताम्" ॥ २ ॥

इत्यादिश्रवणात् काऽपि प्रतिपत्तिः भवेदिति ।
व्यामोहो मन्दबुद्धीनां तथा माभूदिति श्रुतौ ॥ ३ ॥

आख्यायिका समारब्धा, प्रोक्तं ब्रह्म तदेव हि ।
शास्तृ सर्वप्रकारेण, देवानामपि तत्परः ॥ ४ ॥

देवः, दुःखेन विज्ञेय ईश्वराणामपीश्वरः ।
जये हेतुश्च देवानां असुराणां पराजये ॥ ५ ॥

कथं तत् ब्रह्म नास्तीति चैतदर्थप्रकाशने ।
अनुकूलानि दृश्यन्ते ह्युत्तराणि वचांसि च ॥ ६ ॥

अथवा ब्रह्मविद्यायाः स्तुतये सा प्रकीर्तिता ।
ब्रह्मणः खलु विज्ञानात् देवा अग्न्यादयोऽपि च ॥ ७ ॥

देवानां श्रेष्ठतां जग्मुः, इन्द्रोऽप्यतितरां ततः ।
अथवा न सुविज्ञेयं ब्रह्मेत्येतत् प्रदर्श्यते ॥ ८ ॥

यदेतेऽग्न्यादयो देवाः अतितेजस्विनोऽपि च ।
क्लेशेनैव विदुश्चेन्द्रो देवानामीश्वरोऽपि सन् ॥ ९ ॥

सर्वं वा वक्ष्यमाणोऽनिषिद्धिधिपरं भवेत् ।
विजयादौ च देवनां अभिमानो मृषा यथा ॥ १० ॥

कर्तृताद्यभिमानो हि सर्वेषां प्राणिनां मृषा ।
इत्येतद्दर्शनार्थं वाऽऽख्यायिका प्रोच्यतेऽधुना ॥ ११ ॥

देवानामसुराणां च संग्रामे ह पुरा किल ।
यथोक्तलक्षणं ब्रह्म विजिग्ये लब्धवान् जयम् ॥ १२ ॥

असुरान् जगतोऽरातीन् भगवत्सेतुभेदकान् ।
विजित्य जगतः स्थेम्ने देवेभ्योऽदात् जयं फलम् ॥

विजये ब्रह्मणस्तस्य देवा अग्न्यादयः तदा ।
निखिला अमहीयन्त महिमानमवाप्नुवन् ॥ १४ ॥

तदात्मन्येव संस्थस्य सर्वज्ञस्येश्वरस्य च ।
प्रत्यगात्मस्वरूपस्य चिकीर्षोः जगतः स्थितिम् ॥ १५ ॥

प्राणिकर्मफलानां च सम्यग्योजयितुः क्रमात् ।
सर्वशक्तेः जयो ह्येषः तस्यैव महिमाऽपि च ॥ १६ ॥

इति देवा अजानन्तः ऐक्षन्त जयमोहिताः ।
अग्न्यादिकस्वरूपेण परिच्छिन्नात्मनां जयः ॥ १७ ॥

महिमाऽस्माकमेवायं अग्निभावादिलक्षणम् ।
जयस्य फलभूतं चाप्यस्माभिरनुभूयते ॥ १८ ॥

न प्रत्यगात्मभूतेनेश्वरेण केनचित् कृतः ।
एवमीक्षितवन्तो हि देवास्ते निखिला अपि ॥ १९ ॥

तद्धैषां विजज्ञौ, तेभ्यो ह प्रादुर्बभूव ।
तन्न व्यजानत किमिदं यक्षमिति ॥ २ ॥

एवं मिथ्येक्षणं तेषां ब्रह्म विज्ञातवत् किल ।
सर्वेक्षितृ यतः सर्वभूतेन्द्रियप्रयोक्तृ च ॥ २० ॥

उपलभ्य च देवानां मिथ्याज्ञानं सुरारिवत् ।
देवा मिथ्याभिमानेन न भवेयुः पराजिताः ॥ २१ ॥

इत्यनुकम्पया देवान् मिथ्याज्ञानापनोदनात् ।
अहमेवानुगृह्णीयां इति प्रादुर्बभूव तत् ॥ २२ ॥

देवेभ्यो ह किलार्थाय योगमाहात्म्यनिर्मितम् ।
अद्भुतं रूपमास्थाय तेषामिन्द्रियगोचरे ॥ २३ ॥

प्रादुर्भूतं तु तद् ब्रह्म न व्यजानत ते सुराः ।
नैव विज्ञातवन्तस्तत् अतिविस्मापकाकृति ॥ २४ ॥

यक्षं पूज्यं महद्भूतं किमेतद्वा भवेदिति ।

तेऽग्निमब्रुवन्, जातवेद एतद्विजानीहि किमेतद्यक्षमिति, तथेति ॥ ३ ॥

तदभ्यद्रवत्, तमभ्यवदत्, कोऽसीति अग्निर्वा अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मि इति ॥ ४ ॥

तस्मिंस्त्वयि किं वीर्यमिति, अपीदं सर्वं दहेयं यदिदं पृथिव्यामिति ॥ ५ ॥

तस्मै तृणं निदधौ एतद्दहेति, तदुपप्रेयाय सर्वजवेन, तन्न शशाक दग्धुं, स तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति ॥

ते देवाः तदजानन्तः सर्वे सान्तर्भया अपि ॥ २५ ॥

तत् विजिज्ञासवः सन्तः ततोऽग्निमग्रगामिनम् ।
देवं सर्वज्ञकल्पं च जातवेदसमब्रुवन् ॥ २६ ॥

एतदस्मत्समक्षस्थं विजानीहि विशेषतः ।
यक्षं बुध्यस्व तेजस्वी यतो नस्त्वं भवस्यतः ॥ २७ ॥

किमेतद्धि भवेत् यक्षं इति प्रोक्तः तथाऽस्त्विति ।
तदेवाभ्यद्रवत् यक्षं तत्प्रति गतवानयम् ॥ २८ ॥

तत्समीपेऽप्रगल्भत्वात् तूष्णींभूतं पिपृच्छिषुम् ।
आगतं तं स्वयं यक्षं अभ्यवददभाषत ॥ २९ ॥

अग्निं प्रति च कोऽसीति, तथा पृष्टोऽग्निरब्रवीत् ।
अग्निर्नाम प्रसिद्धोऽहं जातवेदा भवामि च ॥ ३० ॥

नामद्वयप्रसिद्धोऽस्मीत्यात्मानं श्लाघयन्नयम् ।
इत्येवमुक्तवन्तं तं ब्रह्मावोचदिदं वचः ॥ ३१ ॥

तस्मिन्नेवं च विख्यातगुणनामवति त्वयि ।
किं वीर्यं कुत्र सामर्थ्यं इति पृष्टो जगाद सः ॥ ३२ ॥

दहेयं हि जगत्सर्वं पृथिव्यां स्थावरादिकम् ।
भस्मीकुर्यां इदं सर्वं, पृथिव्यामित्युपलक्षणम् ॥ ३३ ॥

अन्तरिक्षगतं वस्तु चाग्निना दह्यते यतः ।
अभिमानवते तस्मै ब्रह्म तु निदधौ तृणम् ॥ ३४ ॥

स्थापितवान् पुरश्चाग्नेः तृणमात्रं ममाग्रतः ।
एतत् दह समर्थश्चेत्, समर्थो नासि चेत् तदा ॥ ३५ ॥

मुञ्चाभिमानं सर्वत्र दग्धृत्वविषये तव ।
इत्युक्तो गतवानाग्निः अभिप्रेयाय तत् तृणम् ॥ ३६ ॥

सर्वजवेन वेगेन सर्वोत्साहकृतेन च ।
तथाऽपि नाशकत दग्धुं यक्षेण निहितं तृणम् ॥ ३७ ॥

तृणं दग्धुमशक्तोऽग्निः तदानीं व्रीडितो भृशम् ।
तथा हतप्रतिज्ञश्च यक्षादेव सुरान् प्रति ॥ ३८ ॥

निववृते निवृत्तोऽभूत् तान् प्रति गतवानयम् ।
नैवैतदशकं बोद्धुं, ज्ञातुं न शक्तवानहम् ॥ ३९ ॥

विशेषतः यदेतद्धि यक्षं कीदृक् भवेदिति ।

अथ वायुमब्रुवन् वायवेतद्विजानीहि कि-मेतद्यक्षमिति, तथेति ॥ ७ ॥

तदभ्यद्रवत् तमभ्यवदत् कोऽसीति, वायुर्वा अहमस्मीत्यब्रवीन्मातरिश्वा वा अहमस्मीति ॥ ८ ॥

तस्मिंस्त्वयि किं वीर्यमिति, अपीदं सर्वमाददीय यदिदं पृथिव्यामिति ॥ ९ ॥

तस्मै तृणं निदधौ, एतदादत्स्वेति, तदुपप्रेयाय सर्वजवेन, तन्न शशाकादातुं, स तत एव निववृते, नैतदशकं विज्ञातुं, यदेतद्यक्षमिति ॥ १० ॥

वायुरित्युच्यते वानात् गमनात् गन्धनादपि । ४० ॥

मातरिश्वा श्वयत्येष ह्यन्तरिक्षे च मातरि ।
आददीय च गृह्णीयां सर्वमन्यत समार्थकम् । ४१ ॥

अथेन्द्रमब्रुवन्, मघवन्नेतद्विजानीहि किमेतद्यक्षमिति, तथेति, तदभ्यद्रवत् तस्मात् तिरोदधे ॥ ११ ॥

स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहु-

शोभमानां उमां हैमवतीं, तां होवाच किमेतद्यक्षमिति ॥ १२ ॥

स्वसमीपं गतात् तस्मात् इन्द्रात् ब्रह्म तिरोदधे ।
मघवा बलवानिन्द्रः ततोऽसौ परमेश्वरः ॥ ४२ ॥

इन्द्रत्वे चाभिमानः स्यात् इन्द्रस्यातितरां किल ।
एतादृशोऽभिमानश्च निराकर्तव्य इत्यतः ॥ ४३ ॥

संवादमात्रमप्यस्मै ब्रह्मेन्द्राय न दत्तवत् ।
यस्मिन्नाकाशदेशे हि तत् आत्मानं प्रदर्श्य च ॥ ४४ ॥

यक्षमेवं तिरोभूतं, तिरोधाने कृतेऽपि च ।
इन्द्र आसीत् यदाकाशे तस्मिन्नेव स तस्थिवान् ॥ ४५ ॥

किं स्यात् तदद्भुतं यक्षं इति ध्यायन् निरन्तरम् ।
नाग्न्यादिवत् निवृत्तोऽभूत् इन्द्रस्तस्मात्प्रदेशतः ॥ ४६ ॥

तद्यक्षे भक्तिमिन्द्रस्य दृष्ट्वा स्त्रीरूपिणी तदा ।
उमारूपधरा विद्या प्रादुरासीत् स तामुमाम् ॥ ४७ ॥

सर्वेषां शोभमानानां सा शोभनतमा खलु ।
सा बहुशोभमानेति ह्युपपन्नं विशेषणम् ॥ ४८ ॥

तां च हैमवतीं हेमकृतभूषावतीमिव ।
शोभमानां ददर्शासौ हैमवतीत्युमैव वा ॥ ४९ ॥

या हि हिमवतः पुत्री नित्यं सा सह वर्तते ।
सर्वज्ञेनेश्वरेणेति ज्ञातुं शक्ता भवेदिति ॥ ५० ॥

कृत्वा चेन्द्रो जगामोमां, तामुवाच च पृष्टवान् ।
दर्शयित्वा तिरोभूतं किं तद्यक्षं भवेदिति ॥ ५१ ॥

इति केनोपनिषत्पदभाष्यसंग्रहे तृतीयः खण्डः ॥

चतुर्थः खण्डः ।

ब्रह्मेति होवाच, ब्रह्मणो वा एतद्विजये महीयध्वमिति, ततो हैव विदाञ्चकार ब्रह्मेति ॥ १ ॥

ब्रह्मैव किल तद्यक्षं इति तस्मै उवाच सा ।
असुरा ईश्वरेणैव जिताः यूयं तु केवलम् ॥ १ ॥

तत्र निमित्तमात्रं हि, तस्यैव ब्रह्मणो जये ।
सिद्धे, यूयं महीयध्वं महिमानमत्राप्नुथ ॥ २ ॥

विजयोऽस्माकमेवेति मिथ्याभिमान एव वः ।
ततः तस्मात् उमावाक्यात् इन्द्रो विदाञ्चकार ह ॥ ३ ॥

ब्रह्मेति ज्ञातवानेषः, एवेत्यत्रावधारणात् ।
न स्वातन्त्र्येण तज्ज्ञानं इति स्पष्टं प्रतीयते ॥ ४ ॥

तस्माद्वा एते देवा अतितरामिवान्यान् देवान् यदग्निर्वायुरिन्द्रः, ते ह्येनन्नेदिष्ठं पस्पर्शुः, ते ह्येनत् प्रथमः विदांचकार ब्रह्मेति ॥ २ ॥

यतोऽग्निर्वायुरिन्द्रश्च संवाददर्शनादिना ।
सामीप्यं ब्रह्मणः प्रापुः तस्मादतितरामिव ॥ ५ ॥

शक्त्यादिभिः महाभाग्यैः स्वगुणैरितरान् सुरान् ।
एते ह्यतितरां देवाः अतिशेरत एव च ॥ ६ ॥

'इवा 'वधारणार्थो वा भवेदनर्थकोऽथवा ।
ते एनत ब्रह्म पस्पर्शुः यतोऽतितरां यतः ॥ ७ ॥

प्रियतमं च नेदिष्ठं स्पृष्टवन्तः कथञ्चन ।
संवादादिप्रकारैश्च यथोक्तैः ब्रह्मणा सह ॥ ८ ॥

'प्रथमः' प्रथमाः सन्तो मुख्या इन्द्राग्निवायवः ।
'विदांचकारे' त्युक्तेऽपि विदांचक्रुः इति स्फुटम् ॥ ९ ॥

तस्माद्वा इन्द्रोऽतितरामिवान्यान् देवान् स ह्येनन्नेदिष्ठं पस्पर्श, स ह्येनत् प्रथमो विदांचकार ब्रह्मेति ॥ ३ ॥

यस्मादग्निश्च वायुश्चापीन्द्रस्यैव हि वाक्यतः ।

विदांचक्रतुः, इन्द्रेण ब्रह्मोमावाक्यतः श्रुतम् ॥ १० ॥

इन्द्रो ह्यतितरां तस्मात् अतिशेतेऽपरान् सुरान् ।
उक्तार्थमितरत् वाक्यं 'ह्येनत्' इत्यादि यच्छ्रुतम् ॥

तस्यैष आदेशो यदेतद्विद्युतो व्यद्युतदा३ इतीन्न्यमीमिषदा३ इत्यधिदैवतम् ॥ ४ ॥

प्रकृतब्रह्मणः तस्य श्रुत्यैवादेश उच्यते ।
अपि निरुपमं ब्रह्म ह्युपमानेन येन तत् ॥ १२ ॥

उपदेशोऽयं भवेत् सम्यक् स आदेश इतीर्यते ।
आ शब्द उपमार्थः स्यात् विद्यातनं हि विद्युतः ॥ १३ ॥

प्रसिद्धमेव लोकेऽस्मिन विद्युद्विद्योतनं यथा ।
तथा ब्रह्मेति तात्पर्यं, षष्ठीप्रयोगदर्शनात् ॥ १४ ॥

द्योतनं कृतवच्चेति न ह्यर्थ उपपद्यते ।
विद्युद्वत् सकृदात्मानं अग्न्यादिभ्यः पुरा किल ॥ १५ ॥

दर्शयित्वा तिरोभूतं, उपमा युज्यते ततः ।
अथवा विद्युतः 'तेजः' इत्यध्याहियतां पदम् ॥ १६ ॥

इति-शब्दः किलादेशप्रतिनिर्देशको भवेत् ।
समुच्चयार्थ इच्छब्दः, तस्यादेशोऽपरोऽपि च ॥ १७ ॥

न्यमीमिषत् यथा चक्षुः निमेषं कृतवत् यथा ।
प्रकाशनतिरोभावः चक्षुषो विषयं प्रति ॥ १८ ॥

इत्यधिदैवतं प्रोक्तं देवताविषयं त्विदम् ।
ब्रह्मणः सुखबोधार्थं उपमानप्रदर्शनम् ॥ १९ ॥

अथाध्यात्मं यदेतद्गच्छतीव च मनोऽनेन चैतदुपस्मरत्यभीक्ष्णं संकल्पः ॥ ५ ॥

अथानन्तरं अध्यात्मं आदेशः प्रत्यगात्मनि ।
यथैतच्च मनो गच्छेत् ब्रह्मैतत् ढौकते तथा ॥ २० ॥

विषयीकुरुते ह्येतत् अनेन मनसा च यत् ।
उपस्मरति तत् ब्रह्म चाभीक्ष्णं साधको भृशम् ॥ २१ ॥

समीपतः स्मरत्येतत् संकल्पो मनसो भवेत् ।
ब्रह्मविषयकः, तच्च मन उपाधिकत्वतः ॥ २२ ॥

संकल्पस्मृति चिन्ताद्यैः विषयीक्रियमाणवत् ।
प्रत्ययैः व्यज्यते ब्रह्मेत्यादेशोऽध्यात्ममेव सः ॥ २३ ॥

विद्युन्निमेषवच्चेति प्रोक्तं तदधिदैवतम् ।
द्रुतप्रकाशधर्मि स्यात् आदेशोऽध्यात्ममेव तु ॥ २४ ॥

मनःप्रत्ययकालाभिव्यक्तधर्मि भवेदिदम् ।
एवमादिश्यमानं हि ब्रह्म मन्दधियामपि ॥ २५ ॥

गम्यमित्युपदेशोऽयं आदेशः ब्रह्मणः कृतः ।
निरुपाधि ब्रह्मरूपं कैश्चिच्च मन्दबुद्धिभिः ॥ २६ ॥

न ह्याकलयितुं शक्यं कुत्रचिद्वा कदाचन ।

तद्ध तद्वनं नाम तद्वनमित्युपासितव्यं स य एतदेवं वेदाभि हैनं सर्वाणि भूतानि संवाञ्छन्ति ॥ ६ ॥

प्रत्यगात्मस्वरूपत्वात् सकलप्राणिनामपि ॥ २७ ॥

तत् ब्रह्म वननीयं ह संभजनीयमेव च ।
अतो हि तद्वनं नाम प्रख्यातं ब्रह्मणो भवेत् ॥ २८ ॥

तद्वनमित्यनेनैव तस्य गुणाभिधानतः ।
उपासितव्यं तत् ब्रह्म तन्नाम्ना चिन्त्यमेव तत् ॥ २९ ॥

यथोक्तं ब्रह्म यः कश्चित् तद्वनमिति नामतः ।
यथोक्तगुणवत् वेद चोपास्ते तमुपासकम् ॥ ३० ॥

सर्वाण्यपि च भूतानि संवाञ्छन्ति ह्यशेषतः ।
प्रार्थयन्ते यथा ब्रह्म प्रार्थयन्ते जनाश्च तम् ॥ ३१ ॥

एवं शिष्योऽनुशिष्टः सन् आचार्यमिदमब्रवीत् ।
यद्युपनिषदं तत्त्वं गुह्यं चिन्त्यं मया भवेत् ॥ ३२ ॥

मम तत्र भगवन् ब्रूहीत्याचार्यश्च तदाऽब्रवीत् ।
मयोपनिषदुक्तैव, प्रोक्ता ह्यभिहिता तव ॥ ३३ ॥

तवोपनिषदुक्ता हि ब्रह्मणः परमात्मनः ।
संबन्धिनीमिमां ब्राह्मीं वयमब्रूम ते क्रमात् ॥ ३४ ॥

वावेति च पुरा प्रोक्तामेवावधारयत्यसौ ।
शिष्यस्य पृच्छतस्तस्य कोऽभिप्रायः तदा भवेत् । ३५ ॥

श्रुतार्थस्य यदि प्रश्नः पिष्टपेषणवत् वृथा ।
निरर्थको भवेत् प्रश्नः, पूर्वोक्तोपनिषत् यदि ॥ ३६ ॥

सावशेषा भवेत् तर्हि फलस्य वचनेन च ।
प्रेत्यामृता भवन्तीति युज्यते नोपसंहृतिः । ३७ ॥

शेषविषयकः प्रश्नोऽतोऽनुपपन्न एव हि ।
प्रष्टुः कस्तर्ह्यभिप्रायः? यत्किंचित् किमपेक्ष्यते ॥ ३८ ॥

विज्ञानेन पुरोक्तेन तत्सहकारिसाधनम् ।
अथ किं निरपेक्षं तत्, सापेक्षं चेदपेक्षितम् ॥ ३९ ॥

यत् तद्विषयिणीं तर्हि ममोपनिषदं वद ।
अथ चेत् निरपेक्षं तत् त्वं चापि पिप्पलादिवत् ॥ ४० ॥

नैवातः परमस्तीति निःशङ्कं अवधारय ।
इति शेषतया प्रश्नः उपपन्नो भवेत् खलु ॥ ४१ ॥

एवं चेदुपपन्नं स्यात् आचार्यस्यावधारणम् ।
उक्ता ते इति वाक्येन, नन्वेतत् नावधारणम् ॥ ४२ ॥

यतोऽन्यदाह वक्तव्यं 'तस्यै तपो दमः' इति ।
सत्यं उच्यते वक्तव्यं, न तु शेषतया, न च ॥ ४३ ॥

तत्सहकार्यभिप्रायात् परं तु ब्रह्मणः क्रमात् ।
विद्याप्राप्तेरुपायत्वं तप आदेः भवेदिति ॥ ४४ ॥

वेदैरपि तदङ्गैश्च सहपाठात् समीकृतेः ।
इत्यभिप्रायतः स्याच्चेत्, ब्रह्मज्ञानस्य शेषता ॥ ४५ ॥

वेदानां च तदङ्गानां तत्सहकारिताऽपि वा ।
साक्षान्न संभवेत् क्वापि, यथायोग्यं विभज्य च ॥४६॥

सहपठितानां चापि विनियोगो भवेत् किल ।
सूक्तवाकादिमन्त्राणां विभागः क्रियते यथा ॥ ४७ ॥

तपो दमादिकानां च ब्रह्मज्ञानस्य शेषता ।
तत्सहकारिभावो वा कल्प्यतामिति चेत् न हि ॥ ४८ ॥

वेदानां च तदङ्गानां अर्थप्रकाशकत्वतः ।
कर्मज्ञान सहायत्वं इत्येवं विभागो भवेत् ॥ ४९ ॥

अर्थसंबन्धोपपत्ति सामर्थ्यादिति चेदपि ।
अयुक्तो हि विभागोऽयं नाश्नुति घटनामयम् ॥ ५० ॥

सर्वक्रियाकारकादि भेदबुद्धिनिवारिणी ।
ब्रह्मविद्या यतस्तस्याः शेषापेक्षा न युज्यते ॥ ५१ ॥

युज्यते न च संबन्धः केनचित् सहकारिणा ।
ब्रह्मज्ञानस्य मोक्षस्य निःश्रेयसफलस्य च ॥ ५२ ॥

सर्वविषयव्यावृत्तप्रत्यगात्मपरत्वतः ।
कर्मणां सहकारित्वं ज्ञानस्य तदपेक्षता ॥ ५३ ॥

उभयं नोपपद्येत, ततोऽवधारणार्थता ।
प्रश्नप्रतिवचनस्याप्येवं चेदुपपद्यते ॥ ५४ ॥

एतावदेव संप्रोक्ता मया ह्युपनिषत् तव ।
इतरनिरपेक्षा सा चामृतत्वाय कल्पते ॥ ५५ ॥

तस्यै तपो दमः कर्मेति प्रतिष्ठा वेदाः सर्वाङ्गानि सत्यमायतनम् ॥ ८ ॥

यामुपनिषदं ब्राह्मीं इमामब्रूम ते वयम् ।
तत्प्राप्त्युपायभूतानि तप आदीनि सन्ति च ॥ ५६ ॥

मन इन्द्रियकायादेः समाधानं तपः स्मृतम् ।
दमः उपशमः, कर्म चाग्निहोत्रादिकं भवेत् ॥ ५७ ॥

एतैश्च संस्कृतस्यैव सत्त्वं शुध्यति नान्यतः ।
तद्द्वारा तत्त्वबोधस्य समुत्पत्तिश्च दृश्यते ॥ ५८ ॥

अप्रमृदितदोषस्य ब्रह्मण्युक्तेऽपि तत्त्वतः ।
अप्रतिपत्तिरेवाथ विपरीता भवेत् यथा ॥ ५९ ॥

इन्द्रविरोचनादीनां, तस्मादिह गतेषु वा ।
जन्मान्तरेषु नानासु साधनैः तप आदिभिः ॥ ६० ॥

सम्यग्विशुद्धसत्त्वस्य ज्ञानमुत्पद्यते क्रमात् ।
"इति" शब्देन लक्ष्यन्ते साधनानीतराण्यपि ॥ ६१ ॥

इत्येवमादि चाप्यन्यत् ज्ञानोत्पत्त्युपकारकम् ।
अमानित्वमदम्भित्वं इत्याद्यत्रोपदर्शितम् ॥ ६२ ॥

"प्रतिष्ठा" ब्रह्मविद्यायाः पादौ पुरुषपादवत् ।
संस्थिता तेषु सत्स्वेव ब्रह्मविद्या प्रवर्तते ॥ ६३ ॥

वेदाः ऋगाद्याः चत्वारः कर्मज्ञानप्रकाशकाः ।
शिक्षादीनि षडङ्गानि प्रतिष्ठा निखिलान्यपि ॥ ६४ ॥

वेदानां रक्षणार्थत्वात्, पादरूपककल्पनात् ।
वेदा एवाथवाऽङ्गानि शिर आदीनि कल्प्यताम् ॥ ६५ ॥

वेदानां ग्रहणेनैव तदङ्गग्रहणं कृतम् ।
अङ्गिनि गृहीतेऽङ्गानि गृहीतानि भवन्ति हि ॥ ६६ ॥

अङ्गानां तदायत्तत्वात्, सत्यं आयतनं यतः ।
तिष्ठत्युपनिषत् तस्मिन् अकौटिल्यं अमायिता ॥ ६७ ॥

तत् मनोवाक्छरीराणां, विद्याऽऽश्रयति तेषु हि ।
ये ह्यमायाविनः सन्तः साधव इति कीर्तिताः ॥ ६८ ॥

नासुरप्रकृतिस्थेषु मायाविषु कदाचन ।
तस्मादेवात्र सत्यस्य ह्यायतनत्वकल्पना ॥ ६९ ॥

तप आदेः प्रतिष्ठात्वे चायतनत्वकल्पना ।
सत्यस्य हि विशिष्टत्वज्ञापनार्था भवेदिह ॥ ७० ॥

यो वा एतामेवं वेदापहत्य पाप्मानमनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति ॥

एतां वै ब्रह्मविद्यां यः केनेत्यादि यथोदिताम् ।
विजानाति महाभागां ब्रह्म हेत्यादिना स्तुताम् ॥ ७१ ॥

सर्वविद्याप्रतिष्ठां च, सोऽविद्याकामलक्षणम् ।
बीजं संसारवृक्षस्य पाप्मानं अपहृत्य च ॥ ७२ ॥

हित्वा सर्वमशेषेण, "अमृतत्वं हि विन्दते ।
इति श्रुत्या पुरा प्रोक्तं ब्रह्मविद्याफलं पुनः ॥ ७३ ॥

अन्ते निगमयत्यत्र चापहत्येति वाक्यतः ।
अनन्ते खल्वपर्यन्ते स्वर्गे लोके सुखात्मके ॥ ७४ ॥

ब्रह्मणीत्यत्र तात्पर्यं, अनन्तेति त्रिविष्टपे ।
औपचारिकशब्दोऽपि स्यादिति "ज्येय" उच्यते ॥७५॥

स्वात्मनि ज्यायसि ज्येये मुख्ये सर्वमहत्तरे ।
प्रतितिष्ठति, संसारं अयं नापद्यते पुनः ॥ ७६ ॥

आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि । सर्वं ब्रह्मौपनिषदं माऽहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु । तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥

ओं शान्तिः शान्तिः शान्तिः ॥

इति केनोपनिषत्पदभाष्यसंग्रहे चतुर्थः खण्डः ॥

केनोपनिषत्पदभाष्यसंग्रहः संपूर्णः ॥

॥ श्रीसनत्सुजातीयभाष्यसंग्रहः ॥

प्रथमोऽध्यायः ।

नमः पुंसे पुराणाय पूर्णानन्दाय विष्णवे ।
निरस्तनिखिलध्वान्ततेजसे विश्वहेतवे ॥
नम आचार्येभ्यः ब्रह्मविद्यासंप्रदायकर्तृभ्यः ॥

स्वभावात् चित्सदानन्दाद्वितीयब्रह्ममात्रकः ।
यद्यप्यात्मा स्वमाश्रित्य स्वानुभूत्येकगम्यया ॥ १ ॥

स्वमेव विषयीकृत्य स्थितयाऽविद्यया दृढम् ।
साभासया स्वतस्सिद्धात् चित्सदानन्दलक्षणात् ॥ २ ॥

अद्वयब्रह्मणो भावात् प्रच्युतस्सन्ननात्मनि ।
देहादावात्मभावं च प्रतिपन्नोऽनवाप्य सः ॥ ३ ॥

पुरुषार्थमशेषेण प्राप्यानर्थमशेषतः ।
साधनैः इष्टसंप्राप्ति अविद्याकर्मकल्पितैः ॥ ४ ॥

अनिष्टपरिहारं चाकांक्षन लौकिकवैदिकैः ।
अनुष्ठितैरलब्ध्वा तु पुमर्थं मोक्षशब्दितम् ॥ ५ ॥

रागद्वेषादिभिः क्रूरैः मकरामैरितस्ततः ।
आकृष्टो नरदेवादितिर्यगादिषु योनिषु ॥ ६ ॥

नानाविधासु सञ्जातो मुह्यमानश्च संसरन् ।
कथञ्चित्पुण्ययोगेन मनुष्यत्वं च विप्रताम् ॥ ७ ॥

प्राप्य तत्रापि शास्त्रज्ञः वेदसंप्रोक्तकर्मणाम् ।
ईश्वरार्थमनुष्ठानात् गतरागादिकल्मषः ॥ ८ ॥

इहामुत्रार्थभोगेषु नश्वरत्वादिदुष्टताम् ।
दृष्ट्वा सम्यक् विरक्तस्सन् वेदान्तैकप्रमाणकम् ॥ ९ ॥

ब्रह्मतत्त्वं बुभुत्सुस्सः वेदोदितशमादिभिः ।
साधनैश्च सुसंपन्नः गत्वा ब्रह्मविदं गुरुम् ॥ १० ॥

सदाचार्यानुसारेण वेदान्तश्रवणादिना ।
ब्रह्मात्मतत्त्वं विज्ञायाहंब्रह्मास्मीति वाक्यतः ॥ ११ ॥

निवृत्ताज्ञानतत्कार्यः ब्रह्मरूपोऽवतिष्ठते ।
एवं वेदान्तमर्यादा, सर्वमेतदशेषतः ॥ १२ ॥

सनत्सुजातो भगवान् क्रमेणात्र प्रवक्ष्यति ।
शोकमोहादिसन्तप्तो धृतराष्ट्रो महीपतिः ॥ १३ ॥

श्रुत्वा वेदान्तसंवादं 'तरति शोकमात्मवित्' ।
शोकस्यापहतिः साध्या ब्रह्मणो विद्यया विना ॥ १४ ॥

कदापि नेति मन्वानः विदुरायैवमुक्तवान् ।
" अनुक्तं यदि ते किंचित् वाचा विदुर वर्तते ॥ १५ ॥

तन्मे शुश्रूषवे ब्रूहि विचित्राणीह भाषसे।"
सर्वज्ञः श्रुतवाक्योऽपि स्वयं कारुणिकोऽपि सन् ॥ १६ ॥

ब्रह्मविद्या विशिष्टाधिकारिणां विषयः खलु"।
मत्वैवं विदुरः प्राह 'नातोऽन्यद्वक्तुमुत्सहे ॥ १७ ॥

शूद्रयोनावहं जात' इति शूद्रत्वमात्मनः।
वेदान्तब्रह्मविज्ञानेऽनधिकारस्य कारणम् ॥ १८ ॥

उक्त्वा ततः कथं ह्येनं पूर्णानन्दे परात्मनि।
ब्रह्मणो विद्यया सम्यक् स्वाराज्ये परमे पदे ॥ १९ ॥

स्थापयामीति मन्वानः इतिहासं पुरातनम्।
छान्दोग्योपनिषत्सिद्धं संस्मृत्य तमसः परम् ॥ २० ॥

भूमानं परमात्मानं दर्शयितुं न शक्नुयात्।
अन्योऽस्मात् त्रिषु लोकेषु मत्वैवं विदुरस्तदा ॥ २१ ॥

भगवन्तं समाहूय सनत्सुजातनामकम्।
ब्रह्मणो मानसं पुत्रं योगशक्त्या च तं ततः ॥ २२ ॥

प्रत्युत्थानादिनाऽभ्यर्च्य भगवन्तमुवाच सः।
"येनासौ मुक्तसंसारः धर्माधर्मविवर्जितः ॥ २३ ॥

सर्वदुःखातिगश्चैव तमस्मै वक्तुमर्हसि।"

श्रीवैशंपायन उवाच—

ततो राजा धृतराष्ट्रो मनीषी
संपूज्य वाक्यं विदुरेरितं तत् ।
सनत्सुजातं रहिते महात्मा
पप्रच्छ बुद्धिं परमां बुभूषन् ॥

विदुरेणोदितं वाक्यं ततः संपूज्य भूपतिः ॥ २४ ॥
सनत्सुजातं पप्रच्छ बुद्धिं च परमां रहः ।
ब्रह्म हिरण्यगर्भाख्यं सनत् सनातनं मतम् ॥ २५ ॥
जातः तद्ब्रह्मणः सुष्ठु ज्ञानवैराग्यलक्षितः ।
तं राजा रहिते देशे वर्जिते प्राकृतैः जनैः ॥ २६ ॥
बुभूषन् भवितुं हीच्छन् स्वमात्मानं हृतं पुनः ।
ब्रह्मात्मविद्यया लब्धुं इच्छन् पप्रच्छ पृष्टवान् ॥ २७ ॥
महात्मा धृतराष्ट्रोऽसौ परमां बुद्धिमुत्तमाम् ।
पूर्णानन्दाद्वयब्रह्मविषयां विनयादिमाम् ॥ २८ ॥

धृतराष्ट्र उवाच —

सनत्सुजात यदिदं शृणोमि
मृत्युर्हि नास्तीति तवोपदेशम् ।
देवासुरा आचरन् ब्रह्मचर्यं
अमृत्यवे तत् कतरन्नु सत्यम् ॥ २ ॥

सनत्सुजात यन्मृत्युर्नास्तीति त्वमुपादिशः ।
शिष्यान् प्रतीति हि प्राह पुरैव विदुरो मम ॥ २९ ॥

किन्तु देवासुराः पूर्वं इन्द्रविरोचनादयः ।
अमृत्यवेऽमृतत्वस्य प्राप्त्यर्थं हि समाचरन् ॥ ३० ॥

ब्रह्मचर्यं गुरौ वासं कृतवन्त इति श्रुतम् ।
यदि मृत्युर्हि नास्तीति तव पक्षः कथं तदा ॥ ३१ ॥

देवासुराणामाचारः ब्रह्मचर्यममृत्यवे ।
तत् तयोः मृत्युसद्भावासद्भावपक्षयोः किमु ॥ ३२ ॥

कतरन्नु भवेत्सत्यं तत् सत्यं वक्तुमर्हसि ।

श्रीसनत्सुजात उवाच —

अमृत्युः कर्मणा केचित् मृत्युर्नास्तीति चापरे ।
शृणु मे ब्रुवतो राजन् यथैतत् मा विशङ्किथाः ॥

एवं पृष्टः तथा प्राह भगवान् ब्रह्मणः सुतः ॥ ३३ ॥

केचित् पुनरविद्याधिरूढाः तु परमार्थतः ।
मन्वाना मृत्युसद्भावं वेदोक्तेनैव कर्मणा ॥ ३४ ॥

अमृत्युः मरणाभावो भवतीति ह्यमृत्यवे ।
अमृतत्वाप्तये कर्म वेदोक्तमाचरन्ति च ॥ ३५ ॥

विषयान्धाः तथैवान्ये मोक्षं निर्विषयं पुनः ।
अमन्यमाना रागेण कर्मणैव ह्यमर्त्यताम् ॥ ३६ ॥

देवादिभावमिच्छन्ति, तथात्मव्यतिरेकतः ।
अपश्यन्तो द्वितीयं च ज्ञानकर्मसमुच्चयात् ॥ ३७ ॥

प्राप्तिः स्यादमृतत्वस्येति वर्णयन्ति केचन ।
आत्मनो व्यतिरेकेण द्वितीयं वस्तु किंचन ॥ ३८ ॥

अपश्यन्तः पुनः केचित् अद्वितीयात्मदर्शिनः ।
मृत्युर्नास्तीति हे राजन् निश्चित्य वर्णयन्ति हि ॥ ३९ ॥

मृत्युरस्तीत्ययं चैकः मृत्युर्नास्तीति चापरः ।
एतयोः पक्षयोश्चापि विरोधो न भवेत् यथा ॥ ४० ॥

तथा मे ब्रुवतो वाक्यं शृणु माऽत्र विशङ्किथाः ।

उभे सत्ये क्षत्रियाद्यप्रवृत्ते
मोहो मृत्युः संमतो यः कवीनाम् ।
प्रमादं वै मृत्युमहं ब्रवीमि
सदाऽप्रमादममृतत्वं ब्रवीमि ॥ ४ ॥

मृत्योरस्तित्वनास्तित्वे पूर्वोक्ते ये हि ते उभे ॥ ४१ ॥

सत्ये हि वर्तमाने द्वे प्रवृत्ते आदिसर्गतः ।
[अथवा क्षत्रियाद्येति राज्ञः संबोधनं भवेत् ॥ ४२ ॥

हे क्षत्रियप्रधानेति] "सत्यत्वमुभयोः कथम् ।
अस्तिता नास्तिता चेति परस्परविरुद्धयोः" ॥ ४३ ॥

"पक्षयोः अस्ति नास्तीति विरोधोऽयं भवेद्यदि ।
स्यात् परमार्थतः कश्चित् मृत्युशब्देन लक्षितः" ॥ ४४ ॥

'एवं चेत् तर्हि को मृत्युः,' मिथ्याज्ञानमनात्मनि ।
आत्माभिमानरूपो यो मोहो मृत्युर्हि संमतः ॥ ४५ ॥

केषांचन कवीनां तु, नेमं तथा ब्रवीम्यहम् ।
मृत्युं ब्रवीम्यहं तावत् मिथ्याज्ञानस्य कारणम् ॥ ४६ ॥

ब्रह्मभावात् स्वतस्सिद्धात् प्रमादं प्रच्युतिं सहि ।
अज्ञानसंज्ञया प्रोक्तः यदात्मानवधारणम् ॥ ४७ ॥

जन्ममृत्य्वाद्यनर्थानां सर्वेषां बीजमादिमम् ।
अप्रमादं व्यवस्थानं स्वाभाविकस्वरूपतः ॥ ४८ ॥

अमृतत्वमहं मन्ये तथा श्रुत्या समीरितम् ।
विशेषतोऽनुगीतासु तत्त्वमेतत् प्रदर्शितम् ॥ ४९ ॥

यत एवं भवेन्मोक्षः स्वरूपस्थितिलक्षणः ।
उत्पत्त्यादिचतूरूप क्रियाफलविलक्षणः ॥ ५० ॥

अत एवामृतत्वं न कर्मसाध्यं कदाचन ।
केषांचिदभिमतो यो ज्ञानकर्मसमुच्चयः ॥ ५१ ॥

वक्ष्यत्यस्य च पक्षस्य स्वयमेव निराकृतिम् ।

प्रमादाद्वा असुराः पराभवन्
अप्रमादात् ब्रह्मभूतास्सुराश्च ।
न वै मृत्युः व्याघ्र इवात्ति जन्तून्
नाप्यस्य रूपं उपलभ्यते हि ॥ ५ ॥

स्वाभाविकब्रह्मभावप्रच्यवनादनात्मनि ॥ ५२ ॥

देहादावात्मभावाद्धि विरोचनादयोऽसुराः ।
पराभवन् पराभूताः सुराः इन्द्रादयस्तथा ॥ ५३ ॥

स्वभावचित्सदानन्दाद्वितीयब्रह्मभावतः ।
अवस्थानात् ब्रह्मभूताः इति श्रुत्याऽवगम्यते ॥ ५४ ॥

असुष्वथवा प्राणेषु रमन्ते इन्द्रियेषु ये ।
तेऽसुराः प्राणिनोऽनात्मविदो वायिकाः स्मृताः ॥ ५५ ॥

स्वाभाविकब्रह्मभावं अतिक्रम्य ह्यनात्मनि ।
देहादावात्मभावं च प्रतिपन्नाः पराभवन् ॥ ५६ ॥

मृगादियोनिमापन्नाः, स्वस्मिन्नेव तथाऽऽत्मनि ।
रमन्त्यात्मविदो ये ते सुरा इति प्रकीर्तिताः ॥ ५७ ॥

तेऽप्रमादादवस्थानात् स्वभावब्रह्मभावतः ।
निवृत्ताज्ञानतत्कार्याः संवृत्ता ब्रह्म चैव हि ॥ ५८ ॥

नन्वन्यः सर्वजन्तूनां उपसंहारकोऽमरः ।
लोके मृत्युरिति ख्यातः प्रमादः कथमुच्यते ॥ ५९ ॥

व्याघ्रवत् प्राणिनो जन्तून् मृत्युर्नैवात्ति कश्चन ।
यद्येष भक्षयत्येवं तद्रूपं व्याघ्रवत् स्फुटम् ॥ ६० ॥

उपलभ्येत, मृत्युस्तु नैवोपलभ्यते तथा ।
तस्मान्न विद्यते मृत्युः कश्चन परमार्थतः ॥ ६१ ॥

ननु सावित्र्युपाख्याने निचकर्ष यमो बलात् ।
इति प्रमाणसद्भावात् रूपं तस्योपलभ्यते ॥ ६२ ॥

यमं त्वेके मृत्युमतोऽन्यमाहुः
आत्मावासममृतं ब्रह्मचर्यम् ।
पितृलोके राज्यमनुशास्ति देवः
शिवः शिवनामशिवोऽशिवानाम् ॥

तत्रोपलभ्यते यस्तु साक्षात् मृत्युरसौ न हि ।
साक्षात् मृत्युर्हि कस्तर्हि प्रमादाख्यो मयोदितः ॥ ६३ ॥

अतः प्रमादतो मृत्योः मृत्युमन्यं जगुर्यमम् ।
एकेऽविद्यासमारूढाः विषयैः नष्टदृष्टयः ॥ ६४ ॥

आत्मनो व्यतिरेकेण पश्यन्तश्च द्वितीयकम् ।
स हि वैवस्वतो देवः आत्मावासोऽखिलात्मनि ॥ ६५ ॥

बुद्धौ वासं करोत्येषोऽमृतो मरणवर्जितः ।
ब्रह्मणि स्वात्मभूते च रममाणो वसन् सदा ॥ ६६ ॥

राज्यं च पितृलोकेऽसौ अनुशास्ति यथाक्रमम् ।
शिवः सुखप्रदो भूत्वा शिवानां पुण्यकर्मणाम् ॥ ६७ ॥

अशिवोऽसुखदाताऽप्यशिवानां पापकर्मणाम् ।
नैतादृशो भवेन्मृत्युः मृत्युः प्रमाद एव हि ॥ ६८ ॥

स्वभावात् प्रच्युतिः मृत्युः अज्ञानं च तदेव हि ।
साक्षाद्विनाशहेतुत्वात् अस्य विनाशहेतुता ॥ ६९ ॥

श्रुतिभिः बहुधा प्रोक्ता सर्वानर्थस्य कारणम् ।
स प्रमादो यतः तस्मात् न प्रमाद्येत कश्चन ॥ ७० ॥

तिष्ठेच्च चित्सदानन्दाद्वितीय ब्रह्मभावतः ।
अज्ञाने बन्धहेतुत्वं ज्ञाने मोक्षस्य हेतुता ॥ ७१ ॥

"अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" ।
इति भगवता प्रोक्तं गीतास्वपि चानेकशः ॥ ७२ ॥

प्रमादो हि यतो मृत्युः अमृत्युश्चाप्रमादता ।
अतो न कर्मसाध्यस्सः नित्यसिद्धस्वभावतः ॥ ७३ ॥

कर्मप्राप्यो न चाप्येषः नित्यप्राप्तस्वरूपतः ।
मोक्षसाधनता श्रुत्या ज्ञानस्यैव प्रदर्शिता ॥ ७४ ॥

एवं चेत् तर्हि कर्माणि नानुष्ठेयानि किं जनैः ।
न तान्यननुष्ठेयानि ज्ञानिना तु तथैव हि ॥ ७५ ॥

केन तर्ह्यनुष्ठेयानि अज्ञानिनाऽऽरुरुक्षुणा ।
सर्वदा सर्वकर्माणि कार्याणि ज्ञानिना तु न ॥ ७६ ॥

नन्वेवं आरुरुक्षूणां अपि बन्धस्य हेतुतः ।
नानुष्ठेयानि कर्माणि सर्वाण्यपि च, नो तथा । ७७ ॥

ईश्वरार्थं फलापेक्षारहितेन कृतानि तु ।
न तानि बन्धहेतूनि, किमर्थं तर्हि तत्कृतिः । ७८ ॥

कार्याणि सत्वशुद्ध्यर्थं, एवं चेत् कर्मणामपि ।
प्राप्यते मोक्षहेतुत्वं, सत्यं साक्षात्तु नो तथा । ७९ ॥

क्रमेण मोक्षहेतुत्वं सर्वेषामपि संमतम् ।
विभिन्नविषयत्वेन कर्मब्रह्म समुच्चयः ॥ ८० ॥

न सिध्यतीति विस्पष्टं बहुधा च प्रदर्शितः ।
यस्मात् विशुद्धसत्वस्य नित्यानित्यविवेकतः ॥ ८१ ॥

मोक्षस्य साधनं ज्ञानं ततो निष्पद्यते दृढम् ।
सर्वेश्वरं समुद्दिश्य सत्त्वशुद्ध्यर्थमेव च ॥ ८२ ॥

श्रौतस्मार्तानि कर्माणि नित्यनैमित्तिकान्यपि ।
समाचरेच्च यावत्सः शुद्धसत्त्वो भविष्यति ॥ ८३ ॥

इहामुत्रार्थभोगेषु विरागश्च भवेत् यदा ।
योगारूढः तदा ज्ञेयः गीतावाक्यप्रमाणतः ॥ ८४ ॥

योगारूढो भवेद्यस्तु शमस्तस्य हि कारणम् ।
न कर्म कारणं तस्मात् शान्तिदान्त्यादि साधनैः ॥ ८५ ॥

संपन्नः सर्वदा योगी श्रवणादि समन्वितः ।
स्थितो रहसि युञ्जीत त्यक्तसर्वपरिग्रहः ॥ ८६ ॥

शर्करावालुकावह्निजलशब्दादिवर्जिते ।
मनोरमे समे देशे प्रतिष्ठाप्यासनं स्थिरम् ॥ ८७ ॥

स्वस्तिकमथवा पद्मं आसनं परिकल्प्य च ।
समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ॥ ८८ ॥

विश्वादिकान् क्रमेणैव कार्यकारणवर्जिते ।
पूर्णात्मन्युपसंहृत्य पूर्णात्मना व्यवस्थितः ॥ ८९ ॥

ध्यायेत पुरिशयं देवं पूर्णानन्दं निरञ्जनम् ।
अपूर्वानपरं ब्रह्म नेति नेत्यादिलक्षणम् ॥ ९० ॥

उदयास्तदशाहीनज्ञानात्मना व्यवस्थितम् ।
अशनायाद्यसंस्पृष्टं परमात्माऽहमोमिति ॥ ९१ ॥

एवं युञ्जन् सदात्मानं परमात्मतया यदा ।
साक्षादयं विजानाति वीतशोको भवेत् तदा । ९२ ॥

निर्मुक्ताज्ञानतत्कार्यः कृतकृत्यो भविष्यति ।
परमः पुरुषार्थश्च विज्ञानादेव सिद्ध्यति ॥ ९३ ॥

तस्मात्तं परमात्मानं पूर्णानन्दमात्मतया ।
जानीयादहमस्मीति किंचिदन्यन्न चिन्तयेत् ॥ ९४ ॥

प्रसङ्गात्सर्वशास्त्रार्थः संक्षेपेण प्रदर्शितः ।
एवं निर्धारितं मृत्योः स्वरूपं तस्य चाधुना ॥ ९५ ॥

कार्यात्मनाऽप्यवस्थानं क्रमेणात्र प्रदर्श्यते ।

आस्यादेष निःसरते नराणां
क्रोधः प्रमादो मोहरूपश्च मृत्युः ।
अहंगतेनैव चरन् विमार्गान्
न चात्मनो योगमुपैति किंचित् ॥

एष मृत्युः प्रमादाख्यः प्रथमं चास्यरूपतः ॥ ९६ ॥

परिणामी भवेत् आस्यो ह्यभिमानस्वरूपकः ।
ततोऽहंकार एवास्यशब्देनात्र प्रदर्शितः ॥ ९७ ॥

अहङ्कारात्मना स्थित्वा ततः कामात्मको भवेत् ।
स्वार्थे प्रवर्तमानश्च यदा प्रतिहतः तदा ॥ ९८ ॥

स कामः क्रोधरूपेण नूनं निःसरते बहिः ।
ततस्तु मोहरूपोऽपि प्रमादो भवति क्रमात् ॥ ९९ ॥

अहंकारादिरूपेण तेनैवावस्थितेन च ।
तदात्मभावमापन्नो ब्राह्मणः क्षत्रियोऽपि वा ॥ १०० ॥

कृशः स्थूलोऽस्य पुत्रोऽहं अस्य नप्ता भवामि च ।
इत्येवमात्मको रागद्वेषादिभिः समन्वितः ॥ १०१ ॥

श्रौतस्मार्तविरुद्धेषु विमार्गेषु चरन्नयम् ।
नैवोपेत्यात्मनो योगं किंचित् समाधिलक्षणम् ॥ १०२ ॥

अथवात्रास्यशब्देन काम एवाभिधीयते ।
अविद्याकामकर्माणि संसारकारणानि हि ॥ १०३ ॥

पूर्वत्र मोह इत्युक्ता त्वविद्याऽग्रहणात्मिका ।
अन्यथाग्रहरूपा च कर्मोत्तरत्र वक्ष्यति ॥ १०४ ॥

इदानीमास्यशब्देन कामश्च गृह्यतां ततः ।
अस्यन्तेऽनेन क्षिप्यन्ते संसारे प्राणिनो यतः ॥ १०५ ॥

तस्मात् कामो भवेदास्यः कामोऽथवा यदास्यवत् ।
आस्यं स्यात् सर्वजग्धृत्वात् महाशन इति स्मृतेः ॥१०६॥

एष कामात्मना स्थित्वा ततः क्रोधात्मतां गतः ।
ततोऽहंकारमापन्नाज्ञानेनाऽहंममाह्वये ॥ १०७ ॥

फलके च समारूढचिदाभासेन संचरन् ।
विमार्गान् आत्मनो योगं समुपैति न किंचन ॥ १०८ ॥

ते मोहिताः तद्वशे वर्तमाना
इतः प्रेताः तत्र पुनः पतन्ति ।
ततस्तं देवा अनुपरिप्लवन्ते
अतो मृत्युं मरणाद्भ्युपैति ॥ ८ ॥

अहंकारादिरूपेण परिणतेन ते यदा ।
मोहिताः तेन देहादिष्वात्मभावं गतास्तदा ॥ १०९ ॥

अहंकारादिरूपेण स्थितस्याज्ञानरूपिणः ।
प्रमादाख्यस्य मृत्योश्च ते भवन्ति वशं गताः ॥ ११० ॥

ततः कालवशात्प्रेताः इतो धूमादिमार्गतः ।
परलोकं गतास्तत्र यावत्संपातमास्थिताः ॥ १११ ॥

आकाशवायुवृष्टयन्न रक्तशुक्लक्रमेण च ।
पुनः पतन्ति देहस्य ग्रहणायात्र भूतले ॥ ११२ ॥

देहग्रहणवेलायां तं देवा इन्द्रियाणि च ।
पूर्वकर्मानुसारेण प्लवन्ते हि समन्ततः ॥ ११३ ॥

समन्तात् परिवर्तन्ते तस्य गुणानुसारतः ।
मृत्युं मरणमेवैति ततोऽपि मरणात्पुनः ॥ ११४ ॥

जन्मान्तरमनुप्राप्य ततो मृत्युमुपैति च ।
एवं संसारबन्धाधिरूढः क्वापि न मुच्यते ॥ ११५ ॥

आत्माज्ञाननिमित्तत्वात् संसारस्य यदा दृढम् ।
आत्मत्वेन परात्मानं साक्षात् जानात्यसंशयम् ॥ ११६ ॥

तावत् तप्तः त्रिभिः तापैः रागादिभिरितस्ततः ।
मकराद्यैरिवाकृष्यमाणोऽसौ बहुधा पुनः ॥ ११७ ॥

भूयो मोमुह्यमानश्च संसरन्नत्रतिष्ठते ।
अविद्याकामयोः तावत् वर्णिता बन्धहेतुता ॥ ११८ ॥

कर्मणां बन्धहेतुत्वं इदानीं उच्यते स्फुटम् ।

कर्मोदये कर्मफलानुरागाः
तत्रानुयान्ति न तरन्ति मृत्युम् ।
सदर्थयोगानवगमात् समन्तात्
प्रवर्तते भोगयोगेन देही ॥ ९ ॥

अमृत्युः कर्मणा केचित् इति केषांचिदेव हि ॥ ११९ ॥

मतान्तरमुपन्यस्तं तन्निराक्रियतेऽधुना ।
केवलं कर्मणा नैवामृतत्वं भवतीति न ॥ १२० ॥

किंतु कर्मोदये तावत् उत्पत्तावेव कर्मणाम् ।
कर्मफलानुरागास्ते तत्र तत्कर्मणां फले ॥ १२१ ॥

अनुयान्ति यतः तस्मात् न हि मृत्युं तरन्ति ते ।
संसारे परिवर्तन्ते जन्ममृत्युस्वभावके ॥ १२२ ॥

कस्मात्ते परिवर्तन्ते ? सदर्थेन परात्मना ।
योगः तस्यानवगमात् अज्ञानात् स्वस्य चात्मनः ॥

चिदानन्दाद्वितीयस्य ब्रह्मभूतस्य सर्वशः ।
समन्तात् भोगयोगेन समन्ततः प्रवर्तते ॥ १२४ ॥

विषयेषु रसभ्रान्त्या निम्नोन्नतस्थलादिषु ।
यथा परिभ्रमत्यन्धो देही चैवमसावपि ॥ १२५ ॥

विवेकहीनः सर्वत्र विषये सुखकांक्षया ।
परिभ्रमति संसारे मोहग्रस्तः पुनः पुनः ॥ १२६ ॥

तद्धै महामोहनमिन्द्रियाणां
मिथ्यार्थयोगेऽस्य गतिर्हि नित्या ।
मिथ्यार्थयोगाभिहतान्तरात्मा
स्मरन्नुपास्ते विषयान् समन्तात् ॥

यदि रागाभिभूतस्य विषयेष्वेव वर्तनम् ।
इन्द्रियाणां समस्तानां महामोहनमुच्यते ॥ १२७ ॥

विषयेऽवस्तुताबुद्धिः यस्य तस्येन्द्रियाणि च ।
विषये न प्रवर्तन्ते तस्य प्रवृत्त्यभावतः ॥ १२८ ॥

आत्मन्येव प्रवृत्तिस्स्यात् ततो मोहनिवर्तनम् ।
विषये वस्तुताबुद्धिः यस्य तस्येन्द्रियाणि तु । १२९ ॥

विषये च पराग्भूते प्रवृत्तानि यतः ततः ।
प्रत्यग्भूतं स नाद्वैतं साक्षात् जानाति तत्त्वतः ॥ १३० ॥

आत्मत्वेन परात्मानं तन्महामोहतः पुनः ।
विषयेषु प्रवृत्तिः स्यात् अविद्यापरिकल्पितैः ॥ १३१ ॥

शब्दादिविषयैः योगो मिथ्यार्थैः भवति ध्रुवम् ।
मिथ्यार्थयोगे संजाते संसारे देहिनां गतिः ॥ १३२ ॥

नित्या च नियता नूनं लोके प्रसिद्धमेव तत् ।
स्वात्मभूतं परात्मानं अज्ञात्वा विषयेषु ये ॥ १३३ ॥

वर्तमानाः पराग्भूताः तिर्यगादिषु योनिषु ।
जन्म ते प्राप्नुवन्तीति, कस्मान्नित्या भवेत् गतिः ॥

मिथ्याविषयसंयोगात् हतब्रह्मात्मभावतः ।
अन्तरात्मा हतो यस्य स स्त्र्यादिविषयान् स्मरन् ॥१३५॥

तानेव सर्वदोपास्ते समन्ताच्च समन्ततः ।
नैवायं परमात्मानं उपास्ते हि कदाचन ॥ १३६ ॥

ततः किमिति चेत्तत्र यद्भवति च तत् शृणु ।

अभिध्या वै प्रथमं हन्ति चैनं
कामक्रोधौ गृह्य चैनं तु पश्चात् ।

एते बालान् मृत्यवे प्रापयन्ति
धीरास्तु धैर्येण तरन्ति मृत्युम् ॥

अभिध्या विषयध्यानं हन्ति प्रथममादितः ॥ १३७ ॥

नाशयति स्वरूपाद्धि प्रच्यवनं करोति तत् ।
अभिध्याभिहतं चैनं शीघ्रं विषयसन्निधौ ॥ १३८ ॥

नीत्वा प्रगृह्य कामोऽपि हन्ति तेन हतं पुनः ।
प्रगृह्य हन्ति कोपश्च सर्वे ध्यानादयः ततः ॥ १३९ ॥

तानेतान् विषयध्यानकामक्रोधवशं गतान् ।
विवेकरहितान् बालान् मूढांश्च मृत्यवे तदा ॥ १४० ॥

प्रापयन्ति प्रयच्छन्ति, ये धीराः सन्ति ते पुनः ।
धैर्येण विषयान् जित्वा परमात्मानमञ्जसा ॥ १४१ ॥

आत्मत्वेन सुविज्ञाय मृत्युं नूनं तरन्ति हि ।
धैर्येण विषयान् जित्वा मृत्युं तरन्ति ते कथम् ? । १४२ ॥

योऽभिध्यायन्नुत्पतिष्णून् निहन्यात्
अनाचारेणाप्रतिबुध्यमानः ।
स वै मृत्युं मृत्युरिवात्ति भूत्वा
ह्येवं विद्वान् योऽभिहन्तीह कामान् ॥

अनित्याशुचिदुःखानुविद्धा हि विषया इति ।
उत्पतिष्णूनभिध्यायन् निहन्याचान् परित्यजेत् । १४३ ॥

औदासीन्यादनादृत्य चामेध्यदर्शने यथा ।
अप्रतिबुध्यमानस्सन् पुनरेतान्यचिन्तयन् ॥ १४४ ॥

स मृत्योरपि मृत्युस्सन् मृत्युमेवात्ति मृत्युवत् ।
अनित्यत्वादिरूपेण विद्वाननादराादिना ॥ १४५ ॥

अभिहन्त्यखिलान् कामान् एवमनादरादिना ।
नाभिहन्ति हि यः कामान् समस्तान् किं करोति सः ॥

कामानुसारी पुरुषः कामाननु विनश्यति ।
कामान् व्युदस्य धुनुते यत्किंचित् पुरुषो रजः ॥

यः पुनः विषयध्यानात् कामानुसारितां गतः ।
स कामविषये नष्टे कामैस्सह विनश्यति ॥ १४७ ॥

कामगुणा अनित्या हि प्रतिक्षणविनाशिनः ।
तद्वत्कामी पुमानेष विशीर्णो भवति ध्रुवम् ॥ १४८ ॥

यः पुनः पुरुषः कामान् विषये दोषदर्शनात् ।
परित्यजति सर्वान् सः परित्यज्य व्युदस्य हि ॥ १४९ ॥

विवेकबुद्ध्या धुनुते जन्मनीह परत्र वा ।
उपार्जितं रजः कर्म पुण्यपापादिलक्षणम् ॥ १५० ॥

निरवशेषतः सर्वं यत्किंचित् ध्वंसयत्ययम् ।
हेयत्वं काम्यमानस्य देहस्यास्य कथं भवेत् ॥ १५१ ॥

इत्याशङ्क्य समाधत्ते भगवान् ब्रह्मणस्सुतः ।

देहोऽप्रकाशो भूतानां नरकोऽयं प्रदृश्यते ।
गृध्यन्त एव धावन्ति गच्छन्तः श्वभ्रमुन्मुखाः ॥

भूतानां दृश्यते योऽयं देहोऽप्रकाश एव सः ॥ १५२ ॥

तमोऽचिद्घन एवासौ केवलं नरको हि सः ।
श्लेष्मासृक् पूयविण्मूत्र क्रिम्यादिपरिपूरितः ॥ १५३ ॥

एवं अत्यन्तबीभत्सं गृध्यन्तः स्त्र्यादिदेहकम् ।
रम्यबुद्ध्याऽभिकांक्षन्तः एव धावन्ति तं प्रति ॥ १५४ ॥

अन्धाः कूपादिकं श्वभ्रं विवेकतुपक्षमा यथा ।
गच्छन्त उन्मुखास्तत्र पतन्ति स्त्र्यादिकं तथा ॥ १५५ ॥

उन्मुखाः अभिकांक्षन्तः पतन्ति नरकेष्वपि ।
विषयाख्यविषेणान्धाः विवेचन विवर्जिताः ॥ १५६ ॥

गृध्यन्तो ये हि धावन्ति तेषां देहो निरर्थकः ।

अमन्यमानः क्षत्रिय कश्चिदन्यं
नाधीयते तार्ण इवास्य व्याघ्रः ।

क्रोधाल्लोभान्मोहभयान्तरात्मा
स वै मृत्युः त्वच्छरीरे य एषः ॥ १५ ॥

स्त्र्याद्यभिकांक्षया यस्तु विषयान्धोनुधावति ॥ १५७ ॥

स स्त्र्यादिव्यतिरेकेणामन्वानो वस्तु किंचन ।
स्वात्मभूतं परात्मानं अमन्यमान एव सः ॥ १५८ ॥

अप्रतिबुध्यमानस्सन् नाधीयते तदात्मनः ।
संबन्ध्यध्यात्मशास्त्रं स कदापि नाधिगच्छति ॥ १५९ ॥

तस्यास्य विषयान्धस्य साङ्गवेदविदोऽपि च ।
देहः तृणैः समारब्धव्याघ्रस्येव निरर्थकः ॥ १६० ॥

नैतावान् केवलं देहः स तस्य मृत्युरेव च ।
क्रोधलोभाख्यहेतुभ्यां भयमोहसमन्वितः ॥ १६१ ॥

त्वच्छरीरेऽन्तरात्मा यः तवात्मा त्वेष दृश्यते ।
स एव तव मृत्युस्स्यात् यः पुनरजितेन्द्रियः ॥ १६२ ॥

क्रोधलोभादिसंयुक्तः विषयेषु प्रवर्तते ।
स एव तस्य मृत्युः स्यात् विनाशे कारणं यतः ॥ १६३ ॥

केन वा तद्युपायेन मृत्योः नाश इतीर्यते ।

एवं मृत्युं जायमानं विदित्वा
ज्ञानेन तिष्ठन्न बिभेति मृत्योः ।

विनश्यते विषये यस्य मृत्युः
मृत्योर्यथा विषयं प्राप्य मर्त्यः ॥ १६ ॥

एवं क्रोधादिरूपेण जायमानं इमं सदा ॥ १६४ ॥

जन्ममृत्य्वादिरूपस्य सर्वानर्थस्य कारणम् ।
प्रमादनामकं मृत्युं विदित्वा च विचारतः ॥ १६५ ॥

क्रोधादीन् भूतदाहीयान् त्यक्त्वा दोषानशेषतः ।
अक्रोधादींश्च संपाद्य ज्ञानेनाद्वयरूपिणि ॥ १६६ ॥

ब्रह्मणि चित्सदानन्दे तिष्ठन् मृत्योर्बिभेति न ।
विषये ज्ञानिनस्तस्य गोचरे परमात्मनि ॥ १६७ ॥

सुसाक्षात्क्रियमाणे च प्रमादाख्यो विनश्यते ।
संसारं विषयं मृत्योः आगतं मृत्युना यथा ॥ १६८ ॥

अभिभूतो भवेन्नष्टः तथैवास्यात्मवेदिनः ।
विषयं चागतोऽज्ञानमृत्युः नष्टो भवत्ययम् । १६९ ॥

एतावता हि संप्रोक्ता कर्मणां बन्धहेतुता ।
मोक्षसाधनता चापि ज्ञानस्यैवेति कीर्तिता ॥ १७० ॥

धृतराष्ट्रश्च तच्छ्रुत्वा पृच्छत्येवं महामुनिम् ।

धृतराष्ट्र उवाच —

यानेवाहुरिज्यया साधुलोकान्
द्विजातीनां पुण्यतमान् सनातनान् ।
तेषां परार्थं कथयन्तीह वेदाः
एतद्विद्वान्नैति कथं नु कर्म ॥ १७ ॥

कर्मणां बन्धहेतुत्वं कथं भवति यावता ॥ १७१ ॥

इज्यया कर्मणा ज्योतिष्टोमादिना हि साधुभिः ।
आरूढान् धार्मिकैर्लोकान् यानेवाहुः सनातनान् ॥१७२॥

पुण्यतमान् पवित्रांश्च तेषां वेदाः ब्रुवन्ति हि ।
ब्रह्मलोकावसानानां लोकानां च परार्थताम् ॥ १७३ ॥

परमपुरुषार्थत्वं इह संसारमण्डले ।
लोकानां तत्परार्थत्वं विद्वान् कर्म तु साधनम् ॥ १७४ ॥

कथं नैत्यवतिष्ठेत, लोकानां वापि साधनम् ।
कर्म च ब्रह्मवित् विद्वान् कथं नैति न गच्छति ॥ १७५ ॥

सनत्सुजात उवाच —

एवं ह्यविद्वान् परियाति तत्र
तथार्थजातं च वदन्ति वेदाः ।

स नेहायाति परं परात्मा
प्रयाति मार्गेण निहन्त्यमार्गान् ॥ १८ ॥

अविद्वान् विषयैरन्धः ब्रह्मलोकादिकं सुखम् ।
मन्वानः परियात्यत्र ब्रह्मलोकादिसाधने ॥ १७६ ॥

कर्मण्यस्मिंस्तु नो विद्वान् अविद्यादोषदर्शनात् ।
तथाऽविदुषः तस्यैव ह्यर्थजातं प्रयोजनम् ॥ १७७ ॥

वेदा वदन्ति तस्मान्न विद्वान् स नश्वरे सुखे ।
ब्रह्मलोकादिके तस्य साधने वाऽपि कर्मणि ॥ १७८ ॥

नेहायाति प्रवर्तेत, किंवा तर्हि करोति सः ।
आत्मत्वेन परात्मानं अवगम्य दृढं ततः ॥ १७९ ॥

परमात्मा स्वयं ब्रह्म भूत्वा प्रयात्यसौ परम् ।
अमार्गान् हन्ति संसारहेतुभूतान् किलात्मनः ॥ १८० ॥

विरुद्धाः सन्ति ये धर्माधर्माद्युपासनादयः ।
मार्गान् तान् हन्ति मार्गेण विनाशयत्यशेषतः ॥ १८१ ॥

विद्वानित्यत्र पाठे तु सगुणं ब्रह्म गृह्यताम् ।
तद् विद्वान् ब्रह्मलोकादौ प्राप्नोत्युपासनाफलम् । १८२ ॥

अर्थजातं वदन्त्यस्य स नेहायाति कर्मिवत् ।
अस्मिन्न जायते लोके किंतु सर्वान् निहन्ति सः । १८३ ॥

ब्रह्मोपासनयाऽमार्गान् तत्र गत्वा निहत्य तान् ।
परात्मा सन् स कालेन परं ब्रह्म प्रयाति च ॥ १८४ ॥

ग्रन्थेनैतावता प्रोक्तं ऐक्यं जीवपरात्मनोः ।
राजा त्वसहमानस्तत् पप्रच्छैवं तदा मुनिम् ॥ १८५ ॥

धृतराष्ट्र उवाच —

कोऽसौ नियुङ्क्ते तमजं पुराणं
स चेदिदं सर्वमनुक्रमेण ।
किंवाऽस्य कार्यं अथवाऽसुखं च
तन्मे विद्वन् ब्रूहि सर्वं यथावत् ॥ १९ ॥

सत्यादिलक्षणोऽप्यात्मा स एवानुक्रमेण च ।
आकाशादिधरित्र्यन्तं जगत् सृष्ट्वा प्रविश्य तत् ॥

अन्नमयादिरूपेण संसरन् संस्थितो यदि ।
सत्यादिलक्षणं कोऽन्यः नियुङ्क्ते प्रेरयत्यमुम् ॥ १८७ ॥

अजं पुराणं संसारे, किमन्येन स हि स्वयम् ।
करोति चेत् तदा तस्य नानाविधासु योनिषु ॥ १८८ ॥

वर्तमानस्य किं कार्यं भवेत्तस्मात् प्रयोजनम् ।
तथाऽप्रवर्तमानस्य तूष्णींभूतस्य चाथवा । १८९ ॥

स्वे महिम्नि स्थितस्यास्य संसारे चाप्रवेशनात् ।
किं वाऽसुखं अनर्थं स्यात् यथावद् ब्रूहि मेऽखिलम् ।।

सनत्सुजात उवाच —

दोषो महानत्र विभेदयोगे
ह्यनादियोगेन भवन्ति नित्याः ।
तथाऽस्य नाधिक्यमपैति किञ्चित्
अनादियोगेन भवन्ति पुंसः ॥ २० ॥

प्रेर्यत्वप्रेरकत्वादि विभिन्नत्वस्य दर्शनात् ।
एकस्य च कूटस्थस्य तदसंभवहेतुना । १९१।।

भवितव्यं हि भेदेनेत्यभिप्रायः तवेति चेत् ।
ब्रह्मण एव नानात्वं अभ्युपगम्यते यदि । १९२ ।।

महानत्र भवेद्दोषोऽद्वैतिनोऽतथ्यवादिनः ।
अवैदिका भवेयुश्च वेदस्य हृदयं तथा ।। १९३ ।।

अद्वैतं परमार्थं सत् बाधितं स्यात् तथैव च ।
नानारूपेण संस्थानात् दोषोऽप्यनित्यतादिकः ।। १९४ ।।

अस्थूलादिकवाक्यानां विरोधोऽपि प्रसज्यते ।
नास्माभिः ब्रह्मनानात्वं परं अभ्युपगम्यते ।। १९५ ।।

जीवात्मपरयोरेव विभेदोऽभ्युपगम्यते ।
इति चेद्दोषस्तत्रापि भवत्येव न संशयः ॥ १९६ ॥

श्रुतिस्मृतिपुराणाद्यैः भेदबुद्धिर्हि निन्दिता ।
तद्विरुद्धमतस्यास्यावैदिकत्वं प्रसज्यते ॥ १९७ ॥

तव पक्षे कथं तर्हि जीवेशादि विभिन्नता ।
भेदेन व्यवहारश्च ? कथं तेषां च नित्यता ॥ १९८ ॥

मायाऽनादिरविद्याख्या तद्योगेन भवन्ति हि ।
जीवादयोऽखिला नित्याः अद्वैतस्य परात्मनः ॥ १९९ ॥

मायया बहुरूपत्वं उपपन्नं श्रुतेरपि ।
एकस्यैव भवेद्यस्मात् मायया बहुरूपता ॥ २०० ॥

स एव कारणात्मा सन् कार्यात्मानं महेश्वरः ।
जीवात्मानं नियुङ्क्ते च यथावत् मायया स्वयम् ॥२०१॥

कृतप्रयत्नसापेक्षः न संसरति वस्तुतः ।
संसारयति वाऽप्येषः इति शास्त्रेषु घोषणम् ॥ २०२ ॥

मायानिमित्तके भेदे सिद्धे च परमात्मनः ।
कार्यकारणरूपेण व्यवस्थितस्य तस्य च ॥ २०३ ॥

स्वरूपतो यदाधिक्यं तन्नैवापैति किञ्चन ।
संसृतेः मायिकत्वात् सः कूटस्थ एव पूर्ववत् ॥ २०४ ॥

तस्मादनादियोगेन योगेनानाद्यविद्यया ।
पुंसः पुमांसो जीवाश्च भवन्ति बहवस्तदा ।
पुंसो वा पुरुषस्यैव पूर्णस्य परमात्मनः ॥ २०५ ॥

अनादिसिद्धा या माया तद्योगेन भवन्ति ते ।
एतदेवानुगीतासु ब्रह्माण्डे च प्रपञ्चितम् ॥ २०६ ॥

विविदिषोः मुमुक्षोश्चाधिकारः सर्वकर्मणाम् ।
नूनं संन्यास एवेति भाष्ये प्रोक्तं प्रसङ्गतः ॥ २०७ ॥

अनादिमायायोगेनैकस्यैव परमात्मनः ।
संप्रोक्तं बहुरूपत्वं इदानीं ईश्वरस्य यत् ॥ २०८ ॥

जगतः कारणत्वं तत् मायोपाधिकमेव हि ।
इत्यत्र भगवान् श्लोके स्पष्टमाह महामुनिः ॥ २०९ ॥

यदेतदद्धा भगवान् स नित्यं
विकारयोगेन करोति विश्वम् ।
तथाच तच्छक्तिरिति स्म मन्ये
तदर्थयोगे च भवन्ति वेदाः ॥ २१ ॥

यत्परमार्थभूतोऽपि भगवान् परमेश्वरः ।
ऐश्वर्यादि समायुक्तः ईक्षणादिपुरस्सरम् ॥ २१० ॥

नित्यं विकारयोगेन विश्वं करोति चेति तत् ।
सर्वं मन्येऽस्य तच्छक्तिः शक्तिर्या परमात्मनः ॥ २११ ॥

मायैव सा करोतीति नात्माऽपूर्वादिलक्षणः ।
चिदानन्दाऽद्वितीयस्य कारणत्वं न हि स्वतः ॥ २१२ ॥

मायावेशवशादेव तस्य कारणता भवेत् ।
शक्तियोगे प्रमाणं किं तस्य च परमात्मनः ॥ २१३ ॥

जगतो यदुपादानं तेन मायाख्यवस्तुना ।
संयोगविषये वेदाः प्रमाणं हि भवन्ति ते ॥ २१४ ॥

ईशस्य मायासद्भावे वेदानां हि प्रमाणता ।
ततः कर्मस्वरूपं च ज्ञातुं राजेदमब्रवीत् ॥ २१५ ॥

धृतराष्ट्र उवाच —

यस्माद्धर्मानाचरन्तीह केचित्
तथाऽधर्मान् केचिदिहाचरन्ति ।
धर्मः पापेन प्रतिहन्यते वा
उताहो धर्मः प्रतिहन्ति पापम् ॥ २२ ॥

अग्निहोत्रादिकान् धर्मान् आचरन्तीह केचन ।
अत्र लोके तथाऽधर्मान् केचनेहाचरन्ति च ॥ २१६ ॥

किं तथाचरतां धर्मः पापेन प्रतिहन्यते ।
पापं हन्त्यथवा धर्मः तुल्यबलबतोऽथवा ॥ २१७ ॥

अन्यतरेण किं नाशः अन्यतरस्य भवेदिति ।

अविदुषो भवेदेवानुभवश्चोभयोरपि ॥ २१८ ॥
अन्यतरेण नान्यस्य भवेन्नाशः कदाचन ।
ज्ञानाग्निना पुनर्नाशः विदुषस्तूभयोरपि ॥ २१९ ॥
इत्युत्तरं ततः प्राह भगवान् ब्रह्मणस्सुतः ।

सनत्सुजात उवाच —

तस्मिन् स्थितो वाऽप्युभयं हि नित्यं
ज्ञानेन विद्वान् प्रतिहन्ति सिद्धम् ।
अथान्यथा पुण्यमुपैति देही
तथाऽऽगतं पापमुपैति सिद्धम् ॥ २३ ॥

पुण्यापुण्यात्मके तस्मिन् विद्वांश्चेत् कर्मणि स्थितः ॥२२०॥
कुर्वन्नप्युभयं कर्म पुण्यापुण्यस्वरूपकम् ।
ज्ञानेन प्रतिहन्त्येव नित्यं तत् नियमेन च ॥ २२१ ॥
नूनं विनाशयत्येषः इति सिद्धं प्रमाणतः ।
श्रुतिस्मृतिपुराणेषु बहुधेदं प्रदर्शितम् ॥ २२२ ॥
अथ ज्ञानविहीनश्चेत् देही पुण्यं तथाऽऽगतम् ।
पापं च तत्फलं भुङ्क्ते तच्च सिद्धं प्रमाणतः ॥ २२३ ॥

गत्वोभयं कर्मणा भुज्यतेऽस्थिरं
शुभस्य पापस्य स चापि कर्मणा ।

धर्मेण पापं प्रणुदतीह विद्वान्
धर्मो बलीयानिति तस्य विद्धि ॥ २४ ॥

गत्वा प्राप्य परं लोकं पुण्यापुण्याख्यकर्मणा ।
पुण्यापुण्यैश्च यत् साध्यं भुज्यते फलमस्थिरम् ॥ २२४ ॥
यो विद्वान् विनियोगज्ञः वक्ष्यमाणगुणान्वितः ।
ईश्वरार्थं चरन् कर्म तस्य धर्मोऽशुभादपि ॥ २२५ ॥
बलीयानिति विद्धि त्वं नतु केवलकर्मिणः ।
किंतु तस्योभयोरेव भोगो न नाशः कस्यचित् ॥ २२६ ॥
चित्तशोधनमार्गेण केषां तत् ज्ञानसाधनम् ।
स्वर्गादिसाधनं केषां इत्यत्र स्फुटमुच्यते ॥ २२७ ॥

येषां धर्मेषु विस्पर्धा बले बलवतामिव ।
ते ब्राह्मणा इतः प्रेत्य स्वर्गे यान्ति प्रकाशताम् ॥
येषां धर्मे न च स्पर्धा तेषां तत् ज्ञानसाधनम् ।
ते ब्राह्मणा इतो मुक्ताः स्वर्गं यान्ति त्रिविष्टपम् ॥

स्वर्गादिवासे येषां तु तद्भोगश्रवणादिना ।
तस्य साधनभूतेषु ज्योतिष्टोमादिकर्मसु ॥ २२८ ॥
विस्पर्धा तत्र संघर्षः वर्तते विषयैषिणाम् ।
अस्मादप्यधिकं धर्मं कृत्वाऽहं स्यां इतः सुखी ॥ २२९ ॥

यथा बलवतां राज्ञो बलवत्तां विलोक्य च ।
बलवत्तामितः श्रेष्ठां संपाद्यैनं विजित्य च ॥ २३० ॥

सुख्यस्मादपि भूयासं इति स्पर्धा भवेत् तथा ।
फले सङ्गसमायुक्ताः विप्रा यज्ञादिकारिणः ॥ २३१ ॥

इतो धूमादिमार्गेण प्रेत्य गत्वा प्रयान्ति ते ।
नक्षत्रादिस्वरूपेण प्राप्नुवन्ति प्रकाशताम् ॥ २३२ ॥

येषां पुनर्न संघर्षः भोगानाकृष्टचेतसाम् ।
ज्योतिष्टोमादिके धर्मे चानित्यफलसाधने ॥ २३३ ॥

स्पर्धा न वर्तते तेषां फलानि निरपेक्ष्य च ।
यज्ञाद्यानखिलान् धर्मान् ईशार्थमनुतिष्ठताम् ॥ २३४ ॥

चित्तशुद्धिप्रणाल्या ते भवन्ति ज्ञानसाधनम् ।
यज्ञादिकर्मभिस्त्वेवं शुद्धसत्वा भवन्ति ये ॥ २३५ ॥

आत्मत्वेनावगच्छन्तः परमात्मानं ते इतः ।
अस्माल्लोकात् गताः प्रेत्य कार्यकारणलक्षणात् ॥ २३६ ॥

मुक्ता यान्ति तदा स्वर्गं पूर्णानन्दं सुखात्मकम् ।
प्राप्नुवन्ति परं ब्रह्म प्रोच्यते यत् त्रिविष्टपम् ॥ २३७ ॥

आध्यात्मिकादिभिः तापैः त्रिभिर्वा जाग्रदादिभिः ।
सत्वादिभिः विमुक्तं वा स्वरूपाविष्टमेव वा ॥ २३८ ॥

अधिकारिणं तैर्विष्टं पातीति तत् त्रिविष्टपम् ।
सन्यस्य सर्वकर्माणि ब्रह्मचर्यपदादपि ॥ २३९ ॥

वेदान्तश्रवणं कृत्वा यः स्वे महिमनि स्थितः ।
परिव्राजकवर्यस्य परहंसस्य तस्य च ॥ २४० ॥

विदुषस्तु समाचारं इदानीमाह विस्तरात् ।

तस्य सम्यक् समाचारं आहुः वेदविदो जनाः ।
नैनं मन्येत भूयिष्ठं बाह्यमाभ्यन्तरं जनम् ॥

नैनं योगिनं मन्येत भूयिष्ठं बहु कश्चन ॥ २४१ ॥

पुत्रमित्रकलत्रादिजनं आभ्यन्तरं स्मृतम् ।
इतरत्तु जनं बाह्यं पुत्रमित्रादयो यथा ॥ २४२ ॥

एनं केचित् न गृह्णन्ति तथा तेषामगोचरः ।
सर्वदा वर्ततामेषः, वासो देशेऽस्य कीदृशे ॥ २४३ ॥

यत्र मन्येत भूयिष्ठं प्रावृषीव तृणोदकम् ।
अन्नपानं च ब्राह्मणः तज्जीवेन्नानुसंज्वरेत् ॥

यस्मिन् देशेऽन्नपानादि मृगपीडादिवर्जिते ।
भूयिष्ठं बहुलं लभ्यं प्रावृषीव तृणोदकम् ॥ २४४ ॥

वर्षाकाले यथा तद्वत् प्राप्यं मन्येत तत्र च ।
स्थित्वा तदन्नपानादि भुक्त्वा जीवेत् यथासुखम् ॥ २४५ ॥

नैवानुसंञ्चरेत् किंचित् संतप्तो न भवेत् क्वचित् ।
अन्यथा ह्यन्नशानादिहीने देशे वसन्नयम् ॥ २४६ ॥

देहयात्रा कथं सिद्धयेत् इति संतापवान् भवेत् ।
योगसिद्धिः ततो न स्यात् तस्मात् देशस्य मुख्यता ॥

तृणोदकमिति स्थाने यदि पाठः तृणोलपम् ।
तदा ह्युलपशब्देन मुनिभोज्यान्नमुच्यते ॥ २४८ ॥

पूज्य दूर्वाविशेषो वा प्रोच्यते इति केचन ।

यत्राकथयमानस्य प्रयच्छत्यशिवं भयम् ।
अतिरिक्तमिवाकुर्वन् स श्रेयान्नेतरो जनः ॥

वासः समीपे तत्रापि जनस्यैवंविधस्य च ॥ २४९ ॥

यत्राकथयमानोऽयं छादयन्स्वमहात्मताम् ।
येन केनचिदाच्छन्नः येन केनचिदाशितः ॥ २५० ॥

यत्र क्वचन शायी च तूष्णींभूतो भवेन्मुनिः ।
आत्मानमेव संपश्यन् ज़डमूकपिशाचवत् ॥ २५१ ॥

बालादिवत् चरन्नास्ते लोकेऽस्मिन् तस्य योगिनः ।
अशिवं अवमानादि भयं चापि प्रयच्छति ॥ २५२ ॥

जनः स विदुषः श्रेयान् न श्रेयानितरो जनः ।
यथा कश्चित् स्थितप्रज्ञ लक्षणज्ञोऽयमात्मवित् ॥ २५३ ॥

इति ज्ञात्वा नमस्कारप्रणिपातादिपूर्वकम् ।
पूजयेत् ईशबुद्धयेमं तथाऽज्ञाततया वसन् ॥ २५४ ॥

ब्राह्मणजातिमात्रस्य युक्तपूजातिरेकतः ।
ब्रह्मविदोऽनुरूपां च पूजामन्यां न कारयन् ॥ २५५ ॥

यो जनोऽस्यावमानादि कुर्वन्नेव हि वर्तते ।
स श्रेयान्, नेतरो यो हि प्रणिपातादिपूर्वकम् ॥ २५६ ॥

एनमीश्वरबुद्धया च संपूजयति भक्तितः ।
तेन च कीदृशस्यान्नं भवेत् भोज्यं इतीर्यते ॥ २५७ ॥

यो वाऽकथयमानस्य ह्यात्मानं नानुसंज्वरेत् ।
ब्रह्मस्वं नोपहन्याद्वा तदन्नं संमतं सताम् ॥

यो वाऽकथयमानस्य तूष्णींभूतस्य योगिनः ।
कृत्वा सर्वोपसंहारं स्थितस्यास्य महात्मनः ॥ २५८ ॥

नात्मानं संज्वरेत् किंचित् तापयेन्न कदाचन ।
ब्रह्मस्वं ब्रह्मनिष्ठायाः साधनं पुस्तकादिकम् ॥ २५९ ॥

चेलाजिनकुशाद्यं वा नोपहन्यात् कदापि यः ।
ब्राह्मणस्य स्वमन्यद्वा न पीडयति तस्य हि ॥ २६० ॥

अन्नं ब्रह्मविदा भोज्यं इत्येतत् संमतं सताम् ।
पुनश्चापि समाचारं तस्यैव कीर्त्यतेऽधुना ॥ २६१ ॥

नित्यमज्ञातचर्या मे इति मन्येत ब्राह्मणः ।
ज्ञातीनां तु वसन्मध्ये नैव विन्देत किंचन ॥

नित्यमज्ञातचर्या मे नियमेन सदा मया ।
कर्तव्या गूढचर्येति ब्रह्मवित् भावयेत् सदा ॥ २६२ ॥

पुत्रमित्रकलत्रादिज्ञातीनां सन्निधौ वसन् ।
नैव किंचन विन्देत किंचिद्वा न लभेत सः ॥ २६३ ॥

पुत्रमित्रकलत्रादि परित्यज्य स केवलम् ।
स्वात्मनिष्ठो भवेन्नित्यं गूढचारी च सर्वदा ॥ २६४ ॥

ईदृशस्यैव मोक्षः स्यात् ज्ञाननिष्ठास्थिरलक्षणः ।
विक्षेपाणां तु बाहुल्यात् नान्यस्य भवति क्वचित् ॥

अज्ञाते चक्षुरादेर्वाऽगम्ये वाचामगोचरे ।
उदयास्तमयातीत ज्ञानात्मना स्थितस्य च ॥ २६६ ॥

अशनायाद्यसंस्पृष्टे पूर्णानन्दस्वरूपके ।
सर्वान्तरे प्रत्यग्भूते चर्या समाधिलक्षणा ॥ २६७ ॥

निष्ठा ब्रह्मणि कर्तव्या, पराग्भूते शरीरके ।
इन्द्रिये वा कलत्रादौ पुत्रमित्रादिकेऽथवा ॥ २६८ ॥

न कर्तव्या, कृशः स्थूलः क्लीबो वा बधिरोऽस्म्यहम् ।
काणो गच्छामि तिष्ठामि मूकोऽमुष्य सुतोऽस्म्यहम् ॥

एतस्य वाऽस्मि नष्टाऽहं ब्राह्मणः क्षत्रियोऽथवा ।
भार्येयं मम पुत्रो मे विभवः स्निग्धबान्धवाः ॥ २७० ॥

सुहृदः सन्तु मे सर्वे नैव मन्येत तत्त्ववित् ।
ज्ञातयो वा समाख्याताः विषयाश्चेन्द्रियाणि च ॥ २७१ ॥

तेषां मध्ये वसन् पश्यन् शृण्वन् जिघ्रन् गच्छन् स्पृशन् ।
अश्नन्वा मन्यमानो वा विजानन्नपि कर्हिचित् ॥ २७२ ॥

नैवात्मानं प्रमात्रादिरूपेण प्रतिपद्यते ।
साक्षित्वादात्मनस्तेषां देहद्वयं च तद्गुणान् ॥ २७३ ॥

आत्मत्वेन न गृह्णीयात् इत्यर्थो विशदीकृतः ।
एवं न गृह्यते कस्मात् इति श्लोकेन कीर्त्यते ॥ २७४ ॥

को ह्येवमन्तरात्मानं ब्राह्मणो मन्तुमर्हति ।
निर्लिङ्गमचलं शुद्धं सर्वद्वन्द्वविवर्जितम् ॥ ३२ ॥

आत्मानं को हि निर्लिङ्गं स्थूलसूक्ष्मविवर्जितम् ।
अचलं कर्मकर्त्रादिशून्यं शुद्धं विनिर्मलम् ॥ २७५ ॥

अविद्यादोषरहितं सर्वद्वन्द्वविवर्जितम् ।
अशनायापिपासे च शोकमोहौ जरामृती ॥ २७६ ॥

शीतोष्णे सुखदुःखाद्याः द्वन्द्वशब्देन कीर्तिताः ।
एतद्धर्मविहीनं तं अन्तरात्मानमेव च ॥ २७७ ॥

सर्वान्तरं प्रमात्रादिसाक्षिणं मानदूरगम् ।
स्थूलोऽहं बधिरः काणः मूको दुःखी सुखी कृशः॥२७८॥

इत्याद्युक्तप्रकारेण शरीरद्वयधर्मिवत् ।
ब्राह्मणः संश्च को ह्येवं आत्मानं मन्तुमर्हति ॥ २७९ ॥

मन्यते यदि हीयेत ब्राह्मणत्वं न संशयः ।
एवं च मनुते यस्तु पापीयान् स इतीर्यते ॥ २८० ॥

योऽन्यथा सन्तमात्मानं अन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चोरेणात्मापहारिणा ॥

निर्लिङ्गमचलं शुद्धं सर्वद्वन्द्वविवर्जितम् ।
आत्मानं चित्सदानन्दाद्वैतब्रह्मात्मना स्थितम् ॥ २८१ ॥

देहद्वयतद्धर्मीति कर्ता भोक्ता कृशः सुखी ।
दुःखी स्थूलोऽस्य पुत्रोऽहं नप्ता वा ब्राह्मणोऽस्म्यहम् ॥

क्षत्रियो वाहमित्येवं आत्मना प्रतिपद्यते ।
किं अनात्मविदा तेन मूर्खेणात्मापहारिणा ॥ २८३ ॥

न कृतं आत्मचोरेण पापं तेनाखिलं कृतम् ।
महापातकमित्यर्थः तस्मात् अज्ञात एव सः ॥ २८४ ॥

आत्मभावं परित्यज्य विषयेष्विन्द्रियादिषु ।
वागाद्यगोचरे तत्त्वे निष्ठां कुर्यात् परात्मनि ॥ २८५ ॥

देहेन्द्रियादितद्धर्मान् किं भवत्यनुपश्यतः ।

अश्रान्तः स्यादनादाता संमतो निरुपद्रवः ।
शिष्टो न शिष्टवत् स स्यात् ब्राह्मणो ब्रह्मवित्कविः ॥

योऽनात्मभूतदेहादीन् आत्मत्वेन न मन्यते ॥ २८६ ॥
सोऽश्रान्तः किल संसारश्रमयुक्तो न हि कश्चित् ।
अशनायादिदोषास्तु देहादेरेव नात्मनः ॥ २८७ ॥

देहद्वयेऽसत्यध्यासे धर्माध्यासः कथं भवेत् ।
एवमश्रान्तभूतत्वात् वर्तते निरुपद्रवः ॥ २८८ ॥

क्रोधलोभादिमोहाद्याः अन्तराया उपद्रवाः ।
निरुपद्रवः तद्धीनः, स शिष्टत्वेन संमतः ॥ २८९ ॥

विद्वद्भिः शिष्टवत् न स्यात् नाचरेत्, जडवच्चरेत् ।
यथा जडः तथैवैष ब्राह्मणो ब्रह्मवित्कविः ॥ २९० ॥

इदानीं कुत्सयन्नाह ह्यगूढचारिणं यतिम् ।

ये यथा वान्तमश्नन्ति बाला नित्यमभूतये ।
एवं ते वान्तमश्नन्ति स्ववीर्यस्योपभोजनात् ॥

बालाः श्वानोऽथवा मूढाः वान्तमुद्गीर्णमोदनम् ॥ २९१ ॥
अश्नन्त्येवं च ये शिष्टा ज्ञानिनोऽगूढचारिणः ।
ख्यापयन्तः स्वमाहात्म्यं वर्तन्ते ब्रह्मवेदिनः ॥ २९२ ॥

उद्गीर्णमेव तेऽश्नन्ति स्ववीर्यस्योपभोजनात् ।
वान्ताशनमनर्थायैवाऽभूतये भवेत् ध्रुवम् ॥ २९३ ॥

तस्मादशिष्टवत् ज्ञानी गूढ एव समाचरेत् ।
प्रशंसन् योगिनं प्राह त्रिभिः श्लोकैः ततो मुनिः ॥

अनाढ्या मानुषे वित्ते आढ्या वेदेषु ये द्विजाः ।
ते दुर्धर्षा दुष्प्रकंप्या विद्यात् तान् ब्रह्मणः तनुम् ।।

अनाढ्या मानुषे वित्ते जायापुत्रधनादिषु ।
असक्तमनसो विप्राः वेदेष्वाढ्या भवन्ति तु ॥ २९५ ॥

उक्ता वेदेषु येऽहिंसासत्यास्तेयापरिग्रहाः ।
ब्रह्मचर्यं समाधिश्च तत्साधनेषु निष्ठिताः ॥ २९६ ॥

ते दुर्धर्षा दुष्प्रकम्प्याः विद्यात् तान् ब्रह्मणस्तनुम् ।
ब्रह्मस्वरूपभूतां तां तनुं विद्यात् सुचिन्त्यताम् ॥ २९७ ॥

किंच ब्रह्मविदामेष महिमेति प्रदर्श्यते ।

सर्वान् स्विष्टकृतो देवान् विद्याद्य इह कश्चन ।
न समानो ब्राह्मणस्य यस्मिन् प्रयतते स्वयम् ।।

इष्टं सुष्ठु कुर्वन्तीति देवाः स्विष्टकृतः स्मृताः ॥ २९८ ॥
अग्न्यादिकांश्च तान् सर्वान् विद्यात् य इह कश्चन ।
देवान् प्रत्येकमुद्दिश्य सर्वान् देवान् यजन्नपि ॥ २९९ ॥

न समानो ब्रह्मविदा यस्मिन् प्रयतते स्वयम् ।
हविषः कुरुते त्यागं यजमानः फलाप्तये ॥ ३०० ॥

स देवताविशेषोऽपि न हि ब्रह्मविदा समः ।
वक्तव्यं किमु देवानां पशुभूतस्य यज्वनः ॥ ३०१ ॥

ब्रह्मविदा समानत्वं नैव युक्तं कदाचन ।
तस्यैव च समाचारं पुनरप्याह योगिराट् ॥ ३०२ ॥

यमप्रयतमानं तु मानयन्ति स मानितः ।
न मान्यमानो मन्येत नावमाने विसंज्वरेत् ॥

यं अप्रयतमानं तु तूष्णीमेव स्थितं मुनिम् ।
ब्रह्मचर्याश्रमादेव परिव्राजकतां गतम् ॥ ३०३ ॥

कृत्वा सर्वोपसंहारं स्वे महिम्नि व्यवस्थितम् ।
वेदान्तनिश्चितज्ञानं ब्रह्मज्ञं गूढचारिणम् ॥ ३०४ ॥

यदि केचित् स्थितप्रज्ञलक्षणज्ञाः कदाऽपि वा ।
मानयन्ति च विद्वांसः ब्रह्मज्ञोऽयमिति स्फुटम् ॥ ३०५ ॥

मत्वा संपूजयन्त्येनं विद्वानेवं स मानितः ।
मानितं स्वं न मन्येत, स्थितप्रज्ञस्य लक्षणम् ॥ ३०६ ॥

जनाश्चेन्नाभिजानन्तः जडं मत्वा त्ववज्ञया ।
एवं चाप्यवमन्यन्ते तदापि नानुसंज्वरेत् ॥ ३०७ ॥

तन्निमित्तेऽवमानेऽपि नानुतपेत स किंचन।
कथं वा तेन मन्तव्यं इत्याह भगवान् ततः ॥ ३०८ ॥

लोकस्वभाववृत्तिर्हि निमेषोन्मेषवत् सदा ।
विद्वांसो मानयन्तीह इति मन्येत मानितः ॥

अधर्मविदुषो मूढाः लोकशास्त्रविवर्जिताः ।
न मान्यं मानयिष्यन्ति इति मन्येदमानितः ॥

विद्वांसो मानयन्तीति निमेषोन्मेषवद्धि सा ।
तेषां स्वाभाविकी वृत्तिः इति मन्येत तत्त्ववित् ॥

तथा विद्वानवज्ञातः यदाऽवमानितो जनैः ।
मूढाः धर्ममजानन्तः लोकशास्त्रविवर्जिताः ॥ ३१० ॥

न मान्यं मानयिष्यन्ति विवेकविधुरा जनाः ।
इति तेषां स्वभावोऽयं इति विद्वान् विचिन्तयेत् ॥

न वै मानश्च मौनं च सहितौ वसतः सदा ।
अयं मानस्य विषयो ह्यसौ मौनस्य तद्विदुः ॥

भिन्नविषयतामाह त्विदानीं मानमौनयोः ।
मानं मौनं च नैकत्र सहितौ वसतः क्वचित् ॥ ३१२ ॥

मानस्य विषयो लोकः प्रपञ्चोऽयं हि विस्तृतः ।
प्रत्यक्षादिप्रमाणानां गोचरो यो भवेत्स्वयम् ॥ ३१३ ॥

मौनस्य विषयं तत् स्यात् ब्रह्मणः खलु नाम तत् ।
तस्मात् विषयो मौनस्य ब्रह्मैव कथितं भवेत् ॥ ३१४ ॥

मानात् संसारसंप्राप्तिः ब्रह्मप्राप्तिस्तु मौनतः ।
अत्र मानार्थसंवासे मोक्षाभावः प्रदर्श्यते ॥ ३१५ ॥

श्रीर्हि मानार्थसंवासात् सा चापि परिपन्थिनी ।
ब्राह्मी सुदुर्लभा श्रीर्हि प्रज्ञाहीनेन क्षत्रिय ॥

मानार्थस्य च संवासात् प्रश्ने मानगोचरे ।
परितो वर्तमानस्य स्वर्गाश्वादिसाधनम् ॥ ३१६ ॥

कर्मानुतिष्ठतो नूनं श्रीर्भवति तथापि सा ।
श्रीः परिपन्थिनी नित्यं श्रेयोमार्गविरोधिनी ॥ ३१७ ॥

अभिभूतः श्रिया मूढः विषयेषु प्रवर्तते ।
तेन प्रज्ञाविहीनेन विद्याहीनेन दुर्लभा ॥ ३१८ ॥

सुतरामेव या ब्राह्मी श्रीः ब्रह्मानन्दलक्षणा ।
श्रवणाद्याप्यलभ्येति प्रोच्यते सा सुदुर्लभा ॥ ३१९ ॥

द्वाराणि सम्यक् प्रवदन्ति सन्तः
बहुप्रकाराणि दुराचराणि ।
सत्यार्जवे ह्रीः दमशौचविद्याः
षण्मानमोहप्रतिबन्धकानि ॥ ४३ ॥

ब्रह्मलक्ष्म्याः प्रवेशार्थं द्वाराणि प्रवदन्ति हि ।
सन्तो बहुप्रकाराणि सुदुःखाचरणान्यपि ॥ ३२० ॥

तानि द्वाराणि कानि स्युः सत्यं यथार्थभाषणम् ।
यत्स्यात् भूतहितं चापि, तथाऽकौटिल्यमार्जवम् ॥

अकार्यकरणे लज्जा ह्रीः, अन्तःकरणस्य वा ।
बहिष्ठकरणानां वा सुदृढोपरतिः दमः । ३२२ ॥

कल्मषक्षालनं शौचं विद्या च ब्रह्मवेदनम् ।
एतानि मानमोहादेः षट्प्रतिबन्धकानि च ॥ ३२३ ॥

इति सनत्सुजातीयभाष्यसंग्रहे प्रथमोऽध्यायः ॥

द्वितीयोऽध्यायः ।

दर्शितं मौनमाहात्म्यं श्रुत्वोवाच महीपतिः ।

धृतराष्ट्र उवाच —

कस्यैष मौनः कतरन्नु मौनं
प्रब्रूहि विद्वन्निह मौनभावम् ।
मौनेन विद्वान् उपयाति मौनं
कथं मुने मौनमिहाचरन्ति ॥ १ ॥

कीदृशस्यैष पूर्वोक्तो मौनो वागादिकस्य च । १ ॥
उपशमस्वरूपोऽयं, अभाषणात्मरूपयोः ।
एतयोः कतरत् मौनं विद्वन् प्रब्रूहि मे वद । २ ॥
मौनभावं च मौनस्य स्वभावं ब्रूहि मे मुने ।
तूष्णींभावेन मौनेन मौनं ब्रह्मोपयाति किम् । ३ ॥
अथवाऽन्येन तन्मौनं आचरन्ति कथं मुने ।

सनत्सुजात उवाच ---

यतो न वेदाः मनसा सहैनं
अनुप्रविश्यन्ति ततोऽथ मौनम् ।
यत्रोत्थितो वेदशब्दः तथाऽयं
स तन्मयत्वेन विभाति राजन् ॥ २ ॥

यतो वेदाः परात्मानं एनं न मनसा सह ॥ ४ ॥
प्राप्नुवन्ति ततो मौनं स हि वाचामगोचरः ।
स च किंलक्षणः यत्र वेदशब्दः समुत्थितः ॥ ५ ॥
यस्मिन् निमित्तभूतेर्थे ब्रह्म शास्त्रादिकारणम् ।
यस्मिन् संवेदनाख्ये वा वेदशब्दः प्रयुज्यते ॥ ६ ॥
संविद्रूपः परात्माऽतः वेदशब्देन कीर्त्यते ।
वेदशब्दोदितं ब्रह्म यदि वाचामगोचरः ॥ ७ ॥

संविद्रूपः परात्मेति कथं तदवगम्यते ।
परात्मा तन्मयत्वेन ज्योतिर्मयस्वरूपतः ॥ ८ ॥

विभाति नित्यमस्माकं एवमनुभवो यतः ।
नाविश्वासोऽत्र कर्तव्यः, ज्योतिर्मयतयाऽथवा ॥ ९ ॥

श्रुतिस्मृतीतिहासादिप्रमाणेषु प्रतीयते ।
वेदस्वभावं विज्ञातुं इदानीमाह भूपतिः ॥ १० ॥

धृतराष्ट्र उवाच —

ऋचो यजूंष्यधीते यः सामवेदं च यो द्विजः ।
पापानि कुर्वन् पापेन लिप्यते न स लिप्यते ॥

कुर्वन्नेव हि पापानि योऽधीते च ऋगादिकान् ।
अध्ययनेन तेनैव पूयते किं न वा वद ॥ ११ ॥

सनत्सुजात उवाच —

नैनं सामान्यृचो वाऽपि यजूंषि च विचक्षण ।
त्रायन्ते कर्मणः पापात् न ते मिथ्या ब्रवीम्यहम् ॥

कुर्वन्नेव हि पापानि योऽधीते च ऋगादिकान् ।
निषिद्धचारिणं नैनं वेदाः पापाच्च कर्मणः ॥ १२ ॥

त्रायन्ते नैव रक्षन्ति न ते मिथ्या ब्रवीम्यहम् ।
नाविश्वासोऽत्र कर्तव्यः इति श्रद्धा दृढीकृता ॥ १३ ॥

न छन्दांसि वृजिनात् तारयन्ति
मायाविनं मायया वर्तमानम् ।
नीडं शकुन्ता इव जातपक्षाः
छन्दांस्येनं प्रजहन्त्यन्तकाले ॥ ५ ॥

छन्दांसि वृजिनात् नैनं नास्तिकं पापकारिणम् ।
अधीतवेदवेदार्थं वर्तमानं तु मायया ॥ १४ ॥

धर्मपताकिनं मिथ्याचारिणं मायिनं ध्रुवम् ।
न तारयन्ति रक्षन्ति शकुन्ताः पक्षिणो यथा । १५ ॥

जातपक्षाः स्वकं नीडं स्वाश्रयं प्रजहन्ति हि ।
तद्वच्छन्दांस्यन्तकाले तं संत्यजन्ति स्वकाश्रयम् ॥ १६ ॥

पुरुषार्थप्रदानाय न भवन्ति कदाऽपि वा ।

धृतराष्ट्र उवाच —

न चेद्वेदा वेदविदं त्रातुं शक्ता विचक्षण ।
अथ कस्मात्प्रलापोऽयं ब्राह्मणानां सनातनः ॥

नित्यानां चापि काम्यानां पितृलोकादिहेतुतः ॥ १७ ॥

संसारानर्थहेतुत्वं निषिद्धस्य च कर्मणः ।
नरकादिकहेतुत्वात् अनर्थहेतुता यदि ॥ १८ ॥

वेदा वेदविदं ज्ञातुं न शक्ता इति चेदपि ।
कस्मात् हेतोः प्रलापोऽयं ब्राह्मणानां चिरन्तनः ॥ १९ ॥

संसारानर्थहेतुत्वात् वेदस्याध्ययनादिकम् ।
तदर्थस्य विचारश्च तदनुष्ठानमेव च ॥ २० ॥

केनचिद्वा न कार्याणीत्येवमर्थः प्रतीयते ।
यद्येष एव वेदार्थः प्रलापोऽयं भवेत्तदा ॥ २१ ॥

वेदार्थः किंतु मोक्षाख्यः स्वर्गादेरन्य एव सः ।
वेदोदितानि कर्माणि देवतोपासनानि च ॥ २२ ॥

तत्प्राप्तिसाधनज्ञानसाधनं चित्तशोधनम् ।
यत् तस्य साधनत्वेन पारंपर्यक्रमेण च ॥ २३ ॥

मोक्षसाधनतां यान्ति तानि साक्षात् न साधनम् ।
एवं क्रमेण संसारानर्थनिवृत्तिहेतुता ॥ २४ ॥

वेदानां च यतः सिद्धा तस्मात् ब्रह्मविदं ध्रुवम् ।
ज्ञातुं शक्ताः भवन्त्येवेत्यर्थः प्रतीयते स्फुटम् ॥ २५ ॥

सर्वमेतदभिप्रेत्य वक्तुं प्रक्रमते मुनिः ।
आदौ नित्यापरोक्षं तदात्मानं दर्शयत्यसौ ॥ २६ ॥

सनत्सुजात उवाच —

तस्यैव नामादि विशेषरूपैः
इदं जगद्भाति महानुभाव !
निर्दिश्य सम्यक् प्रवदन्ति वेदाः
तद्विश्ववैरूप्यमुदाहरन्ति ॥ ७ ॥

परात्मनस्तु तस्यैव मायया परिकल्पितैः ।
विशेषैः नामरूपाद्यैः विभातीदं जगत् सदा ॥ २७ ॥

इदं तैरेव भातीति कथं तदवगम्यते ।
मायानिर्मितनानात्वं निर्दिश्य परमात्मनः ॥ २८ ॥

सम्यग्रूपं स्वतः सिद्धं वेदाः पश्चात् वदन्ति हि ।
मूर्तामूर्तात्मकं रूपं आदौ निर्दिश्य तत्परम् ॥ २९ ॥

नेति नेत्यादिवाक्येन सम्यग्रूपं वदन्ति च ।
वियदादिधरित्र्यन्तं कार्यमुक्त्वा ततः परम् ॥ ३० ॥

पञ्चकोशविवेकेन सम्यग्रूपं प्रदर्श्यते ।
मायानिमित्तं नामादिप्राणान्तं प्रोच्य तत्परम् ॥ ३१ ॥

भूमानं तमसः पारं स्वे महिम्नि व्यवस्थितम् ।
प्रवदन्ति च ते वेदाः सम्यग्रूपं परात्मनः ॥ ३२ ॥

एवं न केवलं वेदाः वदन्ति, मुनयोऽपि च ।
उदाहरन्ति तत् ब्रह्म विश्वरूपविलक्षणम् ॥ ३३ ॥

ईश्वरार्थमनुष्ठीयमानानां पुरुषार्थताम् ।
ज्ञानापेक्षितसंशुद्धिद्वारेणाखिलकर्मणाम् ॥ ३४ ॥

अन्येषां चापि संसारहेतुत्वादपुमर्थताम् ।
श्लोकद्वयेन विस्पष्टं दर्शयति ततो मुनिः ॥ ३५ ॥

तदर्थमुक्तं तप एतदिज्या
ताभ्यामसौ पुण्यमुपैति विद्वान् ।
पुण्येन पापं विनिहत्य पश्चात्
स जायते ज्ञानविदीपितात्मा ॥ ८ ॥

ज्ञानेन चात्मानमुपैति विद्वान्
न चान्यथा वर्गफलानुकांक्षी ।
अस्मिन् कृतं तत्परिगृह्य सर्वं
अमुत्र भुङ्क्ते पुनरेति मार्गम् ॥ ९ ॥

वेदेनोक्तं तपश्चेज्या ब्रह्मणः प्राप्तये खलु ।
कृच्छ्रचान्द्रायणाद्यं च तपश्शब्देन गृह्यते ॥ ३६ ॥

ज्योतिष्टोमादिकं सर्वं इज्याशब्देन गृह्यते ।
पूर्वोक्तविनियोगज्ञः उभयोः तपइज्ययोः ॥ ३७ ॥

ईश्वरार्थमनुष्ठानात् पुण्यं प्राप्नोत्यसंशयम् ।
कर्मजापूर्वसंयुक्तः पापं पुण्येन तेन च ॥ ३८ ॥

विनिहत्य ततः पश्चात् क्षपिताशेषकिल्बिषः ।
चित्सदानन्दमद्वैतं ब्रह्म ज्ञानप्रकाशितम् ॥ ३९ ॥

भूत्वा ज्ञानात् परात्मानं प्राप्नोति च स अत्मवित् ।
अन्यथा पुनरीशार्थं फलाकांक्षाविवर्जितम् ॥ ४० ॥

कर्मणामकृतत्वेनाक्षपिताशेषकल्मषः ।
स्वर्गादिकफलाकांक्षी नैव ज्ञानी भवेत् क्वचित् ॥ ४१ ॥

अस्मिन् लोके कृतं यत् तत् सर्वं यज्ञादिकं तदा ।
गृहीत्वा परलोके सः उपभुङ्क्ते च तत्फलम् ॥ ४२ ॥

ततस्तु कर्मशेषेण मार्गं संसारमेव सः ।
पुनरेति 'निवर्तन्ते' इति हि श्रुतिशासनम् ॥ ४३ ॥

विदुषोऽविदुषोराह वैषम्यं कर्मणां फले ।

अस्मिन्लोके तपस्तप्तं फलमन्यत्र भुज्यते ।
ब्राह्मणानां तपः स्वृद्धं अन्येषां तावदेव तत् ॥

लोकेऽस्मिन् यत्तपस्तप्तं भुज्यतेऽन्यत्र तत्फलम् ॥ ४४ ॥

सर्वेषां हि समानं तत् किंतु ब्रह्मविदामयम् ।
विशेषः तैः कृतं स्वृद्धं सम्यगृद्धं भवेदिदम् ॥ ४५ ॥

फलवृद्धौ भवेत हेतुः समृद्धं हि भवेत् फलम् ।
आत्मज्ञानविहीनानां अन्येषां तावदेव तत् ॥ ४६ ॥

न समृद्धं भवेत् यस्य कर्मणो यत्फलं श्रुतम् ।
तावन्मात्रफले हेतुः समृद्धेस्तु न कारणम् ॥ ४७ ॥

धृतराष्ट्र उवाच —

कथं समृद्धमत्यर्थं तपो भवति केवलम् ।
सनत्सुजात तत् ब्रूहि कथं विद्यामहं प्रभो ॥

सनत्सुजात उवाच —

निष्कल्मषं तपस्त्वेतत् केवलं परिचक्षते ।
एतत् समृद्धमत्यर्थं तपो भवति नान्यथा ॥

सर्वस्यास्य प्रपञ्चस्य निमित्तं कारणं भवेत् ।
यत् तद्धि केवलं प्रोक्तं तदेव केवलं तपः ॥ ४८ ॥

भवेत् समृद्धमत्यर्थं यदा निष्कल्मषं भवेत् ।
न स्यात् समृद्धमत्यर्थं अन्यथा चेत् सकल्मषम् ॥ ४९ ॥

तपोमूलमिदं सर्वं यन्मां पृच्छसि क्षत्रिय ।
तपसा वेदविद्वांसः परं त्वमृतमाप्नुयुः ॥ १३ ॥

धृतराष्ट्र उवाच —

कल्मषं तपसो ब्रूहि श्रुतं निष्कल्मषं तपः ।
सनत्सुजात येनेदं विद्यां गुह्यं सनातनम् ॥ १४ ॥

तपसः कल्मषं ब्रूहि निष्कल्मषेण येन हि ।
तपसाऽहमिदं विद्यां गुह्यं ब्रह्म सनातनम् ॥ ५० ॥

सनत्सुजात उवाच —

क्रोधादयो द्वादश यस्य दोषाः
तथा नृशंसानि च सप्त राजन् ।
ज्ञानादयो द्वादश चाततानाः
शास्त्रे गुणा ये विदिता द्विजानाम् ॥

एतान् दोषान् गुणान् वक्ष्ये इत्युपक्रमते मुनिः ।

क्रोधः कामो लोभमोहौ विवित्सा-
ऽकृपाऽसूया मानशोकौ स्पृहा च ।
ईर्ष्या जुगुप्सा च महागुणेन
सदा वर्ज्या द्वादशैते नरेण ॥ १६ ॥

क्रोधः कामप्रतीघातात् समुत्पन्नश्च कारणम् ॥ ५१ ॥

ताडनाक्रोशनादीनां कामहानि समुद्भवः ।
अन्तःकरणविक्षेपः गात्रस्वेदादिलिङ्गकः ॥ ५२ ॥

कामः स्त्र्याद्यभिलाषः स्यात्, लोभः परधनादिषु ।
इच्छाऽऽर्जितस्य तीर्थे वा विनियोगासमर्थता ॥ ५३ ॥

कृत्याकृत्यविवेकस्य शून्यता मोह उच्यते ।
विवित्सा च रसान्वेत्तुं इच्छा विषयसंस्थितान् ॥ ५४ ॥

निष्ठुरताऽकृपा, दोषाविष्करणं गुणेष्वपि ।
असूया स्यात् परेषां वा गुणाद्येष्वक्षमा भवेत् ॥ ५५ ॥

मानः स्वबहुमानित्वं, य इष्टार्थवियोगजः ।
अन्तःकरणविक्षेपो ह्यप्रतीकारवस्तुनि ॥ ५६ ॥

चिन्तारोदनलिङ्गः स्यात् स शोक इति कथ्यते ।
स्पृहा विषयभोगेच्छा, परश्रेयोऽसहिष्णुता ॥ ५७ ॥

ईर्ष्या भवेत्, जुगुप्सा च बीभत्सा वाऽन्यथा भवेत् ।
परगुणानपन्होतुं इच्छा ह्येते च कल्मषाः ॥ ५८ ॥

क्रोधादयः तपोदोषाः महागुणेन सर्वशः ।
ब्राह्मणेन सदा वर्ज्याः, ब्राह्मणस्य स्वभावतः ॥ ५९ ॥

उत्कृष्टगुणसंयोगः सिध्यतीति तथोदितः ।
महागुण इति प्रोक्तः, ब्रह्मप्राप्तिगुणोऽथवा ॥ ६० ॥

तेन वा यः समायुक्तः वर्ज्यः तेनापि सर्वदा ।
वर्ज्यत्वे च सदा तेषां हेतुमाह ततो मुनिः ॥ ६१ ॥

एकैकमेते राजेन्द्र मनुष्यं पर्युपासते ।
लिप्समानोऽन्तरं तेषां मृगाणामिव लुब्धकः ॥

लुब्धको मृगयुः यद्वत् रन्ध्रान्वेषणतत्परः ।
मृगाणामन्तरं छिद्रं लिप्समानोऽनुवर्तते ॥ ६२ ॥

छिद्रं लब्ध्वा च तान् हन्ति दोषाः क्रोधादयोऽपि च ।
तथा तेषां मनुष्याणां रन्ध्रान्वेषणतत्पराः ॥ ६३ ॥

एकैकं सर्वकालेषु मनुष्यं पर्युपासते ।
मनुष्यानिति पाठे तु एकैकं च पृथक् पृथक् ॥ ६४ ॥

पर्युपासत इत्येत्र कर्तव्या योजना तदा ।
एकोऽपि तस्मादेतेषु दोषो नाशस्य कारणम् ॥ ६५ ॥

यस्मादेवं इमे दोषाः वर्जनीयाः सदा हि ते ।
नृशंससप्तकं प्राह श्लोकेनैकेन योगिराट् ॥ ६६ ॥

संभोगसंविद्विषमेधमानः
दत्तानुतापी कृपणोऽबलीयान् ।
वर्गप्रशंसी वनितां च द्वेष्टा
एते परे सप्त नृशंसरूपाः ॥ १८ ॥

यस्य विषयसंभोगे संवित् बुद्धिर्हि वर्तते ।
एष संभोगसंवित्स्यात्, यः परेषामुपद्रवम् ॥ ६७ ॥

विषवत्सर्वदा कुर्वन् एधमानः प्रवर्धते ।
द्विर्षमिति तु पाठश्चेत् द्वेष्यं कर्मेति गण्यताम् ॥ ६८ ॥

दत्त्वानुतापी यः पूर्वं धर्मबुद्ध्या धनादिकम् ।
दत्त्वा पश्चात् भवेत् तप्तः किमर्थं दत्तवानिति ॥ ६९ ॥

यत्किञ्चिदर्थलोभेनावमानं सहते च यः ।
कृपणः सोऽबलीयान् यो ज्ञानबलविवर्जितः ॥ ७० ॥

इन्द्रियाणां प्रशंसी च योऽनन्यशरणां सतीम् ।
भार्यां हि वनितां द्वेष्टि, क्रोधादिभ्य इमे परे ॥ ७१ ॥

नृशंसरूपकाः सप्त तपसः कल्मषा मताः ।
इदानीं द्वादशोच्यन्ते क्रमात् ज्ञानादयोः गुणाः ॥ ७२ ॥

ज्ञानं च सत्यं च दमः श्रुतं च
अमात्सर्यं ह्रीः तितिक्षाऽनसूया ।
यज्ञश्च दानं च धृतिः शमश्च
महाव्रता द्वादश ब्राह्मणस्य ॥ १९ ॥

तत्वार्थवेदनं ज्ञानं, सत्यं यथार्थभाषणम् ।
यत्स्यात् भूतहितं चापि, मनसो दमनं दमः ॥ ७३ ॥

श्रुतं श्रवणमध्यात्मशास्त्रस्यासहमानता ।
सर्वभूतेषु मात्सर्यं तदभावो भवेद्गुणः ॥ ७४ ॥

अकार्यकरणे लज्जा ह्रीः, द्वन्द्वानां सहिष्णुता ।
तितिक्षा, साऽनसूया स्यात् परदोषाप्रकाशनम् ॥ ७५ ॥

अग्निष्टोमादिको यज्ञः महायज्ञोऽथवा भवेत् ।
धनादीनां परित्यागः ब्राह्मणेभ्यः यथाविधि ॥ ७६ ॥

क्रियमाणो भवेत् दानं, धृतिरिन्द्रियनिग्रहः ।
सन्निधौ विषयस्यापि, चित्तस्योपरतिः शमः ॥ ७७ ॥

बाह्यानां करणानां वा, पुमर्थसाधनत्वतः ।
ज्ञानादयो द्वादशैते ब्राह्मणस्य महाव्रताः ॥ ७८ ॥

इदानीं प्रस्तुतानां च गुणानां कुरुते स्तुतिम् ।

यस्त्वेतेभ्योऽप्रवसेत् द्वादशभ्यः
सर्वामिमां पृथिवीं स प्रशिष्यात् ।
त्रिभिः द्वाभ्यां एकतो वाऽविमुक्ताः
क्रमात् विशिष्टा मौनभूता भवन्ति ॥ २० ॥

अप्रवसेत् य एतेभ्यः यः तैरेवान्वितो भवेत् ॥ ७९ ॥

स इमां पृथिवीं सर्वां आत्मनो वश्यतां नयेत् ।
एषां मध्ये त्रिभिः द्वाभ्यां अमुक्ता एकतोऽपि वा ॥८०॥

युक्ता येऽन्यतमेनापि ते विशिष्टाः क्रमेण च ।
ज्ञानिनो मौनभूता हि ब्रह्मभूता भवन्ति च ॥ ८१ ॥

इदानीं च त्रिभिः श्लोकैः दमदोषाः प्रदर्शिताः ।

दमोऽष्टादशदोषस्स्यात् प्रतिकूलं कृते भवेत् ।
अनृतं पैशुनं तृष्णा प्रातिकूल्यं तमोऽरतिः ॥

लोकद्वेषोऽभिमानश्च विवादः प्राणिपीडनम् ।
परिवादोऽतिवादश्च परितापोऽक्षमाऽधृतिः ॥२२॥

असिद्धिः पापकृत्यं च हिंसा चेति प्रकीर्तिताः ।
एतैर्दोषैः विमुक्तो यः स दमः सद्भिरुच्यते ॥

दमोऽष्टादशदोषस्स्यात् तेषामन्यतमे कृते ॥ ८२ ॥

दमस्य प्रतिकूलं स्यात् तस्मादेषां हि दोषता ।
अनृतं अयथार्थस्य वचनं, परदूषणम् ॥ ८३ ॥

पैशुनं, विषयाणां च प्राप्तुमिच्छा तु सर्वथा ।
तृष्णा स्यात्, प्रातिकूल्यं च सर्वेषां प्रतिकूलता ॥ ८४ ॥

तमोऽज्ञानं, यथालाभासंतुष्टिररतिः मता ।
रतिरिति पदच्छेदे स्त्रीभोगे तु रतिर्भवेत् ॥ ८५ ॥

लोकद्वेषश्च लोकानां उद्वेगाचरणं मतम् ।
अभिमानश्च सर्वेषां अप्रणतिस्वभावता ॥ ८६ ॥

विवादश्च जनानां हि कलहाचरणं भवेत् ।
पूरणाय स्वदेहस्य प्राणिहिंसा तु पीडनम् ॥ ८७ ॥

परिवादः समक्षेऽपि परदूषणकीर्तनम् ।
अतिवादो भवेत् यच्चातिप्रलापो निरर्थकः ॥ ८८ ॥

परिताप इति प्रोक्तः वृथा दुःखानुचिन्तनम् ।
द्वन्द्वानां असहिष्णुत्वं अक्षमा स्यात्, तथाऽधृतिः ॥८९॥

इन्द्रियार्थेषु चापल्यं, असिद्धिः अनवाप्तता ।
वैराग्यज्ञानधर्माणां, निषिद्धाचरणं तथा ॥ ९० ॥

पापकृत्यं भवेत् हिंसा हिंसा याऽविहिता भवेत् ।
मुक्तोऽष्टादशभिः दोषैः एतैः स दम उच्यते ॥

इदानीं मददोषाश्च संक्षेपेण प्रकीर्तिताः ।
मदोऽष्टादशदोषस्स्यात् त्यागो भवति षड्विधः ।
विपर्यया: स्मृता एते दमदोषा उदाहृताः ॥
एतेऽनृतादिहिंसान्ताः दमदोषाः उदाहृताः ॥ ९२ ॥

विपर्ययेण सत्यदिरूपत्वेन स्मृता यदि ।
मदनाशकरा दोषाः भवन्त्युदाहृताः तदा ॥ ९३ ॥

सत्यं अपैशुनं तृष्णाभावश्चाप्रतिकूलता ।
अतमश्च रतिः लोकाद्वेषश्चानभिमानिता ॥ ९४ ॥

अविवादोऽप्राणिपीडा परिवादविवर्जनम् ।
अनतिवादिता चैवापरितापः क्षमा धृतिः ९५ ॥

सिद्धिश्चापापकृन्यं चाहिंसा च मदनाशकाः ।
षड्विधो भवति त्यागः तत्राप्याह विशेषतः ॥ ९६ ॥

श्रेयांस्तु षड्विधस्त्यागस्तृतीयस्तत्र दुष्करः ।
तेन दुःखं तरन्त्येव तस्मिंस्त्यक्ते जितं भवेत् ॥

तृतीयो दुःखसंपाद्यः एतेषु षड्विधेष्वपि ।
आध्यात्मिकादिकं दुःखं तेन तरन्ति साधकाः ॥ ९७ ॥

तस्मिन् कृते सति त्यागे सर्वमेव जितं भवेत् ।
श्लोकद्वयेन तत्त्यागषट्कं च वर्ण्यतेऽधुना ॥ ९८ ॥

अर्हते याचमानाय पुत्रान्वित्तं ददाति यत् ।
इष्टापूर्तं द्वितीयं स्यान्नित्यं वैराग्ययोगतः ॥२६॥

कामत्यागश्च राजेन्द्र स तृतीय इति स्मृतः ।
अप्रमादी भवेदेतैः स चाप्यष्टगुणो मतः ॥

अर्हते याचमानाय योग्याय च धनं सुतान् ।
ददाति द्विविधं यत् तत् दानं प्रथममुच्यते ॥ ९९ ॥

इष्टापूर्तं द्वितीयं स्यात् इष्टं श्रौते च कर्मणि ।
पूर्तं तु कर्मणि स्मार्ते वदन्त्यन्ततु केचन ॥ १०० ॥

देवेभ्यो दत्तमिष्टं स्यात् पूर्तं पितृभ्य एव च ।
अनित्यत्वादि दोषाणां दर्शनात् शुद्धचेतसः ॥ १०१ ॥

वैराग्ययोगतो नित्यं यो विरक्तस्तथा भवेत् ।
सधनादिपरित्यागः कामत्यागश्च यो भवेत् ॥ १०२ ॥

स तृतीय इति प्रोक्तः, किमेतैरिति तच्छृणु ।
एतैः षड्भिः युतः त्यागैः अप्रमादो भवेद्ध्रुवम् ॥ १०३ ॥

अप्रमादवतां कामः नश्यत्येव न संशयः ।
अप्रमादो भवत्येष गुणैरष्टभिरन्वितः ॥ १०४ ॥

सत्यं ध्यानं समाधानं चोद्यं वैराग्यमेव च ।
अस्तेयो ब्रह्मचर्यं च तथाऽसंग्रह एव च ॥२८॥

यथार्थभाषणं सत्यं, ध्यानं भवेत् शुभाश्रये ।
सूर्यमण्डलमध्यस्थ पुरुषादौ निरन्तरम् ॥ १०५ ॥

चेतसः तैलधारावत् प्रवृत्तिः या हि सन्तता ।
विश्वाद्यं उपसंहृत्य क्रमेण प्रणवेन च ॥ १०६ ॥

स्वभूतचित्सदानन्दाद्वैतब्रह्मात्मना सदा ।
अवस्थानं समाधानं, चोद्यं च कोऽहमादिकम् ॥ १०७ ॥

दृष्टानुश्रविकार्थेषु वैराग्यं च वितृष्णता ।
अस्तेयं आत्मनो वा स्यात् द्रव्याणां वाऽप्यचोरता ॥

अष्टाङ्गमैथुनत्यागः ब्रह्मचर्यमितीर्यते ।
पुत्रदारधनादीनां असंग्रहोऽपरिग्रहः । १०९ ॥

एतांस्तु पालयेत् सम्यक् यथाशक्ति यथाक्रमम् ।

एवं दोषा दमस्योक्तास्तान्दोषान्परिवर्जयेत् ।
दोषत्यागेऽप्रमादः स्यात्स चाप्यष्टगुणो मतः ॥

सत्यात्मा भव राजेन्द्र सत्ये लोकाः प्रतिष्ठिताः।
तांस्तु सत्यमुखानाहुः सत्ये ह्यमृतमाहितम् ॥

भव सत्यस्वरूपस्त्वं सत्ये लोकाः प्रतिष्ठिताः ॥ ११० ॥

सत्याधीनात्मलाभास्ते ततः सत्यमुखाः स्मृताः ।
अमृतं मोक्ष एव स्यात् सोऽपि सत्ये किलाहितः ॥ १११॥

निवृत्तेनैव दोषेण तपोव्रतमिहाचरेत् ।
एतद्धात्रा कृतं वित्तं सत्यमेव सतां वरम् ॥

पूर्वोक्तदोषहीनस्सन् तपो व्रतमिहाचरेत् ।
परमेशकृतं वित्तं सत्यमेव सतां वरम् ॥ ११२ ॥

दोषैरेतैर्वियुक्तं तु गुणैरेतैः समन्वितम् ।
एतत्समृद्धमत्यर्थं तपो भवति केवलम् ॥ ३२ ॥

क्रोधादिदोषहीनं च गुणैः ज्ञानादिभिः युतम् ।
तपस्समृद्धमत्यर्थं तत्तपः केवलं भवेत् ॥ ११३ ॥

यन्मां पृच्छसि राजेन्द्र संक्षेपात्तद्ब्रवीमि ते ।
एतत्पापहरं शुद्धं जन्ममृत्युजरापहम् ॥ ३३ ॥

इन्द्रियेभ्यश्च पञ्चभ्यो मनसश्चैव भारत ।
अतीतानागतेभ्यश्च मुक्तश्चेत्स सुखी भवेत् ॥

धृतराष्ट्र उवाच —

आख्यानपञ्चमैर्वेदैर्भूयिष्ठं कथ्यते जनः ।
तथा चान्ये चतुर्वेदास्त्रिवेदाश्च तथापरे ॥ ३५ ॥

द्विवेदाश्चैकवेदाश्च अनृचश्च तथाऽपरे ।
एतेषु मेऽधिकं ब्रूहि यमहं वेद ब्राह्मणम् ॥

स्वभूतचित्सदानन्दाद्वैत ब्रह्मात्मना स्थितः ।
ब्राह्मणोऽसौ हि नैवान्यः इति दर्शयितुं मुनिः ॥ ११४ ॥

सर्वस्यापि तदन्यस्य ब्रवीत्यज्ञानमूलताम् ।

सनत्सुजात उवाच —

एकवेदस्य चाज्ञानाद्वेदास्ते बहवोऽभवन् ।
सत्यस्यैकस्य राजेन्द्र सत्ये कश्चिदवास्थितः ॥

वेद्यं सर्वं इदंरूपं वेदनं त्वनिदं सदा ॥ ११५ ॥

वेदो वेदनमेव स्यात् ततः संवित्स्वरूपकः ।
एकस्यास्याद्वितीयस्य वेदस्य संविदात्मनः ॥ ११६ ॥

ब्रह्मणोऽनवबोधेन वेदास्ते बहवोऽभवन् ।
विदित्येकस्य शब्दस्य विविधार्थो विधीयते ॥ ११७ ॥

विचारणे च सत्तायां ज्ञाने लाभे च शासनात् ।
ब्रह्मणः प्रतिपत्त्यर्थं विचारकरणं तथा ॥ ११८ ॥

संविद्रूपस्य सद्भावं साधयन्तीति वाऽथवा ।
ज्ञानसाधनभूतत्वात् ब्रह्माधीनात्मलाभतः ॥ ११९ ॥

आत्मतयाऽथवा ह्येते ब्रह्मणो लाभहेतवः ।
एवं च बहुधा वेदाः वेदाख्यानमवाप्नुयुः ॥ १२० ॥

एकवेदस्वरूपं च सत्यं ज्ञानमितीरितम् ।
तस्यानवगमाद्वेदाः तदर्थस्य प्रकाशकाः ॥ १२१ ॥

व्याख्यानात् बहवो जाताः ऋग्यजुरादिरूपतः ।
राजन् ब्रह्मणि सत्येऽस्मिन् कश्चित्त्वं समवस्थितः ॥ १२२ ॥

य एनं वेद तत्सत्यं प्राज्ञो भवति नित्यदा ।
दानमध्ययनं यज्ञो लोभादेव प्रवर्तते ॥ ३८ ॥

सत्यात्प्रच्यवमानानां संकल्पा वितथा भवन् ।
ततः कर्म प्रतायेत सत्यस्यानवधारणात् ॥ ३९ ॥

सत्यात् ब्रह्मणः तस्मात् सत्यज्ञानादिलक्षणात् ।
प्रच्युतानां स्वतस्सिद्ध ब्रह्मभावविवर्जनात् ॥ १२३ ॥

अनात्मनि शरीरादौ आत्मतां प्रतिपद्य ये ।
स्थिताः तेषां हि संकल्पा भवन्ति वितथा वृथा ॥ १२४ ॥

गुणाः स्वभावतः सिद्धाः सत्यसंकल्पतादयः ।
न सिद्ध्यन्ति, ततः कर्म यज्ञाद्यं विस्तृतं भवेत् ॥

सर्वमेतत् भवत्येवं सत्यस्थानवधारणात् ।
सत्यज्ञानादिरूपस्य ब्रह्मणोऽनवबोधतः ॥ १२६ ॥

आत्माज्ञाननिमित्तोऽयं संसार इति हेतुना ।
यावत् साक्षात् न जानाति तद्ब्रह्म नावगच्छति ॥ १२७ ॥

आत्मत्वेन परात्मानं रागादिभिरितस्ततः ।
मकराद्यैः समाकृष्टः तापत्रयनिपीडितः ॥ १२८ ॥

तावत् मोमुह्यमानोऽसौ मिथ्यासंकल्प एव सन् ।
हेयेषु स्वर्गपश्वादि साधनेष्वेव वर्तते ॥ १२९ ॥

इदानीं स मुनिः प्राह ब्राह्मणस्य च लक्षणम् ।

विद्याद्बहुपठं तं तु बहुवागिति ब्राह्मणम् ।
य एव सत्यान्नापैति स ज्ञेयो ब्राह्मणस्त्वया ॥

आख्यानपञ्चमान् वेदान् योऽधीते बहुवागिति ॥ १३० ॥

विद्यात्, न ब्राह्मणं साक्षात्, यत्तु सत्यादिलक्षणात् ।
स्वभूत चित्सदानन्दाद्वैत ब्रह्मात्मभावतः ॥ १३१ ॥

नापैति किंतु तत्रैव तदात्मनाऽवतिष्ठते ।
स एव ब्राह्मणो ज्ञेयः नेतरः सत्यलक्षणात् । १३२ ॥

प्रच्युतो योऽकृतार्थः सन कर्मण्येव प्रवर्तते ।
भवेदेवं यदि ब्रह्म सिद्धयेत तत्तु न सिद्धयति ॥ १३३ ॥

वेदस्यान्यपरत्वादित्येवं प्राप्ते ब्रवीति सः ।

छन्दांसि नाम द्विपदां वरिष्ठ
स्वच्छन्दयोगेन भवन्ति तत्र ।
छन्दोविदस्तेन च तानधीत्य
गता हि वेदस्य न वेद्यमार्याः ॥ ४१ ॥

वेदाः स्वच्छन्दयोगेन तथैव परमात्मनि ॥ १३४ ॥

स्वाधीनाश्च यथाकामं प्रमाणं हि भवन्ति ते ।
पुरुषार्थावसायित्वात् तदन्यस्याखिलस्य तु १३५ ॥

अनित्याशुचिदुःखानुविद्धत्वात् अपुमर्थता ।
तस्य स्वरूपतज्ज्ञानसाधनप्रतिपादनात् ॥ १३६ ॥

प्रामाण्यं स्याद्धि वेदानां तत्रैव परमात्मनि ।
यस्मात् स्वच्छन्दयोगेन प्रामाण्यं तेन हेतुना ॥ १३७ ॥

अधिगम्य च तान् वेदान् वेदान्तश्रवणादिकम् ।
कृत्वा ये हि गताः प्राप्ताः वेदस्य संविदात्मनः ॥१३८॥

परात्मनः स्वरूपं ते आर्याः ब्रह्मविदो बुधाः ।
वेद्यमेतत् प्रपञ्चं तु नैव गच्छन्ति पण्डिताः । १३९ ॥

एवं चेत् वेदवेद्यत्वं वागाद्यगम्यताऽऽत्मनः ।
श्रुतिसिद्धा विरुध्येतेत्याशङ्कयाह तदुत्तरम् । १४० ॥

न वेदानां वेदिता कश्चिदस्ति
वेदेन वेदं न विदुर्न वेद्यम् ।
यो वेद वेदं स च वेद वेद्यं
यो वेद वेद्यं न स वेद सत्यम् ॥ ४२ ॥

ऋगादिष्वपि वेदेषु न हि कश्चित्परात्मनः ।
वाचामगोचरस्यास्य संविद्रूपस्य वेदिता ॥ १४१ ॥

वेदेन ऋगादिरूपेण जडेन संविदात्मकम् ।
वेदं तु परमात्मानं न विदुः वेदवादिनः ॥ १४२ ॥

न प्रपञ्चमिदं वेद्यं यतोऽस्य निखिलस्य च ।
सिद्धेः संविदधीनत्वं यतोऽस्य निखिलस्य च ॥ १४३ ॥

सिद्धेः संविदधीनत्वं तस्मात् सः संविदात्मकम् ।
वेदं वेद विजानाति वेद्यमेतत् स वेद च ॥ १४४ ॥

योहि वेद्यमिदंरूपं वेद सत्यादिलक्षणम् ।
परात्मानं न जानाति सत्यं ब्रह्म न वेद सः ॥ १४५ ॥

नन्वनात्मविदस्तर्हि प्रश्नोऽयं न सिद्ध्यति ।
इत्याशङ्क्य समाधत्ते श्लोकेनानेन योगिराट् ॥ १४६ ॥

यो वेद वेदान्स च वेद वेद्यं
न तं विदुर्वेदविदो न वेदाः ।
तथापि वेदेन विदन्ति वेदं
ये ब्राह्मणा वेदविदो भवन्ति ॥ ४३ ॥

ऋगादीन् वेद यो वेदान् सोऽपि नूनमनात्मवित् ।
संवेदनेन भिन्नेन वेद्यं जगद्धि वेद सः ॥ १४७ ॥

वेद्यवत् परमात्माऽपि वेद्यतामिति चेत् न तम् ।
वेदविदः परात्मानं विदुर्वाचामगोचरम् ॥ १४८ ॥

तं विदुः नैव वेदाश्च तेषां न विषयो हि सः ।
एवं सति कथं तर्हि ब्रह्मौपनिषदं भवेत् ॥ १४९ ॥

इत्याशङ्क्य समाधत्ते ब्रह्म वाचामगोचरम् ।
यद्यपि स्यात् परात्मासौ वेदेनैव ऋगादिना ॥ १५० ॥

ब्राह्मणा ये हि वेदानां प्रतिपादनपद्धतिम् ।
सम्यग्जानन्ति ये चापि ब्रह्मविदो भवन्ति ते ॥ १५१ ॥

तं वेदं परमात्मानं संविद्रूपं विदन्ति हि ।
अविषयं कथं ब्रह्म वेदेन प्रतिपाद्यताम् ॥ ॥ १५२ ॥

इत्याशङ्क्य मुनिः प्राह समाधानं यथाक्रमम् ।

यामांशभागस्य तथा हि वेदा
यथा हि शाखा च महीरुहस्य ।
संवेदनेऽप्येवमथामनन्ति
तस्मिन्हि नित्ये परमात्मनोऽर्थे ॥ ४४ ॥

त्रियामः चन्द्र इत्युक्तेः प्रतिपच्चन्द्रदर्शने ॥ १५३ ॥

महीरुहस्य वृक्षस्य शाखा हेतुर्भवेत् यथा ।
तथैव हेतवो वेदाः भवन्ति परमात्मनः ॥ १५४ ॥

संवेदने स्वरूपस्य पुरुषार्थस्वरूपके ।
पूर्णानन्दस्वरूपे च नित्येऽर्थे ह्यविनाशिनि ॥ १५५ ॥

न पुनः परमात्मानं साक्षाद्वाचामगोचरम् ।
ते प्रतिपादयन्तीति तत्त्वज्ञा आमनन्ति च ॥ १५६ ॥

वेदानां वेदनात्मत्वप्रतिपादनपद्धतिम् ।
योऽवगम्य समाचष्टे सोऽपि ब्राह्मण उच्यते ॥ १५७ ॥

अभिजानामि ब्राह्मणमाख्यातारं विचक्षणम् ।
एवं योऽभिविजानाति स जानाति परं हि तत् ॥

ननु बाल्यं च पाण्डित्यं निर्विद्य यो व्यवस्थितः ।
तं ब्राह्मणं श्रुतिः ब्रूते एषोऽपि ब्राह्मणः कथम् ॥१५८॥

एवं वेदनरूपात्मप्रतिपादनपद्धतिम् ।
यो जानाति स तत्र ब्रह्म परं जानात्यसंशयम् ॥ १५९ ॥

यो हि निर्विद्य पाण्डित्यं संस्थितः क्षिप्रमेव सः ।
बाल्यादिकं च निर्विद्य ब्राह्मणो भवति क्रमात् ॥ १६० ॥

नास्य पर्यैषणं गच्छेत्प्रत्यर्थिषु कदाचन ।
अविचिन्वन्निमं वेदे ततः पश्यति तं प्रभुम् ॥

यस्मात् सत्यैकनिष्ठस्य ब्राह्मणत्वं प्रसिद्ध्यति ।
तस्मात् नैष क्वचिद्वाऽपि भवेत् विषयतत्परः ॥ १६१ ॥

स्वप्रतिपक्षभूतेषु प्रत्यर्थिषु कदाचन ।
शरीरेन्द्रियशब्दादिविषयेषु स न क्वचित् ॥ १६२ ॥

परित एषणं गच्छेत्, विषयेषणतत्परः ।
न भवेत्, अविचिन्वन्नकुर्वन् विषयसंचयम् ॥ १६३ ॥

इमं च प्रत्यगात्मानं वेद ह्युपनिषत्स्वपि ।
तत्त्वमस्यादिवाक्येषु ततः पश्यति तं प्रभुम् ॥ १६४ ॥

आत्मत्वेन परात्मानं जानात्ययं च तत्त्ववित् ।
'नास्य पर्यैषणं' गच्छेत् नात्मत्वेनावगम्यताम् ॥

देहेन्द्रियादि तद्धर्मान् इति वाऽर्थो भवेदिह ।
आत्मत्वेन न संचिन्वन् देहादीनवगम्य च ॥ १६६ ॥

तेषां साक्षिणमात्मानं तत्त्वंपदार्थशोधनात् ।
ततः परं प्रमात्रादिसाक्षिणं पश्यति ध्रुवम् ॥ १६७ ॥

शरीरेन्द्रियतद्धर्मान् आत्मत्वेन कदाचन ।
अप्रतिपद्यमानस्तु तत्त्वमस्यादिवाक्यतः ॥ १६८ ॥

आत्मत्वेन परात्मानं साक्षात्पश्यति नित्यशः ।

तूष्णींभूत उपासीत न चेच्छेन्मनसा अपि ।
अभ्यावर्तेत ब्रह्मास्मै बह्वनन्तरमाप्नुयात् ॥४७॥

यस्मात् सर्वपरित्यागात् सिद्ध्यति स्वात्मदर्शनम् १६९॥

तस्मात् तूष्णीं स्थितः कृत्वा संन्यासं सर्वकर्मणाम् ।
स्वस्मादन्यत् परित्यज्य सर्वं भूत्वा च केवलः ॥ १७० ॥

मत्वा लोकं स्वमात्मानं उपासीत दृढव्रतः ।
न चेच्छेन्मनसा वाऽपि न कुर्यात् विषयस्पृहाम् ॥

विषयानुपसंहृत्य तूष्णीं भूत्वा च यो नरः ।
मत्वा लोकं स्वमात्मानं उपास्ते च दृढव्रतः ॥ १७२ ॥

अभ्यावर्तेत ब्रह्मास्मै ब्रह्मापूर्वादिलक्षणम् ।
तूष्णींभूताय विप्राय तस्मै अभिमुखी भवेत् ॥ १७३ ॥

अनन्तरं ततः पश्चात् सर्वोपाधिविवर्जितः ।
आविर्भूतस्वरूपस्सन् बहु भूमानमाप्नुयात् ॥ १७४ ॥

तमसश्च परं पारं परमात्मानमेव सः ।

मौनाद्धि मुनिर्भवति नारण्यवसनान्मुनिः ।
अक्षरं तं तु यो वेद स मुनिश्रेष्ठ उच्यते ॥

मुनिर्भवति मौनाद्धि तूष्णींभावात्पुरोदितम् ॥ १७५ ॥

अरण्यमात्रवासान्न, तेषां मध्येऽपि यः पुनः ।
वेद तं परमात्मानं अक्षरमविनाशिनम् ॥ १७६ ॥

अयमेवाहमस्मीति साक्षाज्ज्ञानात्यसंशयम् ।
मुनीनामुत्तमो यस्मात् मुनिश्रेष्ठस्स उच्यते ॥ १७७ ॥

सर्वार्थानां व्याकरणाद्वैयाकरण उच्यते ।
तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा ॥

सर्वार्थानां व्याकरणात् वैयाकरण उच्यते ।
नहि शब्दैकदेशस्य व्याकरणात्तथोच्यते ॥ १७८ ॥

पूर्वोक्तादक्षरादेव जगतो निखिलस्य च ।
नामरूपप्रपञ्चस्य व्याकरणं इति श्रुतिः ॥ १७९ ॥

तस्माद्धि ब्रह्मणस्साक्षात् वैयाकरणता मता ।
व्याकरोतीति यो ब्रह्म विद्वान् सोऽपि भवेत्तथा ॥ १८० ॥

वैयाकरणशब्दस्य वाच्यः स ब्रह्मविद्भवेत् ।

प्रत्यक्षदर्शी लोकानां सर्वदर्शी भवेन्नरः ।
सत्ये वै ब्रह्मणि तिष्ठंस्तद्विद्वान्सर्वविद्भवेत् ॥

प्रत्यक्षदर्शी भूतादीन् यस्मात्साक्षादेव पश्यति ॥ १८१ ॥
सर्वदर्शी भवत्येषः यस्मादेष हि पश्यति ।
सर्वात्मकं परात्मानं सत्ये सत्यादिलक्षणे ॥ १८२ ॥
नित्यं ब्रह्मण्यसौ तिष्ठन् मनः समादधाति च ।
आत्मत्वेन यो जानाति ब्रह्म सत्यादिलक्षणम् ॥ १८३ ॥
स जानाति यतः सर्वं सर्वविदिति कीर्त्यते ।
एष एव हि सर्वज्ञः साक्षात् भवति नेतरः ॥ १८४ ॥
अनात्ममात्रदर्शी यः स सर्वज्ञो भवेत् कथम् ।

ज्ञानादिषु स्थितोऽप्येवं क्षत्रिय ब्रह्म पश्यति ।
वेदानां चारपूर्वेण चैतद्विद्वन्ब्रवीमि ते ॥ ५१ ॥

ज्ञानादिषु स्थितो वाऽपि तावन्मात्रेण केवलम् ॥ १८५ ॥
नैवं पश्यत्यपि त्वेवं वक्ष्यमाणप्रकारतः ।
कर्तव्यं तेन वेदान्त श्रवणादिक पूर्वकम् ॥ १८६ ॥
गुणान्तरविधानार्थं मुनिना प्रोच्यते तथा ।
वेदान्तानां विचारस्य प्रकारं च ब्रवीमि ते ॥ १८७ ॥

इति सनत्सुजातीय भाष्यसंग्रहे द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः ।

ब्रह्मचर्यादिकं श्रुत्वा ब्रह्मज्ञानस्य साधनम् ।
तद्ब्रह्मवेदानाकाक्षी धृतराष्ट्र उवाच ह ॥ १ ॥

धृतराष्ट्र उवाच —

सनत्सुजात यदिमां परार्थां
ब्राह्मीं वाचं वदसि हि विश्वरूपाम् ।
परां हि कार्येषु सुदुर्लभां कथां
प्रब्रूहि मे वाक्यमेवं कुमार ॥ १ ॥

यस्मादिमां परार्थां त्वं उत्कृष्टविषयां पराम् ।
उत्तमां बहुरूपां च ब्रह्मसंबन्धिनीं कथाम् ॥ २ ॥

कार्येषु कार्यवर्गेषु प्रपञ्चेषु सुदुर्लभाम् ।
श्रवणायापि चाशक्यां ब्राह्मीं वाचं ब्रवीषि मे ॥ ३ ॥

प्रब्रूह्येवंविधं वाक्यं श्रद्धया शृण्वतो मम ।
यस्मात्त्वं वदसि ब्राह्मीं वाचं लोके सुदुर्लभाम् ॥ ४ ॥

परमस्य पुमर्थस्य साधनं परमं वचः ।
त्वमेवार्हसि मे वक्तुं इत्यर्थश्च प्रतीयते ॥ ५ ॥

सनत्सुजात उवाच —

नैतद्ब्रह्म त्वरमाणेन लभ्यं
यन्मां पृच्छस्यभिषङ्गेण राजन् ।
बुद्धा प्रलीने मनसि प्रचिन्त्या
विद्या हि सा ब्रह्मचर्येण लभ्या ॥ २ ॥

यत्र पृच्छस्यभिषङ्गेण ब्रह्मतत्तु न लभ्यते ।
केनचित्त्वरमाणेन, यद्येवं लभ्यते कथम् ॥ ६ ॥
अध्यवसायरूपायां बुद्धौ लीनं यदा मनः ।
प्रचिन्त्या सा तदा विद्या संकल्पाद्यात्मकं मनः ॥ ७ ॥
विषयेभ्यः परावृत्य स्वात्मन्येव सुनिश्चलम् ।
यदा भवेत् तदा चिन्त्या प्रचिन्त्या सेति योगिना ॥
सा विद्या ब्रह्मचर्येण वक्ष्यमाणेन लभ्यते ।

आद्यां विद्यां वदसि हि सत्यरूपां
या प्राप्यते ब्रह्मचर्येण सद्भिः ।
यां प्राप्यैनं मर्त्यभावं त्यजन्ति
या वै विद्या गुरुवृद्धेषु नित्या ॥ ३ ॥

आद्यां सर्वादिभूतां यत्र तद्ब्रह्मविषयां मम ॥ ९ ॥
परमार्थस्वरूपां त्वं विद्यां ब्रूहीति पृच्छसि ।
आद्यां अकार्यभूतां वा प्रपञ्चाविषयां इति ॥ १० ॥

विद्या साऽत्वरमाणेन ब्रह्मचर्यादिसाधनैः ।
युक्तेन निगृहीतान्तःकरणेनैव लभ्यते ॥ ११ ॥
प्राप्यते ब्रह्मचर्येण सद्भिः ततः त्यजन्ति ते ।
मर्त्यभावं हि, शिष्येषु गुरुणा वर्धितेषु च ॥ १२ ॥
विद्यादानप्रकाराद्यैः सा नित्या नियता भवेत् ।

धृतराष्ट्र उवाच —

ब्रह्मचर्येण या विद्या शक्या वेदितुमञ्जसा ।
तत्कथं ब्रह्मचर्यं स्यादेतद्विद्वन्ब्रवीहि मे ॥ ४ ॥

सनत्सुजात उवाच —

आचार्ययोनिमिह ये प्रविश्य
भूत्वा गर्भं ब्रह्मचर्यं चरन्ति ।
इहैव ते शास्त्रकारा भवन्ति
विहाय देहं परमं यान्ति सत्यम् ॥ ५ ॥

आचार्ययोनिमाविश्य गत्वाऽऽचार्यस्य सन्निधिम् ॥ १३ ॥
भूत्वा गर्भं ततः शिष्या भूत्वोपसदनादिना ।
ब्रह्मचर्यं चरन्त्येते गुरुशुश्रूषणादिकम् ॥ १४ ॥
कुर्वन्तीहैव लोकेऽस्मिन् शास्त्रकारा भवन्ति ते ।
पण्डिताः शास्त्रकर्तारः बाल्यादिकं ततः परम् ॥ १५ ॥

निर्विद्य ब्राह्मणो भूत्वा क्षये प्रारब्धकर्मणाम् ।
देहं त्यक्त्वा परं यान्ति सत्यं सत्यादिलक्षणम् ॥ १६ ॥

प्राप्नुवन्ति परात्मानं गच्छन्ति ब्रह्मणः पदम् ।

अस्मिँल्लोके विजयन्तीह कामा-
न्ब्राह्मीं स्थितिमनुतितिक्षमाणाः ।
त आत्मानं निर्हरन्तीह देहा-
न्मुञ्जादिषीकामिव धीरभावात् ॥ ६ ॥

जयन्तीहैव ते कामान् ब्रह्मण्येव सदा स्थितिम् ॥ १७ ॥

अनुतितिक्षमाणास्ते क्षममाणाः अहर्निशम् ।
देहादिभ्यः स्वमात्मानं मुञ्जादेरिषिकामिव । १८ ॥

मुञ्जादिषीकां अन्तःस्थां निर्हरन्ति यथा तथा ।
निष्कृष्य पञ्चकोशेभ्यः सर्वात्मानं भजन्ति ते ॥ १९ ॥

धीरभावाद्धि धैर्येण क्रियते सा पृथक्कृतिः ।
मातापित्रतिरेकेणाचार्यस्य योनिता कथम् ॥ २० ॥

इत्याशङ्क्याह साक्षात स एव जनयिता भवेत् ।

शरीरमेतौ कुरुतः पिता माता च भारत ।
आचार्यतस्तु यज्जन्म तत्सत्यं वै तथामृतम् ॥

पितरौ कुरुतो देहं न त्वात्मानं स्वरूपतः ॥ २१ ॥

देहद्वयात्मना जन्म स्याद्यत् असत्यमेव तत् ।
यज्जन्म चित्सदानन्दाद्वैतब्रह्मात्मना भवेत् ॥ २२ ॥

आचार्यतस्तु तज्जन्म सत्यं स्यात् परमार्थसत् ।
एतदेवामृतं प्रोक्तं विनाशवर्जितं यतः ॥ २३ ॥

जनयिता स एव स्यात् श्रुतिसूत्रप्रमाणतः ।

स आवृणोत्यमृतं संप्रयच्छं-
स्तस्मै न द्रुह्येत्कृतमस्य जानन् ।
गुरुं शिष्यो नित्यमभिवादयीत
स्वाध्यायमिच्छेच्च सदाऽप्रमत्तः ॥ ८ ॥

सिद्धिरेवं पुमर्थस्य गुर्वधीना भवेद्यतः ॥ २४ ॥

ततः सेवेत तं भक्त्या शुश्रूषण विधानतः ।
आवृणोत्यमृतं ब्रह्म यस्मादापूरयत्यसौ ॥ २५ ॥

आत्मत्वेन गुरुः साक्षात् पूर्णानन्दं प्रयच्छति ।
ततस्तस्मै हि न द्रुह्येत् तस्मै न द्रोहमाचरेत् ॥ २६ ॥

अनेन गुरुणा स्वस्मै उपकारं कृतं स्मरन् ।
अभिवादयेत्तं नित्यं सदोपासीत देववत् ॥ २७ ॥

तथा स्वाध्यायमिच्छेच्च श्रवणादिपरो भवेत् ।
सर्वदाऽप्यप्रमादी सन् गुरोस्सेवां समाचरेत् ॥ २८ ॥

इदानीं ब्रह्मचर्यस्य चतुष्पात्त्वमथोच्यते ।

शिष्यवृत्तिक्रमेणैव विद्यामाप्नोति यत् शुचिः ।
ब्रह्मचर्यव्रतस्यास्य प्रथमः पाद उच्यते ॥ ९ ॥

यथा नित्यं गुरौ वृत्तिर्गुरुपत्न्यां तथाचरेत् ।
तत्पुत्रे च तथा कुर्वन्द्वितीयः पाद उच्यते ॥

आचार्येणात्मकृतं विज्ञान-
ञ्ज्ञात्वा चार्थं भावितोऽस्मीत्यनेन ।
यन्मन्यते तं प्रति हृष्टबुद्धिः
स वै तृतीयो ब्रह्मचर्यस्य पादः ॥ ११ ॥

विजानन्नुपकारं यः आचार्येणात्मनः कृतम् ॥ २९ ॥
परमं पुरुषार्थं च वेदार्थमवगम्य च ।
स्वभूतच्चित्सदानन्दाद्वैतब्रह्मात्मना क्रमात् ॥ ३० ॥

अहमुत्पादितोऽस्मीति स्वाचार्यं प्रति चिन्तयन् ।
अनेन भावितोऽस्मीति हृष्टबुद्धिः कृतार्थताम् ॥ ३१ ॥

स्वात्मनो मन्यते तत्तु तृतीयः पाद उच्यते ।

आचार्याय प्रियं कुर्यात्प्राणैरपि धनैरपि ।
कर्मणा मनसा वाचा चतुर्थः पाद उच्यते ॥

अथ चतुष्पदीं विद्यां इदानीं दर्शयत्यसौ ॥ ३२ ॥

कालेन पादं लभते तथाऽयं
तथैव पादं गुरुयोगतश्च ।
उत्साहयोगेन च पादमृच्छे-
च्छास्त्रेण पादं च ततोऽभियाति ॥

क्रमो विवक्षितो नात्र, प्रथमं गुरुयोगतः ।
तत उत्साहयोगेन बुद्धेर्विशेषभावतः ॥ ३३ ॥

ततः कालेन बुद्धेश्च परिपाकवशात्ततः ।
सब्रह्मचारिभिः तत्त्वविचारेण च शास्त्रतः ॥ ३४ ॥

इति चतुष्पदीं विद्यां शिष्योऽयं लभते क्रमात् ।

ज्ञानादयो द्वादश यस्य रूप-
मन्यानि चाङ्गानि तथा बलं च ।
आचार्ययोगे फलतीति चाहुः
ब्रह्मार्थयोगेन च ब्रह्मचर्यम् ॥ १४ ॥

ज्ञानादेः फलसिद्धिर्हि सन्निधाने गुरोः भवेत् ॥ ३५ ॥

यस्य ज्ञानादयो रूपं अन्यानयङ्गान्यथो बलम् ।
परिपालनसामर्थ्यं फलत्याचार्ययोगतः ॥ ३६ ॥

नैवान्यथा फलन्त्येते, यदिदं गुरुसन्निधौ ।
शुश्रूषणादिकं सर्वं ब्रह्मचर्यं प्रचक्षते ॥ ३७ ॥

तच्च ब्रह्मार्थयोगेन फलत्येव न संशयः ।
स्वभूतचित्सदानन्दब्रह्मात्मैक्यस्वरूपतः ॥ ३८ ॥

संवादनप्रणाल्या च ध्रुवं सिद्ध्यत्यसंशयम् ।
ब्रह्मचर्यस्तुतिं द्वाभ्यां श्लोकाभ्यां च करोत्यसौ ॥ ३९ ॥

एतेन ब्रह्मचर्येण देवा देवत्वमाप्नुवन् ।
ऋषयश्च महाभागा ब्रह्मचर्येण चाभवन् ॥१५॥

एतेनैव सगन्धर्वा रूपमप्सरसोऽजयन् ।
एतेन ब्रह्मचर्येण सूर्य अह्नाय जायते ॥ १६ ॥

अह्नो दीप्तिसमूहः स्यात्, अह्नाय द्योतनाय हि ।
जगतां जायते सूर्यः ब्रह्मचर्येण हेतुना ॥ ४० ॥

एकस्य ब्रह्मचर्यस्यानेकसाधनता कथम् ।

आकाङ्क्षार्थस्य संयोगाद्रसभेदार्थिनामिव ।
एवं ह्येतत्समाज्ञाय तादृग्भावं गता इमे ॥१७॥

चिन्तामण्यादयो यद्वत् रसभेदार्थिनामिव ॥ ४१ ॥

आकांक्षार्थस्य संयोगात् तत्तदाकाङ्क्षितप्रदाः ।
तथैव ब्रह्मचर्यं च तत्तत्कांक्षानुसारतः ॥ ४२ ॥

कांक्षितार्थप्रदं ज्ञात्वा देवादयः फलार्थिनः ।
ब्रह्मचर्यं चरित्वेमे प्राप्ता भावं च तादृशम् ॥ ४३ ॥

आचार्यसन्निधौ यस्मात् ब्रह्मचर्यादनुष्ठितात् ।
पुरुषार्थस्य संप्राप्तिः ब्रह्मचर्यं तथा चरेत् ॥ ४४ ॥

यद्येवं ज्ञाननिष्ठत्वं ज्ञानस्यैव पुमर्थता ।
अपि कर्मण एवेति शङ्केदानीं निवार्यते ॥ ४५ ॥

अन्तवन्तः क्षत्रिय ते जयन्ति
लोकाञ्जनाः कर्मणा निर्मितेन ।
ज्ञानेन विद्वांस्तेज अभ्येति नित्यं
न विद्यते ह्यन्यथा तस्य पन्थाः ॥ १८ ॥

पितृदेवादिलोकान् ते कृतेन कर्मणा जनाः ।
जयन्त्यन्तवतो लोकान्, नैवानन्तं जयन्ति ते ॥ ४६ ॥

स्वात्मभूतं परात्मानं लोकमेनं परं पदम् ।
अनन्तलोकसंप्राप्तिः एवं चेत् केन साध्यते ॥ ४७ ॥

ज्ञानेन तेज अभ्येति विद्वान् नित्यमनश्वरम् ।
कर्मणा न तदभ्येति, कस्मात् पुनरिदं तथा ॥ ४८ ॥

मुक्त्वैकं साधनं ज्ञानं न पन्था विद्यतेऽन्यथा ।
पूर्णानन्दस्वरूपस्य ज्योतिषः प्राप्तये क्वचित् ॥ ४९ ॥

अन्यो मार्गो हि नास्त्येव तथा च श्रूयते श्रुतिः ।

धृतराष्ट्र उवाच —

आभाति शुक्लमिव लोहितमिवाथो
कृष्णमथार्जुनं कोद्रवं वा ।
यद्ब्राह्मणः पश्यति यत्र विद्वा-
न्कथंरूपं तदमृतमक्षरं परम् ॥ १९ ॥

विद्वान् पश्यति यत् ब्रह्म तत् शुक्लं वाथ लोहितम् ॥
अर्जुनं कोद्रवं कृष्णं किमिवाभाति यत् तत् ।
अमृतं अक्षरं भाति कथंरूपं च तत्परम् ॥ ५१ ॥

सनत्सुजात उवाच —

नाभाति शुक्लमिव लोहितमिवाथो
कृष्णमथार्जुनं वा कोद्रवं वा ।
न पृथिव्यां तिष्ठति नान्तरिक्षे
नैतत्समुद्रे सलिलं बिभर्ति ॥ २० ॥

नैव शुक्लादिरूपेण ब्रह्म तदवभासते ।
ब्रह्मणो रूपहीनत्वात् तत्पृथिव्यां न तिष्ठति ॥ ५२ ॥

नान्तरिक्षे यतो ब्रह्म स्वे महिम्नि प्रतिष्ठितम् ।
पञ्चभूतात्मकं देहं सलिलमिति कीर्त्यते ॥ ५३ ॥

अत्र सलिलशब्दो हि पञ्चभूतोपलक्षणम् ।
ब्रह्मणो यदि संसारान्तर्वर्तित्वं भवेत्तदा ॥ ५४ ॥

संसारानुप्रविष्टत्वात् भवेद्घटपटादिवत् ।
रूपादिमत्त्वं अन्यस्मिन् अवस्थानं च संभवेत् ॥ ५५ ॥

इदं पुनरपूर्वादिलक्षणत्वात् कदाचन ।
नानुप्रविष्टं संसारे तस्मात् रूपादिवर्जितम् ॥ ५६ ॥

तर्हि न कस्य कुत्रापि ब्रह्म तदुपलभ्यते ।

नैवर्क्षु तन्न यजुःषु नाप्यथर्वसु
न दृश्यते वै विमलेषु सामसु ।
रथन्तरे बार्हते वापि राजन्
महाव्रतस्यात्मनि दृश्यते तत् ॥ २१ ॥

ऋगादौ नोपलभ्येत, दृश्यते तु तदात्मनि ॥ ५७ ॥

महाव्रतगुणाः प्रोक्ताः तत्संयुक्तस्य चात्मनि ।
दृश्यते, तत् परं ब्रह्म नेदंतया घटादिवत् ॥ ५८ ॥

अपि त्वात्मनि विस्पष्टं आत्मतया हि सिध्यति ।
इदानीं तत्स्वरूपं च तद्दर्शनं च तत्फलम् ॥ ५९ ॥

श्लोकद्वयेन देवर्षिः निर्दिशत्यत्र सुस्फुटम् ।

अवारणीयं तमसः परस्ता-
त्तदन्ततोऽभ्येति विनाशकाले ।
अणीयरूपं च तथाप्यणीयसां
महत्स्वरूपं त्वापि पर्वतेभ्यः ॥ २२ ॥

तदेतदह्ना संस्थितं भाति सर्वं
तदात्मवित्पश्यति ज्ञानयोगात् ।
तस्मिञ्जगत्सर्वमिदं प्रतिष्ठितं
य एतद्विदुरमृतास्ते भवन्ति ॥ २३ ॥

यदिदं दृश्यते ब्रह्म महात्रतस्य चात्मनि ॥ ६० ॥

नूनमवारणीयं तत् सर्वत्रापि गतं यतः ।
परस्तात् तमसोऽज्ञानात् अन्ततोऽभ्येति तत् जगत् ॥

ब्रह्म प्रलयकाले तदणीयोऽपि महद्भवेत् ।
लोकेऽणुत्वमहत्त्वाद्याः दृश्यन्ते ये विचित्रतः ॥ ६२ ॥

तदेतच्च जगत्सर्वं ब्रह्मण्येव सुसंस्थितम् ।

अन्हा प्रकाशरूपेण विभाति च तदात्मना ॥ ६३ ॥

आत्मवित् पश्यति ब्रह्म ज्ञानयोगात् न चान्यथा ।
न क्वचित् कर्मयोगेन, तस्मिन्नेव परात्मनि ॥ ६४ ॥

प्रतिष्ठितं जगत्सर्वं, एवं ब्रह्म हि ये विदुः ।
एतेऽमरणधर्माणः ब्रह्मभूता भवन्ति च ॥ ६५ ॥

इति सनत्सुजातीयभाष्यसंग्रहे
तृतीयोऽध्यायः ॥

चतुर्थोऽध्यायः ।

निर्धार्य ब्रह्मणो रूपं ज्ञानयोगेन लभ्यते ।
आत्मनो दर्शनं चेति पूर्वमुक्तं हि तत्पुनः ॥ १ ॥

स्वरूपं दर्शयित्वा तत्र रूपं पश्यन्ति योगिनः ।
इत्याह भगवानत्र चतुर्थेऽध्याय आदरात् ॥ २ ॥

यत्तच्छुक्रं महज्ज्योतिर्दीप्यमानं महद्यशः ।
यद्वै देवा उपासते यस्मादर्को विराजते ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

ब्रह्मवित् पश्यति ज्ञानयोगात् यत् यस्य बोधतः ।
अमृताश्च भवन्तीति पुरोक्तं तद्धि निर्मलम् ॥ ३ ॥

शुक्लं शुद्धं अविद्यादिदोषगन्धविवर्जितम् ।
तदेव स्यात् महज्ज्योतिः सर्वावभासकं यतः ॥ ४ ॥

दीप्यमानं च तद्ब्रह्म भ्राजमानं महद्यशः ।
यद्वै ब्रह्माखिला देवा इन्द्रादय उपासते ॥ ५ ॥

ज्योतिषो ब्रह्मणो यस्मात् आदित्योऽर्को विराजते ।
एवंभूतं परात्मानं भगवन्तं सनातनम् ॥ ६ ॥

योगिन एव पश्यन्ति न योगरहिताः क्वचित् ।

शुक्राद्ब्रह्म प्रभवति ब्रह्म शुक्रेण वर्धते ।
तच्छुक्रं ज्योतिषां मध्येऽतप्तं तपति तापनम् ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

पूर्वोक्तात् ब्रह्मणः शुक्रात् शुद्धादेवोदपद्यत ॥ ७ ॥

ब्रह्म हिरण्यगर्भाख्यं तच्च शुक्रेण वर्धते ।
विराडात्मस्वरूपेण न तप्तं तपति तापनम् ॥ ८ ॥

सूर्यादिज्योतिषां मध्ये तैरप्रकाशितं स्वयम् ।
प्रकाशते तथा तेषां ज्योतिषां च प्रकाशकम् ॥ ९ ॥

यो ह्यन्यानवभास्यस्स्यात् यश्च सर्वावभासकः ।
यस्स्वयं भासते नित्यं तं हि पश्यन्ति योगिनः ॥ १० ॥

इदानीं पूर्णवाक्यार्थं श्लोकेऽस्मिन् कथयत्यसौ ।

पूर्णात्पूर्णमुद्धरन्ति पूर्णात्पूर्णं प्रचक्षते ।
हरन्ति पूर्णात्पूर्णं च पूर्णेनैवावशिष्यते ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

देशतः कालतः पूर्णात् ब्रह्मणः परमात्मनः । ११ ॥

वस्तुतश्चापरिच्छिन्नात् पूर्णमेवोद्धरन्ति हि ।
जीवरूपेण, यत्पूर्णात् उद्धृतं जीवरूपतः ॥ १२ ॥

पूर्णादुद्धृतत्वादेव तच्च पूर्णं प्रचक्षते ।
इदं जीवस्वरूपं च पूर्णमाचक्षते बुधाः ॥ १३ ॥

जीवात्मना स्थितात् तस्मात् पूर्णात् पूर्णं हरन्ति च ।
आत्मस्वरूपमात्रं तु यत् शरीरेन्द्रियादिषु । १४ ॥

अनुप्रविष्टमात्मानं एतेषामपि साक्षिणम् ।
सर्वान्तरं विनिष्कृष्य देहद्वयात् हरन्ति च ॥ १५ ॥

ततः तदुद्धृतेनैव मूलभूतेन शिष्यते ।
पूर्णानन्दस्वरूपेण शिष्यते ब्रह्मणा सह ॥ १६ ॥

संयुज्य चित्सदानन्दाद्वैत ब्रह्मात्मना स्थितः ।
आत्मा पूर्णस्वरूपो यः तं हि पश्यन्ति योगिनः । १७ ॥

इदानीं द्वासुपर्णेति मन्त्रार्थं कथयत्यसौ ।

आपोऽथाद्भ्यः सलिलं तस्य मध्ये
उभौ देवौ शिश्रियातेऽन्तरिक्षे ।
आद्ध्रीचीः सविषूचीर्वसाना-
वुभौ बिभर्ति पृथिवीं दिवं च ॥ ४ ॥

योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

आपो हि प्रथमं सृष्टा ह्येतस्मात् परमात्मनः ॥ १८ ॥

अत्र दृष्टोऽयमप्छन्दः पञ्चभूतोपलक्षणम् ।
अनेन सूक्ष्मसृष्टिस्तु प्रोक्ताऽथ तदनन्तरम् ॥ १९ ॥

अद्भ्यश्च पूर्वसृष्टाभ्यः सलिलं पाञ्चभौतिकम् ।
स्थूलदेहादिकं सृष्टं, देहात्मना स्थितस्य च ॥ २० ॥

सलिलस्य पुनर्मध्ये ह्यन्तरिक्षेऽवकाशिनि ।
व्योमनि हृदयाकाशे परात्मा जीव इत्यपि ॥ २१ ॥

दीप्तिमन्तौ उभौ देवौ शिश्रियाते समाश्रितौ ।
यस्मात् ता आभिमुख्येन ध्रियमाणाः स्थिताऽथवा ॥

अञ्चन्तीव दिशः तस्मात् आद्ध्रीच्य इति स्मृताः ।
विष्वग्गमनहेतोश्च विषूचीत्युपदिक् स्मृता ॥ २३ ॥

प्राच्यादिकाः दिशः सर्वाः वसानौ स्त उभावपि ।

आत्मानौ छादयन्तौ स्तो, जीवात्मा पर एव च ॥ २४॥

तयोः पृथ्वीं बिभर्त्येकः बिभर्ति चापरो दिवम् ।
स्वभूतचित्सदानन्दाद्वैत ब्रह्मस्वरूपताम् ॥ २५ ॥

अनवगम्य देहादौ अनात्मन्यात्मभावनाम् ।
आपन्नो यः स जीवात्मा भूतभौतिक लक्षणम् । २६ ॥

कर्मफलानुरूपेण सुखदुःखस्वभावकम् ।
देहादिकं बिभर्त्येकः पृथिवीशब्दलक्षितम् ॥ २७ ॥

स्वात्मरूपं बिभर्त्यन्यः दिवं तु द्योतनात्मकम् ।
यः स्वात्ममाययाऽऽत्मानं प्राणाद्यनन्तभिन्नताम् । २८॥

कृत्वाऽन्तरा प्रविश्यास्तेऽभिपश्यन् तं तु योगिनः ।
पश्यन्ति परमात्मानं भगवन्तं सनातनम् ॥ २९ ॥

इदानीं ज्ञानिनः स्वात्मन्यवस्थानं प्रदर्श्यते ।

चक्रे रथस्य तिष्ठन्तं ध्रुवस्याव्ययकर्मणः ।
केतुमन्तं वहन्त्यश्वास्तं दिव्यमजरं दिवि ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

ईशात्मना स्थितस्यास्य ध्रुवस्याव्ययकर्मणः ॥ ३० ॥

परमेशशरीरस्य लोकत्रयस्वरूपतः ।
अवस्थितस्य मध्ये च चक्रे चङ्क्रमणात्मके । ३१ ॥

देहे तिष्ठन्तमात्मानं केतुमन्तं हि चेतनम् ।
अतश्चाप्राकृतं दिव्यं जरामृत्य्वादिवर्जितम् ॥ ३२ ॥

उदयास्तादिरहितज्ञानात्मना व्यवस्थिते ।
ब्रह्मण्येव सदानन्दे दिवि च द्योतनात्मके ॥ ३३ ॥

इन्द्रियाणि वहन्त्यश्वाः न पराग्विषये क्वचित् ।
विषयेष्वेव वर्तन्ते इन्द्रियाणि स्वभावतः ॥ ३४ ॥

विज्ञानसारथिना तु समाकृष्टानि चेत्तदा ।
दिव्येव तानि गच्छन्ति दिव्येव परमात्मनि ॥ ३५ ॥

वहन्ति तपसा यत तं तु पश्यन्ति योगिनः ।
ज्ञानेन सदृशं किञ्चित् नेत्याह भगवान् ततः ॥ ३६ ॥

न सादृश्ये तिष्ठति रूपमस्य
न चक्षुषा पश्यति कश्चिदेनम् ।
मनीषयातो मनसा हृदा च
य एनं विदुरमृतास्ते भवन्ति ॥ ६ ॥

योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

अस्य परात्मनो रूपं सादृश्ये नैव तिष्ठति ।
अत एवोपमानादेः अविषयत्वमस्य च ॥ ३७ ॥

एनं सर्वान्तरं कश्चित नैव पश्यति चक्षुषा ।
पश्यन्ति तं कथं तर्हि, अध्यवसायरूपया ॥ ३८ ॥

मनीषया च सङ्कल्पविकल्पादिस्वरूपिणा ।
मनसा च हृदा चैव नान्यत्र हृदयं विना ॥ ३९ ॥

आत्मनः उपलब्धिः स्यादिति प्रोक्तं हृदा इति ।
अथवा न मनोबुद्धिमात्रात् पश्यन्ति योगिनः ॥ ४० ॥

अपि तु हृदयस्थस्य परेशस्य ह्यनुग्रहात् ।
एनं च परमात्मानं अयमस्मीति ये विदुः ॥ ४१ ॥

एतेऽमरणधर्माणः भवन्त्येव न संशयः ।
यमात्मानं विदित्वैवं अमृताश्च भवन्ति तम् ॥ ४२ ॥

योगिन एव पश्यन्ति भगवन्तं सनातनम् ।
इदानीमिन्द्रियाणां च प्रवृत्तिः विषयेषु चेत् ॥ ४३ ॥

अनर्थायैव सा स्यादित्याह स भगवान् ऋषिः ।

द्वादश पूगाः सरितो देवरक्षिता मध्वीशते ।
तदनुविधायिनस्तदा संचरन्ति घोरम् ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

वागादिश्रवणादीनि कर्मज्ञानेन्द्रियाणि च ॥ ४४ ॥

बहिरन्तः मनो बुद्धिः इत्येते द्वादश स्मृताः।
मत्वा पुरुषनानात्वं एकैकस्यापि पूगता ॥ ४५ ॥

एते द्वादश पूगाश्च सरितः सरणे रताः।
परात्मनैव देवेन रक्षिता ईशते मधु ॥ ४६ ॥

मधुवत् विषयं सर्वं एते नियमयन्ति च।
असाङ्कर्येण तत्सर्वं भुञ्जते विषयं स्वकम् ॥ ४७ ॥

यदा तेऽनुभवन्त्येवं तदा चानुविधायिनः।
विषयतत्परा घोरं संसारं सञ्चरन्ति ते ॥ ४८ ॥

यत एवं ततः सर्वविषयेभ्यः पराङ्मुखः।
इन्द्रियाण्युपसंहृत्य स्वात्मन्येव वशं नयेत् ॥ ४९ ॥

ईशते रक्षिता येन तं तु पश्यन्ति योगिनः।
प्रदर्श्यतेऽत्र सादृश्यं उपमानोपमेययोः ॥ ५० ॥

तदर्धमासं पिबति संचितं भ्रमरो मधु।
ईशानः सर्वभूतेषु हविर्भूतमकल्पयत्।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

अर्धमासार्जितं यद्वत् पिबेन्मधुकरो मधु।
अर्धमासं, तथा जीवः पिबेत् तद्विषयं मधु ॥ ५१ ॥

पूर्वजन्मार्जितं कर्म भुङ्क्तेऽन्यस्मिंश्च जन्मनि।

जीवो भ्रमणशीलत्वात् संसारी भ्रमरः स्मृतः ॥ ५२ ॥

कर्मानन्तरभावित्वात् ऐहिकफलकर्मणः ।
फलसिद्धिः भवेन्नूनं अमुत्र फलदायिनः ॥ ५३ ॥

कर्मणः फलसिद्धिस्तु विनाशित्वाच्च कर्मणः ।
कथं भवेदिति प्राह, केवलात् कर्मणो यदि ॥ ५४ ॥

फलसिद्धिः तदा दोषः स्यादेषः किंतु नो तथा ।
कृतप्रयत्नसापेक्षः ईशानः परमेश्वरः । ५५ ॥

सर्वेष्वपि च भूतेषु ह्यग्निहोत्रादिकर्मणाम् ।
तत्तत्कर्मानुसारेण हविर्भूतमकल्पयत् ॥ ५६ ॥

अन्नाद्यं कल्पयामास योऽकल्पयत् तथा हविः ।
ईशानः सर्वभूतेषु तं तु पश्यन्ति योगिनः ॥ ५७ ॥

किमेते परिवर्तन्ते एव मध्वाशिनः सदा ।
एवं बंभ्रम्यमाणाः स्युः ज्ञानं लब्ध्वा कदापि वा ॥५८॥

किं विमुक्ता भवन्त्येते इत्याशङ्क्य तदोच्यते ।

हिरण्यपर्णमश्वत्थमभिपत्य ह्यपक्षकाः ।
तत्र ते पक्षिणो भूत्वा प्रपतन्ति यथासुखम् ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

हितं च रमणीयं यत् तत् हिरण्यं तथा भवेत् ॥ ५९ ॥

यस्य पर्णं स ह्यश्वत्थः संसारारूढ्यमहीरुहः ।
ज्ञानपक्षविहीना ये मध्वाशिनो ह्यरक्षकाः ॥ ६० ॥

तेऽभिपत्य समारुह्य तमश्वत्थं अवाप्य च ।
वेदसंयोगि विश्वादिदेहं तत्रैव देहके ॥ ६१ ॥

पक्षिणो ज्ञानिनो भूत्वा प्रपतन्ति यथासुखम् ।
मुक्ता भवन्ति यं ज्ञात्वा प्रपतन्ति यथासुखम् ॥ ६२ ॥

योगिन एव पश्यन्ति तमात्मानं सनातनम् ।
इदानीं दर्शयत्यत्र योगं समाधिलक्षणम् ॥ ६३ ॥

अपानं गिरति प्राणः प्राणं गिरति चन्द्रमाः ।
आदित्यो गिरते चन्द्रमादित्यं गिरते परः ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

अपानं गिरति प्राणः प्राणं च चन्द्रमा मनः ।
तं चन्द्रं बुद्धिरादित्यः बुद्धिं च गिरते परः ॥ ६४ ॥

चन्द्रमाश्च तथादित्यो मनोबुद्ध्यधिदैवते ।
प्राणे समाधिवेलायां अपानमुपसंहरेत् ॥ ६५ ॥

प्राणं मनसि तत् बुद्धौ बुद्धिं च परमात्मनि ।
संनिरुध्य स्वतः सिद्धचित्सदानन्दरूपतः ॥ ६६ ॥

अद्वैतब्रह्मरूपेण सर्वदैवावतिष्ठते ।
जीवात्मना परस्यैवावस्थानमुच्यतेऽधुना ॥ ६७ ॥

एकं पादं नोत्क्षिपति सलिलाद्धंस उच्चरन् ।
तं चेत्सततमुत्क्षिपेन्न मृत्युर्नामृतं भवेत् ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

हन्त्यविद्यां च तत्कार्यं चेति हंसः परः श्रुतः ।
हंसाख्यः परमात्माऽयं भूतभौतिकलक्षणात् ।
सलिलादुच्चरन्नूर्ध्वं संसाराद्बहिरेव च ॥ ६८ ॥

वर्तमानः चरन्नेकं स्वपादं जीवनामकम् ।
नोत्क्षिपति न संसारात् उद्धरति कदाचन । ६९ ॥

रूपं रूपं तु हंसोऽयं प्रतिरूपोऽवतिष्ठते ।
कस्मान्नोत्क्षिपतीत्याह, जीवाख्यं सततं यदि ॥ ७० ॥

संततयायिनं पादं उत्क्षिपेत् स्वस्य मायया ।
प्राणाद्यनन्तरूपेण कृत्वाऽऽत्मानं च तेष्वपि ॥ ७१ ॥

जीवात्मना प्रविश्यासौ नावतिष्ठति चेत्तदा ।
नैव मृत्युः भवेत् क्वापि जन्ममृत्य्वादिलक्षणः ॥ ७२ ॥

संसारिणः तदाऽभावात् नानर्थः संसृतिर्भवेत् ।
तदाऽननुप्रविष्टस्य दर्शनासंभवादपि ॥ ७३ ॥

तथाऽमृतत्वं मोक्षं च नैव सिद्ध्येत् कदाचन ।
जीवाख्यपादरूपेण चित्सदानन्दरूपतः ॥ ७४ ॥

अद्वैतब्रह्मरूपेण त्रिपाद्वान् च यः स्थितः ।
एवं च परमात्मानं पश्यन्ति किल योगिनः ॥ ७५ ॥

अयं उपाधिना केन जीवात्मनाऽवतिष्ठते ।
इत्याशङ्क्य परस्यैव लिङ्गोपाधिकतोदिता ॥ ७६ ॥

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा
लिङ्गस्य योगेन स याति नित्यम् ।
तमीशमीड्यमनुकल्पमाद्यं
पश्यन्ति मूढा न विराजमानम् ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

स एव सच्चिदानन्दाद्वितीयः पुरुषः परः ।
सर्वभूतान्तरात्मा सन् लिङ्गदेहस्य योगतः ॥ ७७ ॥

परिमाणपरिच्छिन्नो ह्यङ्गुष्ठमात्र उच्यते ।
लिङ्गस्य योगतोऽङ्गुष्ठमात्रस्सन् संसरत्ययम् ॥ ७८ ॥

सर्वस्यापीशिता चेड्यः स्तुत्य आद्यो भवत्ययम् ।
आत्मनानुप्रविश्येदं कल्पयतीति हेतुना ॥ ७९ ॥

अनुकल्प इति प्रोक्तः एवंलक्षणलक्षितम् ।
तं अविवेकिनो मूढाः देहद्वयाभिमानिनः ॥ ८० ॥

न पश्यन्ति यतः तस्मात् ब्रह्मभावस्य चात्मनः ।
अज्ञानात् संसरन्तीह संसरन्त्यविवेकिनः । ८१ ॥

यमात्मानमपश्यन्तः तं तु पश्यन्ति योगिनः ।

गूहन्ति सर्पा इव गह्वरेषु
क्षयं नीत्वा स्वेन वृत्तेन मर्त्यान् ।
ते विप्रमुह्यन्ति जना विमूढा-
स्तैर्दत्ता भोगा मोहयन्ते भवाय ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

गह्वरेभ्यो विनिष्क्रम्य सर्पाः किल स्वभावतः ॥ ८२ ॥

विषदानादिना मर्त्यान् क्षयं नीत्वा बिलं पुनः ।
गूहन्ते छादयन्त्येते स्वमात्मानं यथा तथा ॥ ८३ ॥

इन्द्रियाह्वयसर्पाश्च शयानाः श्रवणादिषु ।
श्रोत्रादिभ्यः विनिर्गत्य दत्वा च विषयं विषम् ॥ ८४ ॥

मर्त्यानपि क्षयं नीत्वा स्वात्मानं छादयन्ति ते ।
तद्विषेणाभिभूतास्तु जना मुह्यन्ति सर्वशः ॥ ८५ ॥

अन्यत् किंचिन् न जानन्ति विषयान्धाः प्रमोहिताः ।
इन्द्रियभुजगैः दत्ता भोगा विषसमा नरान् ॥ ८६ ॥

अत्यन्तं मोहयन्ते च भवन्ति मोहहेतवः ।
विषयैर्मोहनं यत् तत् भवाय भवति ध्रुवम् ॥ ८७ ॥

गर्भजन्मजरामृत्युसंसाराय न संशयः ।
यमदृष्ट्वा प्रमुह्यन्ति तं तु पश्यन्ति योगिनः ॥ ८८ ॥

इदानीं ज्ञानिनां मोक्षस्वरूपं दर्शयत्ययम् ।

असाधना वापि ससाधना वा
समानमेतद्दृश्यते मानुषेषु ।
समानमेतदमृतस्येतरस्य
युक्तास्तत्र मध्व उत्सं समापुः ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

असाधना विहीना ये शमदमादिसाधनैः ॥ ८९ ॥

ससाधनास्तु तैर्युक्ताः, आत्मा तेषूभयेष्वपि ।
साधारणो मनुष्येषु दृश्यते हि समं तथा ॥ ९० ॥

अमृतस्येतरस्यापि मोक्षस्य संसृतेरपि ।
तेषां मध्ये तु ये युक्ताः शमदमादिसाधनैः ॥ ९१ ॥

योगिनः तत्र तस्मिन् ते विष्णोश्च परमे पदे ।
मध्वो मधुन उत्सं हि समापुः ब्रह्मणः सुखम् ॥ ९२ ॥

पूर्णानन्दप्रवाहस्य मूलस्थानं हि तत्पदम् ।
यं प्राप्नुवन्ति ते युक्ताः तं तु पश्यन्ति योगिनः ॥

उभौ लोकौ विद्यया व्याप्य याति
तदाहुतं चाहुतमग्निहोत्रम् ।
मा ते ब्राह्मी लघुतामादधीत
प्रज्ञानं स्यान्नाम धीरा लभन्ते ॥

योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

ब्रह्मात्मविषया विद्या तया लोकावुभावपि ।
व्याप्य याति परं ब्रह्म पूर्णानन्दं यतस्ततः ॥ ९४ ॥

अहुतमग्निहोत्रं चेत् आभिमुख्येन तत् हुतम् ।
आत्मज्ञानप्रभावात् स्यात्, अग्निहोत्रादिकर्मणाम् ॥

फलं सर्वमनेनैव संपादितं भवेत्खलु ।
यतोऽयं विद्यया व्याप्य यात्यहुतं यतो हुतम् । ९६ ॥

या ब्रह्मविषया विद्या सा माऽऽदधीत कर्मवत् ।
लघुतां मर्त्यभावं ते, किं तु संपादयत्त्वियम् ॥ ९७ ॥

प्रज्ञानं परमात्मानं आत्मत्वेनावगच्छतः ।
प्रज्ञानं ब्रह्मणो नाम, धीरा धीमन्त एव हि ॥ ९८ ॥

तल्लभन्ते तदेतच्च पश्यन्ति किल योगिनः ।

एवंरूपो महानात्मा पावकं पुरुषो गिरन् ।
यो वै तं पुरुषं वेद तस्येहात्मा न रिष्यते ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

प्रज्ञानैकरसब्रह्मस्वरूपो यः प्रकाशते ॥ ९९ ॥

स ब्रह्मैव महानात्मा संपद्यते स पावकम् ।
सर्वस्याप्युपसंहारकारणं पावकः स्मृतः ॥ १०० ॥

यो वै सकारणं कार्यं पुरुषो विद्यते गिरन् ।
स्वात्मन्येवोपसंहर्ता तं ज्ञानैकरसं च यः । १०१ ॥

पूर्णं पुरिशयं वेद जानात्ययमहं त्विति ।
प्रज्ञानं परमात्मानं आत्मत्वेनावगच्छतः ॥ १०२ ॥

इहैव तस्य देहेऽस्मिन् आत्मा हि नैव रिष्यते ।
न नश्यति यतस्तस्य इत उत्क्रान्तेरसंभवः ॥ १०३ ॥

विनाशस्य किलोत्क्रान्तिनिमित्तत्वं भवेदिति ।
यं विदित्वा न रिष्येत तं तु पश्यन्ति योगिनः ॥ १०४ ॥

तस्मात्सदा सत्कृतः स्या-
न्न मृत्युरमृतं कुतः ।
सत्यानृते सत्यसमानुबन्धिनी
सतश्च योनिरसतश्चैक एव ॥

योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

सर्वदा सच्चिदानन्दाद्वैतब्रह्म त्वहर्निशम् ।
आत्मत्वेनाभिमन्येत यः स स्यात् सत्कृतः सदा ॥

यस्मात् तस्य च विज्ञानात् आत्मनाशो न विद्यते ।
न मृत्युः तस्य संसारः जन्ममरणलक्षणः ॥ १०६ ॥

यतस्तत् मृत्युसापेक्षं अमृतत्वं कुतो भवेत् ।
सत्यानृते च वर्तेते सत्यसमानुबन्धिनी ॥ १०७ ॥

सत्यभूतमधिष्ठानं अनुबध्यैव ते स्थिते ।
रज्ज्वां सर्पवदेते स्त', कथं तदवगम्यते ॥ १०८ ॥

लौकिकस्य सतो योनिः कारणं ब्रह्म एव हि ।
व्यावहारिकरूप्यादेः असतश्च तदेव हि ॥ १०९ ॥

एकमेवाद्वितीयं तत् कारणं उभयोरपि ।
तस्मात् ते कारणब्रह्म सत्यसमानुबन्धिनी ॥ ११० ॥

यमनुबध्य वर्तेते ते तं पश्यन्ति योगिनः ।

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा
न दृश्यतेऽसौ हृदये निविष्टः ।
अजश्चरो दिवारात्रमतन्द्रितश्च
स तं मत्वा कविरास्ते प्रसन्नः ॥ १८ ॥

आकाशादिशरीरान्तं जगत्सृष्ट्वा प्रविश्य तत् ॥ १११ ॥

हृदये च निविष्टस्सन् अन्तरात्मा न दृश्यते ।
स्वकीयचित्सदानन्दाद्वितीयब्रह्मरूपतः ॥ ११२ ॥

अजोऽयं जन्मना हीनः चरः चराचरात्मकः ।
निष्कृष्य पञ्चकोशेभ्यो ह्यहोरात्रमतन्द्रितः ॥ ११३ ॥

मत्वा सर्वान्तरात्मानं प्रसन्नोऽयं कविः स्थितः ।
कृतकृत्यो भवत्येषः इत्यर्थोऽत्र प्रतीयते ॥ ११४ ॥

तस्माच्च वायुरायातस्तस्मिंश्च प्रलयस्तथा ।
तस्मादग्निश्च सोमश्च तस्माच्च प्राण आगतः ॥

तत्प्रतिष्ठा तदमृतं लोकास्तद्ब्रह्म तद्यशः ।
भूतानि जज्ञिरे तस्मात्प्रलयं यान्ति तत्र च ॥

ब्रह्मणः सर्वमुद्भूतं तस्मिन्नेव प्रलीयते ।

उभौ च देवौ पृथिवीं दिवं च
दिशश्च शुक्रं भुवनं बिभर्ति ।
तस्माद्दिशः सरितश्च स्रवन्ति
तस्मात्समुद्रा विहिता महान्तः ॥

अनन्तत्वमिदानीं च ब्रह्मणः कथयत्यसौ ॥ ११५ ॥

यः सहस्रं सहस्राणां पक्षानाहृत्य संपतेत् ।
नान्तं गच्छेत्कारणस्य यद्यपि स्यान्मनोजवः ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

सहस्राणां सहस्रं वा पक्षानाहृत्य चात्मनः ।
पक्षान् कृत्वा प्रयत्नेन कोटिकल्पमनेकशः ॥ ११६ ॥

संपतेद्य यः पुमान् सर्वकारणस्य परात्मनः ।
नान्तं गच्छेत् कदाऽप्येषः यद्यप्यसौ मनोजवः ॥ ११७ ॥

तथापि नैति तस्यान्तं यस्मादन्तं न गच्छति ।
परमात्मा ततोऽनन्तः तं च पश्यन्ति योगिनः ॥ ११८ ॥

अदर्शने तिष्ठति रूपमस्य

पश्यन्ति चैनं सुसमिद्धसत्त्वाः ।

हीनो मनीषी मनसाभिपश्ये-
य एनं विदुरमृतास्ते भवन्ति ॥ २३ ॥

विषये दर्शनायोग्ये रूपमस्य परात्मनः ।
तिष्ठति हि तथाप्येनं नूनं पश्यन्ति केचन ॥ ११९ ॥

के? सुसमिद्धसत्वा ये यज्ञादिभिश्च साधनैः ।
विमलीकरणद्वारा यदन्तःकरणं भृशम् ॥ १२० ॥

सुष्ठु सम्यक् समिद्धं स्यात् दीप्तं सुविमलीकृतम् ।
यस्मादेवं ततो हीनः रागादिमलवर्जितः ॥ १२१ ॥

शुद्धसत्वो मनीषी सोऽभिपश्येत मनसैव तम् ।
इत्येवं परमात्मानं अयमस्मीति ये विदुः ॥ १२२ ॥

एतेऽमरणधर्माणः भवन्त्येव न संशयः ।

इमं यः सर्वभूतेषु आत्मानमनुपश्यति ।
अन्यत्रान्यत्र युक्तेषु स किं शोचेत्ततः परम् ॥

सर्वान्तरमिमं सर्वभूतेषु सर्वजन्तुषु ॥ १२३ ॥

योऽनुपश्यति चात्मानं अन्यत्रान्यत्र भेदतः ।
देहेन्द्रियादियुक्तेषु शरीराद्यभिमानिषु ॥ ॥ १२४ ॥

ततः परं कुतः शोचेत किमर्थमनुशोचति ।
पश्यतोऽस्य कृतार्थत्वात् न किंचिदनुशोचति ॥ १२५ ॥

यथोदपाने महति सर्वतःसंप्लुतोदके ।
एवं भूतेषु सर्वेषु ब्राह्मणस्य विशेषतः ॥ २५ ॥

उदपाने च महति सर्वतः संप्लुतोदके ।
यथाऽर्थः किल नास्त्येव कृतकृत्यस्य सर्वशः ॥ १२६ ॥

एवं सर्वेषु भूतेषु स्वात्मानं पश्यतो मुनेः ।
न हि प्रयोजनं किंचित् ब्राह्मणस्य विशेषतः । १२७ ॥

उक्तार्थस्य द्रढिम्नेऽद्य स्वानुभूतिं प्रदर्शयन् ।
श्लोकत्रयेण स प्राह वामदेवादिवत् स्वयम् ॥ १२८ ॥

अहमेवास्मि वो माता पिता पुत्रोऽस्म्यहं पुनः ।
आत्माहमास्मि सर्वस्य यच्च नास्ति यदस्ति च ॥

अहमेवास्मि युष्माकं जनयित्री तथा पिता ।
अप्यहमेव पुत्रस्ते दुर्योधनादिरप्यहम् ॥ १२९ ॥

किमत्र बहु वक्तव्यं यच्च नास्ति यदस्ति च ।
सर्वस्य प्राणिजातस्य भवाम्यात्माऽहमेव हि ॥ १३० ॥

आधिभौतिकपित्रादि तावदत्र प्रदर्शितम् ।
आधिदैविकपित्रादिभावः प्रदर्श्यतेऽधुना ॥ १३१ ॥

पितामहोऽस्मि स्थविरः पिता पुत्रश्च भारत ।
ममैव यूयमात्मस्था न मे यूयं न चाप्यहम् ॥

अहमेवास्मि स्थविर इन्द्रादेश्च पितामहः ।
परात्मानादिसिद्धो यः स आत्माऽपि भवाम्यहम् ॥
हिरण्यगर्भ इन्द्रादेः यः पिताऽप्यहमेव सः ।
ममैव यूयमात्मस्थाः स्थिता यूयं ममात्मनि ॥ १३३ ॥
एवं सत्यपि सर्वेऽपि यूयं न परमार्थतः ।
स्थिता आत्मनि मे क्वापि तथा युष्मासु चाप्यहम् ॥
सर्वेषु प्राणिजातेषु कदाऽपि न व्यवस्थितः ।
एवं सत्यपि मे स्थानं आत्मैवेति निगद्यते ॥ १३५ ॥

आत्मैव स्थानं मम जन्म चात्मा
ओतप्रोतोऽहमजरप्रतिष्ठः ।
अजश्चरो दिवारात्रमतन्द्रितोऽहं
मां विज्ञाय कविरास्ते प्रसन्नः ॥ २८ ॥

अणोरणीयान्सुमनाः सर्वभूतेष्ववस्थितः ।
पितरं सर्वभूतानां पुष्करे निहितं विदुः ॥

आत्मैव हि मम स्थानं परमात्माऽऽश्रयो मम ।
नान्यः कश्चन, जन्मापि स एवात्मा भवेद्यतः ॥ १३६ ॥
तस्मादेव समुत्पन्नं जगदेतच्चराचरम् ।
ओतप्रोतस्वरूपेण जगदात्मा व्यवस्थितः ॥ १३७ ॥

जनयिता च युष्माकं अयमेव भवाम्यहम् ।
तथाऽजरप्रतिष्ठोऽहं जरामरणवर्जिते ॥ १३८ ॥

अजरे हि महिम्नि स्वे यस्मादहं प्रतिष्ठितः ।
सूक्ष्मात् सूक्ष्मतरो यस्मात् अणीयान्स्यादणोरपि ॥ १३९ ॥

रागद्वेषादिमात्सर्यशोकमोहादिवर्जितम् ।
केवलं चित्सदानन्दाद्वैतब्रह्मणि निष्ठितम् ॥ १४० ॥

आत्माकारं मनो यस्य भवेत्स सुमनास्स्मृतः ।
सर्वेषां च हृदंभोजेऽप्यहमात्मतया स्थितः ॥ १४१ ॥

एवं देवर्षिणा स्वानुभूतिरत्र प्रकाशिता ।
अस्माकं तु प्रमाणं स्यात् स्वानुभूतिर्न केवलम् ॥ १४२ ॥

एवमेवावगच्छन्ति स्वात्मानमितरे बुधाः ।
इत्यत्र दर्शयन्नाह ये चान्ये सनकादयः ॥ १४३ ॥

सन्ति ब्रह्मविदः तेऽपि पितरं परमेश्वरम् ।
जनयिता हि सर्वेषां प्राणिनामपि यो भवेत् ॥ १४४ ॥

तं पुष्करे हृदंभोजमध्ये च निहितं विदुः ।
आत्मत्वेनावगच्छन्ति परात्मानं हृदि स्थितम् ॥ १४५ ॥

एवमेव श्रुतौ तेषां अनुभूतिः प्रदर्शिता ।
विदुषः स्वानुभूतिश्च विविधं वर्णिता श्रुतौ ॥ १४६ ॥

बृहदारण्यके वामदेवस्यानुभवः श्रुतः ।
अहं मनुरहं सूर्यः इति सर्वात्मभावतः ॥ १४७ ॥

तैत्तिरीयश्रुतौ तावत् सामगानेन दर्शितः ।
आत्मनश्च कृतार्थत्वद्योतनार्थं विशेषतः ॥ १४८ ॥

तथा तलवकारे च छान्दोग्येऽपि प्रदर्शितः ।
तत्रैव च त्रयः श्लोकाः भाष्यस्यान्ते उदाहृताः ॥१४९॥

नित्यशुद्धबुद्धमुक्तभावमीशमात्मना ।
भावयन् षडिन्द्रियाणि संनियम्य निश्चलः ॥ १ ॥

अस्ति वस्तु चिद्धनं जगत्प्रसूतिकारणम् ।
न नश्वरं तदुद्भवं जगत् तमोनुदं च यत् ॥ २ ॥

तत्पदैकवाचकं सदाऽमृतं निरञ्जनम् ।
चित्तवृत्तिदृक्सुखं तदस्म्यहं तदस्म्यहम् ॥ ३ ॥

इति श्रीमत्सनत्सुजातीयभाष्यसंग्रहे
चतुर्थोऽध्यायः समाप्तः ॥

॥ 'अङ्कोलं' श्लोकविवरणम् ॥

अङ्कोलं निजबीजसंततिरयस्कान्तोपलं सूचिका
साध्वी नैजविभुं लता क्षितिरुहं सिन्धुः
सरिद्वल्लभम् ।
प्राप्नोतीह यथा तथा पशुपतेः पादारविन्दद्वयं
चेतोवृत्तिरुपेत्य तिष्ठति सदा सा
भक्तिरित्युच्यते ॥

शिवानन्दलहर्याख्यस्तोत्ररत्नस्य मध्यगे ।
एकषष्ठितमे श्लोके भक्तेः भेदांश्च लक्षणम् ॥ १ ॥

बालानामपि बोधार्थं दत्वा दृष्टान्तपञ्चकम् ।
अतीव रम्यया रीत्या गुरवो वर्णयन्ति हि ॥ २ ॥

(१) बीजानि अङ्कोलवृक्षस्य पतितान्यपि भूतले ।
तरोर्मूलं स्वयं यान्ति तत्र लग्ना भवन्ति च ॥ ३ ॥

एवमीशस्य सन्तानवर्गान्तःपात्यहं यतः ।
तमेव मूलमाश्रित्य निःश्रेयसमवाप्नुयाम् ॥ ४ ॥

इति निश्चित्य यः तिष्ठन् शंभोः पादाम्बुजद्वयम् ।
सेवमानः सदा तस्य प्रीतिरूपा निरन्तरा ॥ ५ ॥

अचञ्चला मनोवृत्तिः भक्तिरित्यभिधीयते ।
स्वयं धृत्वोदरं मातुः लंबते मर्कटोशिशुः ॥ ६ ॥

एवमेष महेशानं सदाऽऽलम्ब्य स्थितो यतः ।
स मर्कटीकिशोराख्यन्यायोऽस्मिन् उपयुज्यते ॥ ७ ॥

(२) अयःकान्तशिला यद्वत् दूरस्थामपि सूचिकाम् ।
स्वयमेव समाकर्षेत् जगदीशः तथा स्वयम् ॥ ८ ॥

भक्तस्य दीनतां दृष्ट्वा तमुद्धर्तुं यदेच्छति ।
तदानीं तस्य भक्तस्य शम्भोः पादौ समाश्रिता ॥ ९ ॥

सदा तत्र दृढं लग्ना मनोवृत्तिरतिस्थिरा ।
अनन्यशरणा या स्यात् साऽपि भक्तिः भवेद्ध्रुवम् ॥

उद्धृत्य स्वमुखेनैव मार्जार्या नीयते शिशुः ।
स मार्जारीकिशोराख्यन्यायस्त्वत्र प्रवर्तते ॥ ११ ॥

(३) साध्वी पतिव्रता भर्तुः अविचार्य गुणागुणे ।
स्वधर्मनिरता नित्यं तस्य शुश्रूषणे रता ॥ १२ ॥

यथा भवेत् तथा शंभोः नित्यं पादाब्जसेवने ।
यो युक्तः परमप्रीत्या तस्य वृत्तिः मनोगता ॥ १३ ॥

श्लाघ्या भवेत् ततः साऽपि भक्तिरित्युच्यते बुधैः ।
एवमीश्वराधीना भक्तिः त्रेधा निगद्यते ॥ १४ ॥

त्रिष्वेतेषु च भक्तेषु दासभावः प्रदृश्यते ।
(४) समीपवर्तिनं वृक्षं समालम्ब्य लता यथा ॥ १५ ॥

आमूलाग्रं तमाच्छाद्य गूहतेऽस्य पृथक् स्थितिम् ।
एवमेव सदा तीव्रं सर्वभावेन चेश्वरम् ॥ १६ ॥

भजतेऽनन्यभावेन यः तद्भक्तिः विशिष्यते ।
ईशः तस्य पराधीनः भक्तस्य सखितां व्रजेत् ॥ १७ ॥

(५) नदी स्ववल्लभं वार्धिं प्राप्य तत्र प्रलीयते ।
नामरूपे परित्यज्य तत्तादात्म्यं समश्नुते ॥ १८ ॥

विस्मृत्यैवं स्वमात्मानं मनो यस्य परात्मनि ।
लीनं भवेत् सदा तस्य भक्तिः स्यादुत्तमोत्तमा ॥ १९ ॥

एषैव भक्तिरन्यत्र प्रोक्तमात्मनिवेदनम् ।
आत्मत्वेन गृहीतं यत् देहेन्द्रियमनोधियः ॥ २० ॥

पुत्रवित्तादिकं सर्वं भगवत्यर्पितं यतः ।
सा निष्ठा परमोत्कृष्टा चात्मार्पणमिति स्मृता ॥ २१ ॥

सगुणब्रह्मनिष्ठा चेत् सायुज्यं लभ्यते फलम् ।
निष्ठा चेन्निर्गुणे तत्त्वे कैवल्यं सिध्यति ध्रुवम् ॥ २२ ॥

तारतम्यात् मनोवृत्तेः भक्तिस्त्रेधा विविच्यते ।
तस्यैवाऽहं ममैवासौ स एवाहं इति क्रमात् ॥ २३ ॥

कर्ममार्गप्रवृत्तस्य तस्यैवाहमिति स्थितिः ।
तत्पराधीनताभावात् स्थिरा स्यात् द्वैतभावना ॥ २४ ॥

भक्तिमार्गे निरूढस्य ममैवासौ इति स्थितिः ।
किंचित्स्वातन्त्र्यसद्भावात् विशिष्टाद्वैतभावना ॥ २५ ॥

ज्ञानमार्गे प्ररूढस्य स एवाहमिति स्थितिः ।
भेदबुद्धेः प्रणष्टत्वात् सिध्यत्यद्वैतभावना ॥ २६ ॥

बीजानि सूचिका साध्वी चाद्ये दृष्टान्ततां गताः ।
लतोपमा द्वितीयस्य, तृतीयस्य भवेत् सरित् ॥ २७ ॥

दास्ये स्थितानां भक्तानां ईशाज्ञारूपकर्मणाम् ।
निर्वर्तनं यतो मुख्यं तेषां कर्म प्रशस्यते ॥ २८ ॥

सख्ये निरतचित्तानां सगुणब्रह्ममूर्तिषु ।
प्रेम्णः प्रधानता यस्मात् भक्तिः तेभ्यो हि रोचते ॥

आत्मार्पणपराणां तु भगवत्तत्त्वचिन्तनम् ।
यतः प्रधानतां याति ज्ञानाभ्यासरता हि ते ॥ ३० ॥

अङ्कोलश्लोक तात्पर्यं यत्किञ्चित् दर्शितं मया ।
प्रीयतां गुरुरेतेन स्वल्पेनापि दयानिधिः ॥

॥ श्रीरामश्शरणं मम ॥

धर्मसंस्थापनार्थाय यो जातो मायया हरिः ।
अयोध्याधिपतेः पुत्रः श्रीरामश्शरणं मम ॥ १ ॥

कौशिकेन वनं नीतः मध्ये संहृत्य ताटकाम् ।
रक्षिता तस्य यज्ञस्य श्रीरामश्शरणं मम ॥ २ ॥

अहल्याशापनिर्मोक्ता जनकेन सभाजितः ।
विश्वामित्रकथास्वादी श्रीरामश्शरणं मम ॥ ३ ॥

महेश्वरधनुर्दिव्यं दुरारोपं महाबलैः ।
बभञ्ज लीलया योऽसौ श्रीरामश्शरणं मम ॥ ४ ॥

पितुः संमतिमाज्ञाय वैदेहेन समर्पिताम् ।
वैदेहीं पाणिना गृह्णन् श्रीरामश्शरणं मम ॥ ५ ॥

निर्जित्य गर्वितं रामं क्षत्रोन्मूलकं भार्गवम् ।
अयोध्यायां सुखासीनः श्रीरामश्शरणं मम ॥ ६ ॥

चारित्रेण गुणौघेन रञ्जयन् निखिलान् जनान् ।
ख्यातो विग्रहवान् धर्मः श्रीरामश्शरणं मम ॥ ७ ॥

पित्रा सभ्यैः समालोच्य यौवराज्याभिषेचनम् ।
श्वोभावि निश्चितं यस्य श्रीरामश्शरणं मम ॥ ८ ॥

कैकेयीवरदानेन जनकः खिन्नमानसः ।
यस्यादिशद्वने वासं श्रीरामश्शरणं मम ॥ ९ ॥

पुत्रशोकात् मृते ताते भरतेनार्थितो भृशम् ।
चित्रकूटाश्रयः श्रीमान् श्रीरामश्शरणं मम ॥ १० ॥

भरतेन च यस्याभूत् भाषणं परमाद्भुतम् ।
धर्म्यं नीतिसमायुक्तं श्रीरामश्शरणं मम ॥ ११ ॥

गृहीत्वा पादुके यस्य राजपीठे निवेश्य ते ।
शशास भरतो राज्यं श्रीरामश्शरण मम ॥ १२ ॥

ऋषीणामभयं दत्वा चागस्त्यवचनात् ततः ।
पञ्चवट्यां सुखं तिष्ठन् श्रीरामश्शरणं मम । १३ ॥

हत्वा शूर्पणखाहेतोः आगतं सगणं खरम् ।
सीतया मानितः सम्यक् श्रीरामश्शरणं मम ॥ १४ ॥

रावणेन हतं गृध्रं सीतापहारिणा दिवम् ।
शक्त्या यः प्रेषयामास श्रीरामश्शरणं मम ॥ १५ ॥

कुत्राप्यलब्ध्वा वैदेहीं कबन्धवचनाद् गतः ।
सुग्रीवसख्यमन्विच्छन् श्रीरामश्शरणं मम ॥ १६ ॥

कृत्वाऽग्निसाक्षिकं सख्यं सुग्रीवे कृतकिल्बिषः ।
येन युद्धे हतो वाली श्रीरामश्शरणं मम ॥ १७ ॥

सुग्रीवप्रेषिते सैन्ये सीतान्वेषणतत्परे ।
गिरौ प्रस्रवणे तिष्ठन् श्रीरामश्शरणं मम ॥ १८ ॥

सीतामाश्वास्य लङ्केशं परिभर्त्स्य समागते ।
यस्मात्सीत् मारुतौ तोषः श्रीरामश्शरणं मम ॥ १९ ॥

अंगीकृत्य सखित्वेन सिन्धुतीरे विभीषणम् ।
नलेन बद्धवान् सेतुं श्रीरामश्शरणं मम ॥ २० ॥

मुञ्चता विह्वलं युद्धे रावणं येन दर्शिते ।
धीरत्वं धार्मिकत्वं च श्रीरामश्शरणं मम ॥ २१ ॥

कुम्भकर्णादिकान् हत्वा सुग्रीवादिसमन्वितः ।
रणमध्ये विरेजे यः श्रीरामश्शरणं मम ॥ २२ ॥

अन्ते हत्वा दशग्रीवं त्रिलोकीकण्टकं च यः ।
विरराज श्रिया युक्तः श्रीरामश्शरणं मम ॥ २३ ॥

सीतां सशपथं वह्नौ लीनामुदधृत्य पावकः ।
शुद्धेति प्रददौ यस्मै श्रीरामश्शरणं मम ॥ २४ ॥

ततः पुष्पकयानेन भरद्वाजाश्रमं गतः ।
नन्दिग्रामं ततः प्राप्तः श्रीरामश्शरणं मम ॥

यस्यागमेन सर्वेषां मोदः सीमातिगोऽभवत् ।
त्रैलोक्यहर्षदो यश्च श्रीरामश्शरणं मम ॥ २६ ॥

यं हि रत्नमये पीठे निवेश्य सह सीतया ।
अभ्यषिञ्चन् वसिष्ठाद्याः श्रीरामश्शरणं मम ॥ २७ ॥

॥ श्रीमद्भगवद्गीता भाष्योपक्रमसंग्रहः ॥

नारायणः परोऽव्यक्तात् अण्डमव्यक्तसंभवम् ।
अण्डस्यान्तरिमे लोकाः सप्तद्वीपा च मेदिनी ॥

अव्यक्तात् यः परो विष्णुः नारायण इति स्मृतः ।
स भगवान् जगत्सृष्ट्वा चिकीर्षुः तस्य च स्थितिम् ॥ १ ॥

मनसैव ससर्जाग्रे मरीच्यादीन् प्रजापतीन् ।
प्रवृत्तिलक्षणं धर्मं ग्राहयामास तान् प्रभुः । २ ॥

सनकादीन् ततोऽन्यांश्च समुत्पाद्य स तानपि ।
निवृत्तिलक्षणं धर्मं ज्ञानवैराग्यलक्षणम् ॥ ३ ॥

वेदोक्तं ग्राहयामास, धर्मः प्रवृत्तिलक्षणः ।
निवृत्तिलक्षणश्चेति वेदोक्तो द्विविधः स्मृतः ॥ ४ ॥

द्विविधोऽपि धर्मोऽयं जगतः स्थितिकारणम् ।
वैषयिक सुखं यत् तत् अभ्युदय इतीर्यते ॥ ५ ॥

आत्यन्तिकसुखं यत् तत् निश्रेयसमितीर्यते ।
सुखस्य द्विविधस्यापि धर्म एव हि साधनम् ॥ ६ ॥

एष दीर्घेण कालेन ब्रह्मक्षत्रादिवर्णिभिः ।
आश्रमिभिश्च निश्शङ्कं श्रेयस्साधनकांक्षिभिः ॥ ७ ॥

यथाक्रमं अनुष्ठीयमानोऽपि क्षीणतां गतः ।
कामोद्भवेऽननुष्ठानात् जनानां क्रमशो भुवि ॥ ८ ॥

नश्यद्विवेक विज्ञानहेतुकेन विरोधिना ।
अधर्मेण च तद्धर्मे ह्यभिभूतदशां गते ॥ ९ ॥

अधर्मे वर्धमाने च रक्षितुं जगतः स्थितिम् ।
भगवानादिकर्ताऽसौ विष्णुः नारायणाह्वयः ॥ १० ॥

भौमस्य ब्रह्मणः सम्यक् ब्राह्मणत्वस्य पालनम् ।
चिकीर्षुः द्वापरस्यान्ते कृष्णनाम्ना स्वमायया ॥ ११ ॥

वसुदेवाद्धि देवक्यां अंशेन संबभूव ह ।
वर्णाश्रमादिभेदानां ब्राह्मण्याधीनता यतः ॥ १२ ॥

रक्षितः स्यात् त्रयीधर्मः ब्राह्मणत्वे हि रक्षिते ।
ज्ञानशक्तिबलैश्वर्यवीर्यतेजोभिरन्वहम् ॥ १३ ॥

संपन्नो भगवानाद्यः स्वमायां त्रिगुणात्मिकाम् ।
मूलप्रकृतिमव्यक्तां वशीकृत्य च वैष्णवीम् ॥ १४ ॥

अजोऽपि व्ययहीनोऽपि भूतानामीश्वरोऽपि च ।
नित्यशुद्धस्वभावोऽपि बुद्धो मुक्तस्तथाऽपि च ॥ १५ ॥

स्वतन्त्रोऽसौ महाविष्णुः लोकस्यानुजिघृक्षया ।
मायया जातवत् भूमौ देहवानिव लक्ष्यते ॥ १६ ॥

स्वस्य प्रयोजनाभावेऽपि भूतानुजिघृक्षया ।
अर्जुनाय निमग्नाय शोकमोह महोदधौ ॥ १७ ॥

वैदिकं द्विविधं धर्मं भगवान् स उपादिशत् ।
गुणाधिकैर्हि लोकेऽस्मिन् गृहीतश्चाप्यनुष्ठितः ॥ १८ ॥

भवेद्यदि तदा धर्मः प्रचयं च गमिष्यति ।
यथोपदिष्टं तं धर्मं गीताख्यैः सप्तभिः शतैः ॥ १९ ॥

सर्वज्ञो भगवान् श्लोकैः वेदव्यासो निबद्धवान् ।
समस्तवेदतात्पर्यं सारसंग्रहरूपतः ॥ २० ॥

गीताशास्त्रमिदं लोके दुर्विज्ञेयार्थमित्यतः ।
तदर्थं विशदीकर्तुं अनेकैर्यतितः पुरा ॥ २१ ॥

पदपदार्थ वाक्यार्थन्याया यद्यपि दर्शिताः ।
अत्यन्तविरुद्धानेकतात्पर्यत्वेन लौकिकैः ॥ २२ ॥

गृह्यमाणं समीक्ष्याहं विवेचन पुरस्सरम् ।
अर्थनिर्धारणार्थाय निश्चितप्रतिपत्तये ॥ २३ ॥

विवरणं करिष्यामि संक्षेपेण यथाक्रमम् ।
गीताशास्त्रस्य चैतस्य संक्षेपेण प्रयोजनम् ॥ २४ ॥

परं निश्रेयसं प्रोक्तं मोक्षाख्यं पदमुत्तमम् ।
हेतुना सह संसारात्यन्तोपरमलक्षणम् ॥ २५ ॥

तच्चाऽपि संभवेत् सर्वकर्मसंन्यासपूर्वकात् ।
आत्मस्वरूप विज्ञान निष्ठारूपाद्धि धर्मतः ॥ २६ ॥

तथेममेव गीतार्थधर्ममुद्दिश्य भारते ।
भगवताऽनुगीतासु स्वयमेवं प्रदर्शितम् ॥ २७ ॥

स हि धर्मः सुपर्याप्तः ब्रह्मणः पदवेदने ।
नैव धर्मी न चाधर्मी न चैव हि शुभाशुभी ॥ २८ ॥

यः स्यादेकासने लीनः तूष्णीं किंचिदचिन्तयन् ।
तत्रैव च पुनः प्रोक्तं 'ज्ञानं संन्यासलक्षणम्' ॥ २९ ॥

इहापि चार्जुनायोक्तं अन्ते भगवता स्वयम् ।
'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ॥ ३० ॥

यद्यप्यभ्युदयार्थस्स्यात् धर्मः प्रवृत्तिलक्षणः ।
वर्णाश्रमान् समुद्दिश्य विहितश्च तथापि सः ॥ ३१ ॥

देवादिस्थानसंप्राप्तिहेतुभूतो भवेदपि ।
ईश्वरार्पणबुद्ध्यैव फलकामविवर्जितः ॥ ३२ ॥

सुष्ठु अनुष्ठीयमानश्चेत् कल्पते सत्वशुद्धये ।
विशुद्धचेतसो ज्ञाननिष्ठायां योग्यता किल ॥ ३३ ॥

तन्निष्ठाप्राप्तिहेतुत्वात् ज्ञानोत्पत्तेश्च हेतुताम् ।
निश्रेयसस्य हेतुत्वं धर्मोऽयं प्राप्स्यति क्रमात् ॥ ३४ ॥

तथात्राऽपीममेवार्थं अभिसन्धाय वक्ष्यति ।
'ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ॥३५॥

'योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये'।
द्विप्रकारमिमं धर्मं निश्रेयसफलप्रदम् ॥ ३६ ॥

पारमार्थिकतत्त्वं च वासुदेवसमाह्वयम् ।
अभिधेयं परं ब्रह्म व्यक्तश्च विशेषतः ॥ ३७ ॥

सुप्रयोजन संबन्धाभिधेयवत् इदं यतः ।
सम्यक् तदर्थे विज्ञाते नूनमेव भविष्यति ॥ ३८ ॥

समस्त पुरुषार्थानां सिद्धिश्च, तेन हेतुना ।
सम्यक् विवरणे तस्य यत्नोऽयं क्रियते मया ॥ ३९ ॥

एवमारभते गीताभाष्यं आचार्यभाषितम् ।
एवञ्श्लोकानुवादेन दयालुः प्रीयतां गुरुः ॥ ४० ॥

—o—

Copies can be had of:

1. SRI D. S. VISWANATHA IYER,
   Mannadimangalam P. O.
   (via) Sholavandan
   Madurai Dt.

2. SRI SIVARAMA GANAPATHI GANAPATIGAL,
   Melmangalam
   (via) Periyakulam
   Madurai Dt.

3. SRI VANI VILAS PRESS,
   South Chitra Street,
   SRIRANGAM, Trichy-6.